कुंडानि संस्थानान्यंगिनस्युः प्राक्कर्मविपाकतो सुमते ९८ इत्यार्यो तत्र वाद्यं चतुरस्रं संस्थानं स
र्वतः शुभं न्यग्रोधमुद्धं नाभेः सत्प्रमादि नाभेरधः शुभं ९९ सादी ग्रीवापाणिपादेकमनीयं च वामनं उरः
तनद्वयोर्द्वयोः उपायवयपुव १०० रम्यं शोषपर्तीकिंपुक्कुब्जं संस्थानमिष्यते इष्टं किंचिच्छिरोग्रीवापा

MEMORIAL

ण्यपदेनवेदितं १ ऊड्ढं सर्वतोऽप्येकैविहायसनकंपयोः विपर्यासमसमनंतिलक्षणोऽनंतलक्षण २ इतिसं
स्थानस्वरूपं अंगमानेऽथ अंगलमानमंगस्य देहिनां स्थूलता पृथुताद्यं ज्ञेयमौचित्यतः स्वयं ३ इत्यंगमानस्व
रूपं समित्येकीभावयोगाद्वेदनादिभिरात्मनः उत्प्राबल्येन कर्मांशघातो यः सत्तथोच्यते ४ यतः समुद्घात
गतो जीवः प्रभूतकर्मपुद्गलान् कालांतरानुभाव्यानपि क्षिपयति द्रुतं ५ तथैव कालांतरवेद्यानयमाकृ
ष्योदीरणेन कर्मांशान् उदयावलिकायां च प्रवेश्यपरिभुज्य शातयति ६ तथैवं वेदनोत्थः १ कषायोत्थो २
मारणांतिक ३ वैक्रियो ४ आहारक ५ तैजसश्च ६ छद्मस्थानां षडप्यमी ७ स्यात्केवलीसमुद्घातः सप्तमः
सर्वदेहिनां षट्सामयिकश्चायमांतर्मुहूर्त्तिकाः परे ८ तथाहि करालितो वेदनाभिरात्मा स्वीयप्रदेशकान्
२ विक्षिप्यानंतकर्माणुवेष्टितान् देहतो बहिः ९ आपूर्य जठराद्यंतरालानि मुखादिसुषिराणि च विस्तारायाम
तः क्षेत्रं व्याप्य देहप्रमाणकं १० तिष्ठेदंतर्मुहूर्तं च तत्रांतर्मुहूर्त्तके असातवेदनीयांशान् शातयत्येष भू
रिशः ११ इति वेदनासमुद्घात समाकुलः कषायेन जीवः सर्वप्रदेशकैः मुखादिरंध्राण्यापूर्य ततान् विक्षिप्य
पूर्ववत् १२ विस्तारायामतः क्षेत्रं व्याप्य देहप्रमाणकं कषायमोहनीयाख्यकर्मांशान् शातयेद्बहून् १३ शा य॰ २२
तयंश्चापरान् भूरीन् प्रमादात्ते स्वहेतुभिः सेयं प्रवृत्तिनैव वेदस्मात्मुक्तिः प्रसज्यते १४ कषायस्य समुद्घातश्च
तुर्धायं प्रकीर्त्तितः क्रोधमानमायालोभैर्हेतुभिः परमार्थितः १५ इति कषायसमु॰ अंतर्मुहूर्तशेषायुर्मर
णांतकरालितः मुखादिरंध्राण्यापूर्य शारीरीस्वप्रदेशकैः १६ स्वांगविष्कंभवाहल्यं स्वशरीरातिरेकतः जघ

न्यतो गुलासंख्येयांशमुत्कर्षतः पुनः १७ असंख्ययोजनान्येकदिश्युत्पत्तिस्थलावधि आयामतोऽभिव्याप्यां
तर्मुहूर्त्तं म्रियते ततः १८ मरणांतसमुद्घातं गतो जीवश्च शातयेत् आयुषः पुद्गलान् भूरीनादत्ते च नवा
न्नतान् १९ अत्रायं विशेषः कश्चिज्जीव एकेनैव मारणांतिकसमुद्घातेन नरकादिषूत्पद्यते तत्राहा
रं करोति शरीरं बध्नाति कश्चित्तु समुद्घातान्निवृत्य शरीरमागत्य पुनः समुद्घातं कृत्वा तत्रोत्पद्यते
अयमर्थो भगवत्याः षट्शतकषष्ठोद्देशके नरकादिपृथ्वीनरांतेषु पर्वस्थानेषु भावितास्तीति ज्ञेयं ॥
इति मरणांतिकसमुद्घातः ॥ वैक्रियसमुद्घाते प्राप्तो वैक्रियशक्तिमान् कर्मविज्ञानात्मीयप्रदे
शानांतनोर्बहिः २० निसृज्य दंडवद्विष्कंभबाहल्याभ्यां तनुप्रमं आयामतस्तु संख्यातयोजनप्रमितं ततः
२१ वैक्रियांगाभिधनामकर्मांशान् पूर्वमर्जितान् शातयन् वैक्रियांगार्हान् स्कंधान् शात्वा करोति तत् २२
इति वैक्रियसमुद्घातः समुद्धतस्तैजसेन तेजोलेश्याख्यशक्तिमान् कर्मविज्ञात्मप्रदेशराशेर्वैक्रियवद्ब
हिः २३ देहविस्तारबाहल्यं संख्येययोजनायत निसृज्य दंडं प्राग्वद्धानुशातयेत्तैजसाणुकान् २४
अन्यानादायतद्योग्यान् तेजोलेश्यां विमुंचति तैजसोऽयंसमुद्घातः प्रज्ञप्तस्तत्त्वपारगैः २५ इति तैज
ससमुद्घातः ॥ चतुर्दशपूर्वाणां धन्ना हारकलब्धिमान् जिनर्द्धिदर्शनादीनां मध्यकेनापि हेतुना
२६ आहारकसमुद्घातं कुर्वन्नात्मपुरातनात् दंडं स्वांगपृथुस्थूलं संख्येययोजनायतं २७ निसृज्य पु
द्गलानाहारकनाम्नः पुरातनात् विकीर्य दायतद्योग्यान् देहमाहारकं सृजेत् २८ इत्याय

स्कसमुद्घातः यस्यायुषोतिरिक्तानि कर्माणि सर्ववेदिनः वेद्याख्यनामगोत्राणि समुद्घातं करोति सः २९ आंतर्मुहूर्त्तिकं पूर्व-
मावर्जीकरणं स तत् अंतर्मुहूर्त्तिकं शेषायुः समुद्घातं ततो व्रजेत् ३० आवर्जीकरणं शस्तयोगव्यापारणं मतं इदं त्ववश्यं
कर्त्तव्यं सर्वेषां मुक्तिगामिनां ३१ आत्मप्रदेशैर्लोकांतस्पर्शम् ऊर्ध्वमधोपि च कुर्याद्धि प्रथमे दंडं स्वदेहस्य तु विस्तृतं
३२ द्वितीयसमये तस्य ऊर्ध्वास्य पूर्वापरायतं कपाटं पाटवोपि वै कुर्यात् ततः समये पुनस्तृतीयके ३३ ततो विस्तार्य प्रदेशान् प्रा-
गुदीचीदक्षिणायतं मंथानं कुरुते रथ्ये ततोंतराणि पूरयेत् ३४ स्वप्रदेशैस्तदा सर्वान् लोकाकाशप्रदेशकान् सव्याप्-
तिसमानत्वे तेन लोकाकाशैकजीवयोः ३५ संहरत्यंचमे त्वासौ समयेंतरपूरणं षष्ठे संहृत्य मंथानं संहरेत्सप्तमे ररिं ३६
संहरेदष्टमे दंडं शरीरस्थस्ततो भवेत् अंतर्मुहूर्त्तं जीवित्वा योगरोधाद्धि वै व्रजेत् ३७ यदाहुः यस्य पुनः केवलिनः कर्म
भवत्यायुषोतिरिक्ततरं स समुद्घातं भगवान् अथ गच्छति तत्समीकर्तुं ३८ दंडं प्रथमे समये कपाटमथ चोत्तरे तथा सम-
ये मंथानमथ तृतीये लोकव्यापी चतुर्थे तु ३९ संहरति पंचमे त्वंतराणि मंथानमथ पुनः षष्ठे सप्तमके तु कपाटं संह-
रति ततोष्टमे दंडं ४० औदारिकप्रयोक्ता चतुर्थके पंचमे च तृतीये च समयत्रयेपि तस्मिन् भवत्यनाहारको नियमात् २५
४१ किंच समुद्घातान्निवृत्तः सो त्रिधा योगान् युनक्त्यपि सत्यासत्यमृषाभिख्यौ योगौ मानसवाचिकौ ४२ एषु मनःसोये-
ष्व तत्रानुत्तरसाक्षिभिः द्वा तं तदुत्तरं चेतो योगयुगं युनक्ति सः ४३ तथा मनुष्यादिनाच पृष्टः पृष्टोपि स प्रभुः प्रयोज-
न विशेषेण युनक्त्येतौ च वाचिकौ ४४ काययोगं प्रयुंक्ते गमनागमनादिषु वेष्टते पीठफलकाद्यमर्पयेत् प्रातिहारिकं ४५ त-
तश्च ॥ पर्याप्तसंज्ञिपंचाक्षमनोयोगाज्जघन्यतः असंख्यगुणहीनं तु निरुंधानः क्षणे क्षणे ४६ असंख्येयैः क्षणैरेवं साकल्य-

न रुणद्धि तं ततः पर्याप्तकद्वींद्रियवचोयोगाज्जघन्यतः ४७ असंख्यगुणहीनं तं निरुंधानः क्षणे क्षणे एवं क्षणैरसंख्येयैः साक-
ल्येन रुणद्धि सः ४८ ततः पर्याप्तसूक्ष्मस्य काययोगाज्जघन्यतः असंख्यगुणहीनं तं निरुंधानः क्षणे क्षणे ४९ असंख्ये-
यसमयैरेवं साकल्येन रुणद्धि सः योगान् रुंधंश्च समआयेत् शुक्लध्यानं तृतीयकं ५० एतेन सदुपायेन सर्वयोगनिरोधतः
अयोगतां समासाद्य शैलेशीं प्रतिपद्यते ५१ पंचानां ह्रस्ववर्णानां मुच्चारप्रमितां च तां प्राप्तः शैलेशवन्निष्कंपः स्वकृतात्कृष्ट
संवरः ५२ शुक्लध्यानं चतुर्थं च ध्यायन्युगपदंजसा वेद्यायुर्नामगोत्राणि क्षपयित्वा स सिध्यति ५३ अगत्वापि समुद्घा-
तमनंता निर्वृता जिनाः अवाप्यापि समुद्घातमनंता निर्वृता जिनाः ५४ इति केवलिसमुद्घातः आद्याः पंच समुद्घाता
सर्वेषामपि देहिनां अनुभूता अनंताः स्युर्यथास्वं सर्वजातिषु ५५ भाविनस्तु न संत्येव केषांचिल्लघुकर्मणां केषांचि-
त्संगिनामेकाद्याः स्युरनंताश्च ५६ याचकृण्या अगण्या वा स्युः केषांचिदनंतकाः यथास्वं सर्वजातित्वे विचित्रैस्तथा-
वकुकर्मणां ५७ नवरं स्यानादिनिगोदस्तु निगोद एव ते अनुभूता अनंतास्तु भाविनस्तु सर्ववत् ५८ आ-
हारकास्तु नराणां केषांचिन्न भवेत्त्रयः अतीतास्तु भाविनस्तु ते चत्वारो नवाधिकाः ५९ संभवेयुश्च चत्वारोऽनुभूतास्तु
न च नृणां न विष्यंतोपि चिज्ज्ञेयास्तावंतोपि न न च नृणां ६० चत्वारोपि व्यतीतास्तु नान्येषां तु भवे विना यतः आहारकं तु चतु-
र्वारं कृत्वा सिध्यति तद्भवे ६१ तथोक्तं प्रज्ञापनावृत्तौ ॥ इह यश्चतुर्थवेलं आहारकं करोति स नियमात्तद्भव एव मुक्तिं
आसादयति ६२ न गत्यंतरमपि ॥ सप्तमस्तु न कस्यापि स्यादतीतोनरं विना भाव्यप्येकोऽग्रजंतूनां केषांचिन्नृत्व एव च
६३ समुद्घातो जीर्णजिनं प्रतीत्य कानिचिद्विनः मनुष्यस्य मनुष्यत्वेऽनागताप्येक एव सः ६४ असद्वेद्यादिनश्चाद्यो

मोहनीयाश्रितः परः । अंतर्मुहूर्त्तशेषायुःसंश्रितः स्यात्तृतीयकः ६५ तुर्यपंचमषष्ठाश्च नामकर्मसमाश्रिताः
नामगोत्रवेद्यकर्मसंश्रितः सप्तमो भवेत् ६६ इति जीवसमुद्घातः । योऽप्यचित्तमहास्कंधसमुद्घातोऽस्त्यजीवजः
अष्टसामयिकः सोऽपि ज्ञेयः सप्तमवत्सदा ६७ पुद्गलानां परिणामाद्विस्रसो वा स जायते अष्टभिः समयैर्जातिस
माप्तो जिनसत्कवत् ६८ इति समुद्घाताः । विवक्षितभवादन्यभवे गमनयोग्यता यानवेहिनां सात्र गतिर्गतं चक
थ्यते ६९ इति गतिस्वरूपं ॥ विवक्षितेन भवेऽन्यस्मान्भवेभ्यो यावदेहिनां उत्पत्तौ योग्यता सात्रागतिरिसुपदर्शिता
७० एकसामायिकीसंख्यामृत्यन्योऽन्यस्थानंतरं वारेस्मिन्नेव वस्वंतेत द्वाराणि पृथक्कृतत् ७१ इत्यागतिस्वरूपं
॥ विवक्षितभवान्मृत्वोत्पद्यवानंतरे भवे यत्सम्यक्त्वाद्यश्नुते भी सानंतराप्तिरुच्यते ७२ इत्यनंतराप्तिस्वरूपं ॥
लब्ध्वा नृत्वादिसामग्रीं यावंतोऽधिकृताङ्गिनः सिद्ध्यंत्येकक्षणेनैकसमये सा हि सरूच्यते ७३ इत्येकस
मयसिद्धिस्वरूपं ॥ कृष्णादिद्रव्यसाचिव्यात्परिणामोऽयमात्मनः स्फटिकस्येव तत्रायं लेश्याशब्दः
प्रवर्त्तते ७४ सा च षोढा कृष्णनीलकापोतसंज्ञितास्तथा तेजोलेश्या पद्मलेश्या शुक्ललेश्येति नामतः
७५ खंजनांजनजीमूतभ्रमद्भ्रमरसंनिभा कोकिलाकलभीकल्या कृष्णलेश्या स्ववर्णतः ७६ पि
च्छतः शुकचाषाणां केकिकापोनकंठवत् नीलाम्बवतो नीला नीललेश्या स्ववर्णतः ७७ जित्वा खदि
रसाराणामतसीपुष्पसोदरा कापोतलेश्या वर्णेन वृंताककुसुमोपजत् ७८ पद्मरागनवादित्य
संध्यागुंजार्द्धतोऽधिका तेजोलेश्या स्ववर्णेन विद्रुमांकुरजित्वरी ७९ सुवर्णयूथिकास्वर्णकर्णि २५

कारेषच्चंपकान् परानवंति वर्णेन पद्मलेश्या प्रकीर्तिता ८० गोक्षीरदधिडिंडीरपिंडादधिकपांडुरा वर्णतः शारदाभ्राणां
शुक्ललेश्याभिभाविनि ८१ किराततिक्तत्रपुषीकटुतुंबीफलानि च त्वचः फलानि निंबानां कृष्णलेश्या रसैर्जयेत् ८२
पिप्पलीशृंगबेराणि मरीचानि च राजिकां हस्तिपिप्पलिकां जेतुं नीललेश्या रसैर्जयेत् ८३ आमानि मातुलिंगानि कपि
त्थबदराणि च फणसामलकानीष्टे रसैर्जेतुं तृतीयका ८४ वर्णगंधरसापन्नपक्काम्रादिसमुद्भवान् रसानधिकमाधु
र्यात्तुर्याधिकृतस्तेरसैः ८५ द्राक्षाखर्जूरमाध्वीकवारुणीनामनेकधा चंद्रप्रभादिसीधूनां जयिनी पंचमी रसैः ८६
शर्करागुडमत्स्यंडीखंडाखंडादिकानि च माधुर्यधुर्यवस्तूनि शुक्ला विजयते रसैः ८७ आद्यास्तिस्रोऽतिदुर्गंधा अप्र
शस्तामलीमसाः स्पर्शतः शीतरूक्षाश्च संक्लिष्टा दुर्गतिप्रदाः ८८ अन्यास्तिस्रोऽतिसुगंधाः प्रशस्ता अतिनिर्मलाः स्नि
ग्धोष्णास्पर्शगुणतोऽसंक्लिष्टाः सुगतिप्रदाः ८९ परस्परमिमाः प्राप्य मिथो यांति तद्रूपतामपि वैडूर्यरक्तपटयोरेव
तत्र निदर्शने ९० तथाहि । देवनारकलेश्यासु वैडूर्यस्य निबंधनं तिर्यग्मनुष्यलेश्यासु रक्तवस्त्रनिदर्शनं ९१ तथा
हि ॥ देवनारकयोर्लेश्या आभवांतमवस्थिताः नानाकृतिं यांति किंतु द्रव्यांतरोपधानतः ९२ न तु सर्वात्मना स्वीयं स्व
रूपं संत्यजंति ताः स वैडूर्यमणिर्यद्वन्नानासूत्रप्रयोगतः ९३ जपापुष्पादिसान्निध्याद्यथा वादर्शमंडलं नानावर्णान्
दधदपि स्वरूपं नोज्झति स्वकं ९४ अत एव भावपरावृत्त्या नारकनाकिनोः भवंति लेश्याः षडपि तदुक्तं पूर्वसूरिभिः
९५ सुरनारयाण ताओ दव्वलेसा अवट्ठियाओ तिया भावपरावत्तीए पुण एसिं हुंति छल्लेसा ९६ उक्तलेश्यावतां नार
काणामप्यत एव च सम्यक्त्वलाभो घटते तेजोलेश्यादिसंभवी ९७ यदाहुः सम्मत्तस्सयतिसुत्रवरिमासु परिवद्धमा ३

णत्तेहोइ पुव्वपडिवन्नस्सपुण अन्नयरीए उलेसाए ॥८॥ तथैव तेजोलेश्याद्यो घटते संगमामरे वीरोपसर्गकर्तृत्वेन कृ
ष्णलेश्यादिसंभवी ॥९॥ स्वरूपमागतः सर्वात्मना तिर्यग्मनुष्ययोः लेश्यास्त्वेताः यांति रागद्वेषप्रद्वेषादिवत् ३००
अत एवोत्कर्षतोप्यंतर्मुहूर्त्तमवस्थिताः तिर्यग्नृणां परावर्त्तंते लेश्यास्ततः परं १ वक्ष्यमाणसंप्रदायमत्रैवाभि
धानवधानचेतः सप्तविंशतिधा चैकाशीतिधा त्रिगुणस्तथा २ जघन्यमध्यमोत्कृष्टभेदतस्त्रिविधेन चेत् प्रत्येकमे
षां स्वस्थानतारतम्यविचिंतया ३ नचेन्नवविधस्तेषामपि नवविवक्षया सप्तविंशतिधा मुख्यास्त्वेवं भेदैस्त्रिभिस्त्रिभिः
४ तथाहुः प्रज्ञापनायां कण्हलेस्साणं भंते कतिविहं परिणामं परिणमति गो० तिविहं वा णवविहं वा सत्तावीसतिविहं वा
एक्कासीतिविहं वा तेयालउसयविहं वा परिणामं वा बहुं वा बहुविहं वा परिणामं परिणमति॥ कृष्णायाः स्थिति
रुत्कर्षात्त्रयस्त्रिंशत्पयोधयः आद्यात्मभवसंबंध्यंतर्मुहूर्त्तद्वयाधिका ५ पल्यासंख्येयभागाढ्या नीलायाः सागरा द
श: पल्यासंख्यांशसंयुक्ताः कापोत्यास्तु त्रयोदधयः ६ आद्यात्मभवसत्कांतर्मुहूर्त्तद्वयमंतयोः पल्यासंख्यांशए वांत
र्भूतं नेस्तु वांते पृथक् ७ एवं तैजस्यामपि ज्ञेयं तेजस्याद्यौ पयोराशी पल्यासंख्येयभागाधिको अंतर्मुहूर्त्ताभ्यधिका
: पद्मायाः दशवार्धयः ८ अंतर्मुहूर्त्ताः शुक्लायास्त्रयस्त्रिंशत्पयोधयः अंतर्मुहूर्त्तमत्रासां जघन्यतः स्थिति
र्भवेत् ९ यत्तु प्रज्ञापनोत्तराध्ययनसूत्रादौ कृष्णादीनामंतर्मुहूर्त्ताभ्यधिकत्वमुच्यते तत्राद्यात्मभवसत्कांतर्मुहू
र्त्तयोरेकस्मिन्नंतर्मुहूर्त्ते समावेशात् १० एवं चैतदंतर्मुहूर्त्तस्यासंख्यातभेदत्वादुपपद्यते इत्यादि प्रज्ञापनावृत्तौ २६
इति सामान्यतो लेश्यास्थितिः स्थितिं वक्ष्ये पृथग्लेश्यानां नारकस्वर्गिणां नृणां तिरश्चां च जघन्येनोत्कर्षेण च य

थागमं १० दशवर्षसहस्राणि कापोत्याः स्याल्लघुः स्थिति उत्कृष्टा त्रीणि तराणि पल्यासंख्यलवस्तथा ११ ज
घन्यात्र घर्माद्यप्रस्तटापेक्षया भवेत् उत्कृष्टा च तृतीयाद्यप्रस्तटापेक्षयोदिता १२ नीलाया लघुरेषैवोत्कृ
ष्टा च दशवार्धयः पल्यासंख्येयभागाढ्याः कृष्णायाः स्यादसौ लघुः १३ स्थितिर्जघन्या नीलायाः शैलाद्यप्रस्
टेन वेत्र रिष्टाद्यप्रस्तटेत्वस्या ज्येष्ठा कृष्णास्थितिर्लघुः १४ कृष्णायाः पुनरुत्कृष्टा त्रयस्त्रिंशत्पयोधयः इयं मा २
घवत्यां ज्येष्ठायुष्कापेक्षया १५ इत्थं नारकलेश्यानां स्थितिः प्रकटिता मया अथ निर्जरलेश्यानां स्थि
तिं वक्ष्ये यथाश्रुतं १६ दशवर्षसहस्राणि कृष्णायाः स्याल्लघुस्थितिः एतस्याः पुनरुत्कृष्टा पल्यासंख्यांशसंमि
ता: १३ इयमेकसमयाधिका नीला स्थितिर्लघुः पल्यासंख्येयभागश्च नीलोत्कृष्टस्थितिर्भवेत् १४ पल्यासं
ख्येयभागोयं प्रोक्तासंख्यभागतः बृहत्तरो भवेदेवं ज्ञेयमग्रेपि धीधनैः १५ या नीलायाः स्थितिर्ज्येष्ठा समया
भ्यधिका वसा कापोत्या लघुरस्याः स्यात्पल्यासंख्यलवो गुरुः १६ लेश्यानां तिसृणामासां स्थितिर्यद्दर्शिता भव
न भवनेशव्यंतरेषु नान्येषु तदसंभवात् १७ एवं वक्ष्यमाणतेजोलेश्यायाश्चाप्यसौ स्थितिः भवनव्यंतरज्योति
ष्कल्पद्वयावधि १८ पद्मायाश्च स्थितिर्ज्ञेया ब्रह्मलोकानादनंतरं लांतकात्परतः शुक्ललेश्यायास्तावतामिति
१९ अथ प्रकृतं दशवर्षसहस्राणि तेजोलेश्यालघुस्थितिः भवनेशव्यंतराणां पत्योमासाम्नानुनिः २० उत्कृ
ष्टा भवनेशानां साधिकं सागरोपमं व्यंतराणां समुत्कृष्टा पल्योपममुदीरिता: २१ स्यात्पल्यस्याष्टमो भागो ज्यो
तिषां सा लघुर्मायमा उत्कृष्टा वर्षलक्षेणाधिकं पल्योपमं भवेत् २२ सा लघुर्वैमानिकानामेकं पल्योपमं मता

PAGE(S)MISSING

NOT AVAILBLE

27

उत्कृष्टा सोपयोराशी पल्यासंख्यलवाधिका २३ समयाभ्यधिकैषैव पद्माया: स्याल्लघुस्थिति: उत्कृष्टा पुनरेतस्या: स्थिति
र्दशपयोधय: २४ इयमेव च शुक्लाया: स्थितिर्लघ्वी क्षणाधिका उत्कृष्टा पुनरेतस्यास्त्रयस्त्रिंशत्पयोधय: २५ इत्थं नार
कदेवानां लेश्यास्थितिरुदीरिता अथ तिर्यग्मनुष्याणां लेश्यास्थितिरुदीर्यते २६ याया लेश्या येषु येषु नृषु तिर्यक्षु च
स्यात्ते आंतर्मुहूर्त्तिकी सा सा शुक्ललेश्यां विना नृषु २७ शुक्ललेश्यास्थितिर्नृणां जघन्यांतर्मुहूर्त्तिकी उत्कृष्टा नववर्षोना
पूर्वकोटी प्रकीर्त्तिता २८ यद्यप्यष्टवर्षवया कश्चिद्दीक्षामवाप्नुयात् तथाप्येतादृग्वयस: पर्यायं वार्षिकं विना २९ नो
देति केवलज्ञानमतो युक्तमुदीरिता पूर्वकोटिनवोष्टोना शुक्ललेश्यागुरुस्थिति: ३० इत्युत्तराध्ययनसूत्रवृत्ति प्रज्ञापना
वृत्त्यभिप्राय: तथैव संग्रहण्यामप्युक्तं॥ वरमान।राणपुनववासूणपुव्वकोडीवीति॥ संग्रहणीवृत्तौ प्रवचनसारोद्धारवृ
त्तौ च नराणां पुनश्चरमा शुक्ललेश्या उत्कर्षत: किंचिन्न्यूननववर्षोनपूर्वकोटिप्रमाणापि इयं च पूर्वकोटरूर्द्ध्वं संयमावाप्ति
र भावात्पूर्वकोट्यायुष: किंचित्समधिकवर्षाष्टिका रूर्द्ध्वमुत्पादितकेवलज्ञानस्य केवलिनोऽवसेया इत्युक्तं॥ अत्र च पूर्व
कोट्या नववर्षोनत्वं किंचिन्न्यूननववर्षोनत्वं किंचित्समधिकाष्टवर्षोनत्वमिति त्रयं मिथो यथा न विरुध्यते तथा बहु
श्रुतेभ्यो भावनीयं॥ प्रत्येकं सर्वलेश्यानामनंता वर्गणा: स्मृता: प्रत्येकं निखिला लेश्यास्तथानंतप्रदेशका: ३१ असंख्या
तप्रदेशावगाढा: सर्वा उदाहृता: स्थानान्यध्यवसायस्य तासां संख्यातिगानि च ३२ क्षेत्रतस्तान्यसंख्येयलोकाकाशांशसमा
नि वै कालतोऽसंख्येयकालचक्रक्षणमितानि च ३३ यदुक्तं असंखेज्जाणउस्सप्पिणीण उसप्पिणीण जे समया संखा २५
ईआ लोगा लेस्साणं हुंति ठाणाइं ३४ अभिप्रायोयं यथा पथपरिभ्रष्टा: पुरुषा: षण्महाटवीं प्राप्ता भ्रमंतो दैवतेन न

संदिग्धवर्त्मनि ३५ जंबूवृक्षं क्वचित्तत्र ददृशु: फलभंगुरं आक्रयंतमिवाह्वानमरुच्चपलपल्लवै: ३६ एक
स्तत्राह वृक्षोयं मूलादुन्मूल्यते तत: सुखासीना: फलास्वादं कुर्म: श्रमविवर्जिता: ३७ अन्य प्राह किमेतावान् पा
त्यते प्रौढपादप: शाखा महत्यश्छिद्यंते संतोति सुफलाश्रिय: ३८ तृतीयोथावदत्शाखा नदिष्यति क्वदहम
प्रशाखा एव पात्यंते यत एवैताफलैर्भृता: ३९ तुर्यावदावचैस्तर्ह्यपि तिष्टंत्वेता वराकिका: यथेष्टं गुच्छमे
वाद विज्ञायेषु फलोत्तम: ४० नन: प्रयोजनं गुच्छै: फलै: किं तु प्रयोजनं तान्येव नु विकीर्यंत पंचम: प्रो
विवानिति ४१ षष्टेन शिष्टमतिना समादिष्टमिदं तत: पतितानि फलान्यद्यो मा नुत्पातनपातकं ४२ ना
त्या: षण्मष्यमीषां लेश्या: कृष्णादिका: क्रमात् दर्श्यंतेभ्योपि दृष्टांतो दृष्टश्रीश्रुतसागरे ४३ केवनय
प्रघातेच चौरा: क्रूरपराक्रमा: क्रामंतो मार्गमन्योन्यं विचारमिति चक्रिरे ४४ एकस्तत्राह यत्प्राप्य
कश्चिद्दृष्टिमेति न: हंतव्य: सोद्यसर्वोपि द्विपदो वा चतुष्पद: ४५ अन्य: प्राह चतुष्पाद्भि रपराद्धं न किं
चनं मनुष्या एव हंतव्या विरोधाय: समं ह्यात्मना ४६ तृतीय: प्राह न स्त्रीणां हत्या कार्येति निंदिता पुरुषा एव
हंतव्या यतस्ते क्रूरचेतस: ४७ निरायुधैर्वराकैस्तैर्हतै: किं न प्रयोजनं घात्या: सशस्त्रा एवेति तुर्य आख्यद्दयावान् जगौ
४८ सशस्त्रैरपि नश्यद्भिर्हतै: किं न: फलं ततो नैतु मा युध्यद्यु घ्नतेय: सवध्य इत्याह पंचम: ४९ परद्रव्यापहरण
मेकं पापमिदं महत् प्राणापहरणं चान्यद्धे कुर्मस्तद्विका गति: ५० धनमेव तदादयं मारणीयो न कश्चन षष्ट: स्पष्ट
म नविष्ट ग्रहट त्रापि भावना ५१ सर्वस्तोका: शुक्ललेश्या जीवास्तेभ्यो यथोत्तरं पद्मलेश्यास्तेजोलेश्या असंख्येयगु

णाः क्रमात् ५२ अनंतघ्नास्ततोऽलेश्याः कापोताद्यास्तथस्तथा तेभ्यो नीलकृष्णलेश्याः क्रमाद्विशेषतोधिका ५
३ इतिलेश्यास्वरूपं निर्व्याघातंप्रतीत्यस्याद्दाहारः षड्दिगुद्भवः व्याघातेत्वेषजीवानां त्रिचतुर्पंचदिग्भवः ५४
अलोकविषयताहार द्रव्याणांस्खलनं हियत् सव्याघातस्तदभावो निर्व्याघात मिहोच्यते ५५ भावनात्वेवं सर्वाध
स्तादधोलोक निष्कुटस्याग्निकोणके स्थितोभवेद्यदैकाक्षस्तदासौ त्रिदिगुद्भवः
५६ पूर्वस्यां चदक्षिणस्या मधस्तादितिदिग्त्रये संस्थितत्वादलोकस्य ततोनाहा
रसंभवः ५७ अपरस्यामुत्तरस्या मूर्द्ध्वंतश्चेतिदिक्त्रयात् पुद्गलानाहरत्येवं
सूक्ष्मापेक्षयानिगोदगः ५८ तथोक्तं॥ इहलोकचरमांते बादरपृथ्वीकायिका
प्कायिकतेजोवायुवानसंति॥ सूक्ष्मास्तुपंचापिसंति बादरवायुकायिकाश्चेति
पर्याप्तापर्याप्तक भेदेन द्वादशस्थानाम्यनुसर्त्तव्यानीति॥ भग॰ शतक ३४
द्वयोर्दिशोस्तथैकस्या अलोकमावृतौबुधैः चतुःपंचदिगुत्पन्नोप्येषामेषविभा
व्यतां ५९ तथाहि सर्वदिस्तादधोलोक एवचेत्पश्चिमांदिशं स्थितोऽनुसरत्ये
काक्षः स्यात्सोव्यानव्यावृतिस्तदा ६० अधस्तनीवद्दक्षिणावद्वे एवव्यावृतेइति दि
ग्मोनाम्यश्चतसृभ्यः पुद्गलानाहरत्यसौ ६१ द्वितीयादिप्रतरेषु यदोर्द्ध्वं पश्चिमां दिशं स्थितोऽनुसरत्येकाक्षः स्या
त्तव्यावृतिरधोपियत् ६२ व्यावृतादक्षिणैवैकातत: पंचदिगागतान् पुद्गलानाहरत्येष एवं सर्वत्रभावना ६३ २९

Dr. BHAU DAJI
डाक्टर भाऊदाजीइत्याख्यस्यसमर्पितम्

द्रव्यतश्चसआहारः स्यादनंतप्रदेशकः संख्यासंख्यप्रदेशंहिनात्मग्रहणगोचरः ६४ असंख्यात्प्रदेशानां क्षेत्र
तः सोवगाहकः जघन्यमध्यमोत्कृष्टस्थितिकः कालतः पुनः ६५ भावतः पंचधावर्णरसेगंधेद्विधाष्टधास्पर्शै
रेकगुणत्वादिभेदैः पुनरनेकधा ६६ किंच अनंतरावगाढानिस्वगोचरगतानिच द्रव्याण्यसहार्याणि अ
णूनिबादराणिवा ६७ आहरंतिवर्णगंधरसस्पर्शान्पुराणतान् विनाश्यान्यांस्तथोत्पाद्या पूर्वान्जीवाः स्वभाव
तः ६८ इत्याहारदिक्प्रसंगात्किंचिदाहारस्वरूपंच॥ अस्तिसंबंधरूपाणितत्रसंहननानिच षोढाखलुवि
भिद्यंते दार्ढ्यादितारतम्यतः ६९ तथाहुः वज्जरिसहनारायं १ पढमं बीयंचरिसहनारायं २ नारायत्रमद्धनारा
य ४ कीलियापतहयछेवठं ७० कीलिकावज्रमृषभः पट्टोस्थिद्वयवेष्टकः अस्थ्नोर्मर्कटबंधोयसनाराचइ
तिस्मृतः ७१ ततश्च॥ बद्धेमर्कटबंधेनसंधौद्वयदस्थिनी अस्थ्नाचपट्टाकृतिनानवतः परिवेष्टिते ७२ तदस्थित्रयभावि
द्धस्थितेनास्थ्नाद्दृढीकृतं कीलिकाकृतिनावज्रर्षभनाराचकंहितत् ७३ ऋषभनाराचं कीलिकारहितंचतत् केचित्तु
वज्रनाराचं पट्टोज्झितमिदंजगुः अस्थ्नोर्मर्कटबंधेनयक्तचेदकपार्श्वतः अन्यतः कीलिकानद्धमर्द्धनाराचकंहितत्
७६ तत्कीलिकाख्यंयत्रास्थ्नोकेवलंकीलिकाबलं अस्थ्नांपर्यंतसंबंधरूपंसेवार्त्तमुच्यते ७७ सेवयाभंगाद्यया वाकृ
तंव्याप्तंस्नेहतस्तथा छेदैःखंडैर्मिथःस्पृष्टं छेदस्पृष्टमथापिवा ७८ यद्यपीस्युरनस्थीनामेतान्यस्थ्यात्मकानिन तद्गतः
शक्तिविशेषस्तथाप्येष्टपरचयति ७९ एकेंद्रियाणांसेवार्त्तमपेक्षैवकल्प्यते जीवाभिगमनुसृतैः केश्चिद्धांघसु
धांनुजां ८० संग्रहणीकारैस्तु छगसतिरिनराणं समुच्छिमपंणींदिविगलछेवठं सुरनेरइयाएगिंदियाय सव्व

असंघयणा ८१ इत्युक्तं ॥ इति संहननानि ॥ कषं संसारकांतारमयंते यांति यैर्जनाः ते कषायाः क्रोधमानमायालो-
भा इति स्मृताः ८२ तत्र च क्रोधोऽप्रीत्यात्मको मानोऽमर्षोत्कर्षलक्षणः मायान्यवंचनारूपा लोभस्तृष्णातिगृद्ध-
ता ८३ चत्वारोंतर्भवंत्येते तेन योर्द्वेषरागयोः आदिमौ द्वौ भवेद्द्वेषो रागः स्यादंतिमौ च तौ ८४ केचित्तु स्वपरोपघातरू-
पत्वान्मानोपि रागएव यत् तत्स्वाश्रयात्मको रागो द्वेषः क्रोधस्तु केवलं ८५ चत्वारोपि चतुर्भेदास्तु ते नंतानुबंधिनः
अप्रत्याख्यानकाः प्रत्याख्यानाः संज्वलना इति ८६ एतल्लक्षणानि च श्रीहेमचंद्रसूरिभिरित्यमूचिरे पक्षं संज्वलन
: प्रत्याख्यानो मासचतुष्टयं अप्रत्याख्यानको वर्षं जन्मानंतानुबंधिकः ८७ कर्मग्रंथकारैरप्यसदृष्टांता एवमेते जग-
दिरे जलरेणुपुढविपव्वय राईसरिसो चउव्विहो कोहो तिणिसलयाकट्ठट्ठिय सेलत्थंभोवमो माणो ८८ माया-
वलेहिगोमुत्ति मिंढसिंगघणवंसिमूलसमा लोहो हलिद्दखंजण कद्दमकिमिरागसामाणो ८९ तथा प्रज्ञाप-
नायां प्रज्ञप्ताः स्वात्मोभयप्रतिष्ठिताः अप्रतिष्ठितकाश्चैवं चत्वारोपि चतुर्विधाः ९१ चतुर्भिः कारणैरेते प्रायः
प्रादुर्भवंति च क्षेत्रं वास्तु शरीरं च प्रतीत्योपधिमंगिनां ९२ सर्वस्तोका निष्कषाया मानिनोनंतकास्ततः क्रुद्धमाया
विशेषाढ्याः स्युर्विशेषाधिकाः क्रमात् ९३ एकेंद्रियाणां चत्वारोप्यनाभोगाद्भवंत्यमी अदर्शितबहिर्दृग्विकारा
अस्फुटात्मकाः ९४ सर्वेषामेव चारित्रात्कषायाघनिवारिणः नोकषाया नवप्रोक्ता नवनीयकर्मांबुजैः ९५
हास्य१ रत्य२ रती३ भीति४ जुगुप्सा५ शोक६ एव च पुं७ स्त्री८ क्लीबा९ भिधा वेदाः नोकषाया अमीमताः ९६ २०
इतिकषायाः संज्ञास्याद्ज्ञानरूपैका द्वितीयानुभवात्मिका तत्राद्यपंचधा ज्ञानमन्या चस्यात्मरूपतः ९७ असातवे-

दनीयादिकर्मोद्भवसमुद्भवा आहारादिपरीणामभेदात्सा च चतुर्विधाः ९८ तथाहुः चत्तारि सण्णाउ प॰ तं॰ आहार
सण्णा भयसण्णा मेहुणसण्णा परिग्गहसण्णा इति स्थानांगे ॥ आहारे योभिलाषः स्याज्जंतोः क्षुद्वेदनीयतः आहारसं-
ज्ञासा ज्ञेया शेषाः स्युर्मोहनीयजाः ९९ भयसंज्ञा भयं त्रासरूपं यदनुभूयते मैथुनेच्छात्मिका वेदोदयजा मैथुना-
भिधा १०० स्यात्परिग्रहसंज्ञा च लोभोदयसमुद्भवा अनाभोगमयैरूपा एताश्चैकेंद्रियांगिनां १ भगवत्यसमत्र-
तकाष्टमोद्देशकेतु ॥ आहार१ भय२ परिग्गह३ मेहुण४ तह कोह५ माण६ माया७ लोभ८ लोगो९ ओहो१०
सण्णा दस सव्वजीवाणं २ एताश्चहेतोपलक्षणेन सर्वैकेंद्रियाणां साक्षादेवं दर्शिताः तद्यथा रुक्खाणजलाहा-
रो संकोअणिआ भएण संकुइयं नियतंतुएहिं वेढइ वल्लीरुक्खे परिग्गहेइ ३ इत्थिपरिरंभणेणं कुरुबगत-
रुणो फलंति मेहुणे तह कोनदस्स कंदे हुंकारे मुअइ कोहेणं ४ माणे झरइ रुअंती छायइ वल्ली फलाइं माया-
ए लोभे बिल्लपलासा खिवंति मूले निहाणुवरिं ५ रयणीए संकोओ कमलाणं होइ लोगसण्णाए ओहे चइत्तु मग्गं
चडंति रुक्खेसु वल्लीउ ६ प्रवचनसारोद्धारवृत्तौ त्वेवं लिखितं तथा मतिज्ञानावरणकर्मक्षयोपशमात् शब्दार्थ-
गोचरा सामान्यावबोधक्रिया ओघसंज्ञा तद्विशेषावबोधक्रिया लोकसंज्ञा एवं चेदमापतितं दर्शनोपयोग ओघसंज्ञा
ज्ञानोपयोगो लोकसंज्ञा एष स्थानांगटीकाभिप्रायः आचारांगटीकायां पुनरभिहितं ओघसंज्ञा अव्यक्तोपयोगरूपा
वल्लीवितानारोहणादिसंज्ञा लोकसंज्ञा स्वच्छंदघटितविकल्परूपा लोकोपचरिता यथा न संत्यनपत्यस्य लोकाः
श्वानो यक्षा विप्रा देवाः काकाः पितामहा बर्हिणां पक्षवातेन गर्भ इत्यादिका इति आचारांगेतु मोह१ धर्म२ सु-

रव ३ दुःख ४ जुगुप्सा ५ शोक ६ नामभिः दशाताः षड्भिरेताभिः सह षोडशावर्णिताः ७ अथवा त्रिविधाः संज्ञाः प्रथ
मा दीर्घकालिकी द्वितीया हेतुवादाख्या दृष्टिवादाभिधापरा ८ सुदीर्घमप्यतीतार्थं स्मरत्यपि विचिंतयेत् कथं नु
नाम कर्तव्यमित्यागामिनमा॰ यया ९ तथापि चिंत्येष्टानिष्टछायातपादिवस्तुषु द्वितीययाप्यसौ स्वार्थं स्या
त्प्रवृत्तिनिवृत्तिमान् १० भवेत्सम्यग्दृशामेव दृष्टिवादोपदेशिकी एतामपेक्ष्य सर्वेऽपि मिथ्यादृशो ह्यसंज्ञिनः
११ सुरनारकगर्भोत्थजीवानां दीर्घकालिकी संमूर्छिमानां त्र्यक्षादिजीवानां हेतुवादिकी १२ छद्मस्थसम्यग्
दृष्टीनां श्रुतज्ञानातिकांतिमा मतिव्यापारनिर्मुक्ताः संज्ञातीताः जिनाः समे १३ इति संज्ञाः ॥ इंदुस्यात्परमैश्व
र्ये धातोरस्य प्रयोगतः इंदनात्परमैश्वर्यादिंद्र आत्माभिधीयते १४ तस्य लिंगं तेन सृष्टमितींद्रियमुदीरयेत् श्रो
त्रादिपंचधा तच्च तथाहुर्वाचकेनाप्युक्तं १५ इंदो जीवो सव्वोवलद्धिभोगपरमेसरत्तणओ सोत्ताइभेयमिं
दियमिह तल्लिंगाइभावाओ १६ श्रोत्रघ्राणरसनस्पर्शनानीति पंचधा तान्येकैकं द्विभेदं तद्द्रव्यभावविभेद
तः १७ तत्र निर्वृत्तिरूपं स्यात्तथोपकरणात्मकं द्रव्येंद्रियमिति द्वेधा तत्र निर्वृत्तिराकृतिः १८ सापि द्वि
धांतरंगा च बाह्या च स्फुटमीक्ष्यते प्रतिजाति पृथग्रूपा श्रोत्रपर्पटिकादिका १९ नानात्वान्नोपदेष्टुमा
क्या नियतरूपतः नानाकृतीनींद्रियाणि यतो वाजिनरादिषु २० अभ्यंतरा तु निर्वृत्तिः समाना सर्वजातिषु
कृत्स्नं संस्थाननैयत्यमेतामेवाधिकृत्य च २१ तथाहि श्रोत्रं कदंबपुष्पाभं मांसैकगोलकात्मकं मसूरधा ३१
न्यवत्प्रायाच्चक्षुरूपोंतर्गतागती २२ अतिमुक्तकपुष्पाभं घ्राणं च काहलाकृतिः जिह्वाक्षुरप्रकारास्या

स्पर्शनं विविधाकृतिः २३ स्पर्शनेंद्रियनिर्वृत्तेर्बाह्याभ्यंतरयोर्न भित् तथैव प्रतिपन्नत्वमुक्तत्वात्पूर्वसूरि
भिः २४ बाह्यनिर्वृत्तींद्रियस्य खड्गेनोपमितस्तथा धारोपमांतर्निर्वृत्तिरत्यच्छपुद्गलात्मिका २५ तस्याः शक्ति
विशेषोयः स्वीयस्वीयार्थबोधकः उक्तं तदेवोपकरणेंद्रियं तीर्थपार्थिवैः २६ युग्मं इदमांतरनिर्वृत्तेर्नन्नि
पकरणेंद्रियं अर्थांतरं शक्तिशक्तिमतोर्भेदात्कथंचन २७ कथं विभेदश्च तस्यामांतरनिर्वृत्तौ सत्यामपि परा
हते द्रव्यादिनोपकरणेंद्रियेऽर्थज्ञानादर्शनात् २८ इति द्रव्येंद्रियं ॥ द्विधा भावेंद्रियमपि लब्धितश्चोपयोगतः य
थाश्रुतमथावधिस्वरूपमुभयोरपि २९ जंतोः श्रोत्रादिविषयतत्तदावरणस्य यः स्यात्क्षयोपशमो लब्धिरूपं
भावेंद्रियं हि तत् ३० स्वस्वलब्ध्यनुसारेण विषयेषु य आत्मनः व्यापार उपयोगाख्यं भवेद्भावेंद्रियं च तत् ३१ उप
योगेंद्रियं चैकमेकदा नाधिकं भवेत् एकदा ह्युपयोगः स्यादेक एव यदंगिनां ३२ किंच ॥ एकाद्यादिव्यवहा
रो भवेद्द्रव्येंद्रियैः किल अन्यथा बकुलः पंचाक्षः स्यात्संवोपयोगतः ३३ यदुक्तं ॥ एकाद्यादिव्यवहारो भवेद
द्रव्येंद्रियैः किल अन्यथा पंचेंदिउव्व बउलो नरो व्व सव्वोवलद्धिभावाओ तहवि न भण्णइ पंचेंदिउ त्ति दव्वेंदियाभावा
३४ रणन्नूपुरशृंगारचारुलोलेक्षणामुखात् निर्यत्सुगंधिमदिरागंडूषाद्वपुष्पति ३५ ततः पंचाप्युपयोगाज्ञा
त्वा इति अंगुलासंख्येयभाग बाहल्यानि जिनेश्वराः ऊचुः पंचापींद्रियाणि बाहल्यं स्थूलता किल ३६ नन्वंगु
लासंख्येयभाग बाहल्ये स्पर्शनेंद्रिये खड्गादिघाते देहांतर्वेदनानुभवः कथं ३७ अत्रोच्यते ॥ त्वगिंद्रियस्य वि
षयः स्पर्शाः शीतादयो यथा चक्षुषो रूपमेवं च विषयो नास्य वेदना ३८ दुःखानुभवरूपा सा त्वात्मानुभव

त्ययं सकलेनापि देहेन ज्वरादिवेदनामिव ३९ अथ शीतलपानीयपाने तद्वेद्यते कथं शीतस्पर्शोंतराकोत स्फु
तं स्यात्स्पर्शनेंद्रियं ४० अत्रोच्यते सर्वत्रांगप्रदेशांतवर्त्तित्वगिंद्रियं किल न वेद्येते इति मंतव्यं पूर्वोपि संप्रदायत
: ४१ यदाह प्रज्ञापनामूलटीकाकारः सर्वप्रदेशपर्यंतवर्त्तित्वात्ततोऽन्यतरतोपि शुषिरस्योपरि त्वगिंद्रियस्य भावा
दुपपद्यतेंतरपि शीतस्पर्शवेदनानुभवः ४२ ततोंतरेपि शुषिरपर्यंते स्तित्वगिंद्रियं अंतः संवेद्यते शैत्यं क
र्णादिशुषिरेष्विव ४३ पृथुत्वमंगुलासंख्यभागोऽतींद्रियवेदिभिः त्रयाणामपि निर्दिष्टः श्रवणघ्राणचक्षुषां
४४ अंगुलानां पृथक्त्वं च पृथुत्वं रसनेंद्रिये स्वस्वदेहप्रमाणं च भवति स्पर्शनेंद्रियं ४५ त्वगिंद्रियं विनान्येषां चतु
र्णां पृथुता भवेत् आत्मांगुलेन सोत्सेधांगुलेन स्पर्शनस्य तु ४६ ननूत्सेधांगुलेनैव मितो देहो भवेत्ततः मातुं तेने
व युज्यंते तद्गतानींद्रियाण्यपि ४७ आत्मांगुलेन चत्वार्युत्सेधाकेनैकमिंद्रियं तानि स्वं मीयमानानि कथमौचित्य
माघति ४८ तथाहि अत्रोच्यते जिह्वादीनां पृथुत्वे चेदुत्सेधेनो रसकृते त्रिगव्यूतनरादीनां न स्याद्विषयवेदि
ता ४९ तथाहि त्रिगव्यूतादिमनुजाः षट्गव्यूतादिकुंजराः स्वस्वदेहानुसारात्स्युर्विस्तीर्णरसनेंद्रियाः ५०
तेषां मांतर निर्वृत्तिरूपं चेद्रसनेंद्रियं उत्सेधांगुलपृथक्त्वमिति स्यादल्पकं हि तत् ५१ न व्याप्नुयात्सर्व जिह्वां ततो
ति वेदतोऽनया सर्वात्मना रसज्ञानव्यवहारो न सिध्यति ५२ गंधादिव्यवहारोपि भावनीयो वशानया तत
आत्मांगुलेनैव पृथुत्वं रसनादिषु ५३ जघन्यतोक्षिवर्ज्यानामंगुलासंख्येयभागतः गृह्णंति विषयं चक्षुः स्वं २२
गुलासंख्यभागतः ५४ अयं भावः शब्दार्थविच्छेदकत्वात् श्रवणादीनि गृह्णते अंगुलासंख्येयभागादपि

शब्दादिमागतं ५४ अयं भावः शब्दार्थविच्छेदकत्वात् श्रवणादीनि गृह्णते अंगुलासंख्येयभागादपि श
ब्दादिमागतं ५५ चक्षुर्ण्यमत एवैषां व्यंजनावग्रहो भवेत् दृष्टांतोत्र प्रसुप्तस्य शायितो बोधकात्मकात् ५६ य
था सरावकं नव्यं नैवैकेनादबिंदुना क्लिद्यते किंतु भूयोपि पतद्भिस्तैरनंतरं ५७ एवं सुप्तोपि नैकेन शब्देन प्रतिबु
ध्यते किंतु तैः पंचषैः कर्णे शब्दद्रव्यैर्न्नतेस्मृति ५८ एवं व्यंजनावग्रहभावना नंदीसूत्रे ॥ चक्षुस्त्वप्राप्यकारि
त्वादंगुलसंख्यभागतः अर्थं जघन्यात्पश्यति ततोप्यवक्ति रन्तु ५९ तत एवातिपार्श्वस्थं नेत्रांजनमलादिकं
चक्षुः परिच्छिनत्तीति प्रतीतं सर्वदेहिनां ६० तथा श्रुतिर्द्वादशयोजन्याः शृणोति शब्दमागतं रूपं पश्यति
चक्षुः साधिकयोजनलक्षतः ६१ आगतं नवयोजन्याः शेषाणि त्रीणि गृह्णते गंधरससमस्पर्शस्य मुत्कृष्टो विष
यो ह्ययं ६२ ननु चाप्राप्यकारीणि श्रोत्रादीनींद्रियाणि चेत् परतोप्यागतान् शब्दादीन् गृह्णंति किं न तत् ६३
द्वादशयोजनादिर्योनियमः सोपि निष्फलः गृह्णाति प्राप्तसंबंधं सर्वमित्येव योक्तिकं ६४ अत्रोच्यते ॥ शब्दा
दीनां पुद्गलाये परतः स्युः समागताः तथा मंदपरीणामास्ते जायंते स्वभावतः ६५ यथा स्वविषयं ज्ञानं नोत्पादये
त्तु मीशते स्वानावान्नास्तिशक्तिश्चेंद्रियाणां ६६ ततो विषयनियमाद्युक्तोयं दर्शितः श्रुते प्राप्यकारित्वे चतुर्णा
मिंद्रियाणां स्थितेपि हि ६७ किंच नास्ति शक्तिश्चक्षुषोपि विषयात्परतः स्थितं परिच्छेत्तुं द्रव्यजातं युक्तस्तस्या
प्यसौ ततः ६८ जिह्वाघ्राणस्पर्शनानि त्रीण्यप्येतानि गृह्णते बद्धस्पृष्टं द्रव्यजातं स्पृष्टमेवं परं श्रुतिः ६९ यदुक्तं
पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु गंधं रसं च फासं च बद्धपुट्ठं वियागरे ७० बद्धं तत्रात्मप्रदेशैरात्मीकृ

तमिहोच्यते स्पृष्टमालिंगितमात्रं तनौ यं च पुष्पिरेणुवत् ७१ बद्धमश्लीकयं प्रदेशैर्दिं पुष्ठं रेणुं च तदणं मिष्टति व
चनात् समेपि प्राप्यकारित्वे चतुर्णामपि नन्वयं को विशेषः स्पृष्टबद्धस्पृष्टार्थग्रहणात्मकः ७२ अत्रोच्यते ॥
स्पर्शगंधरसद्रव्याणां शब्दद्रव्यापेक्षया अल्पत्वाद्बादरत्वाच्चाभावकत्वाच्च सत्वरं ७३ स्पर्शनघ्राणजिह्वानां
मंदशक्तितयापि च बद्धस्पृष्टं वस्तुजातम् गृह्णत्येतानि निश्चितम् ७४ स्पर्शादिद्रव्यसंघातापेक्षया शब्दसं
हतिः बह्वी सूक्ष्मासन्नशब्दयोग्यद्रव्याधिवासिका ७५ तन्निर्वृत्तींद्रियस्यांतर्गत्वोपकरणेंद्रियं स्पृष्टापि स
द्यः कुरुते निर्व्यक्तिं मास्वगोचरां ७६ अन्येंद्रियापेक्षया च श्रवणं पटुशक्तिकं ततः स्पृष्टानेव शब्दान् गृह्णा
तीति स्फुचितं जगुः ७७ स्पृष्टार्थग्राहकत्वं यत्सरेः स्तृणापि कथ्यते तदयुक्तं तथात्वे हि दाहः स्याद्वह्न्यवेक्षणात्
७८ तथा काचपात्राद्यंतरस्थं हि दृश्यते जलं तद्भित्वांतः प्रवेशोऽस्य जलस्याचः प्रसज्यते ७९ इत्याद्यधि
कं रत्नाकरावतारिकादिभ्योऽवसेयं विस्तरभयान्नेह प्रतन्यते ॥ ॥ यच्च सिद्धांते बद्धफासं बद्धमागच्छइ इति
श्रूयते तत्र स्पर्शशब्देन इंद्रियार्थसन्निकर्ष उच्यते तथाहु ॥ सूरिए वरवुफासं बद्धमागच्छइ इत्येतदुक्तं बृहद्वृ
प्रज्ञापनीवृत्तौ अत्र च स्पर्शशब्द इंद्रियार्थसन्निकर्षपरश्चक्षुषोऽप्राप्यकारित्वेन तदसंभवादिति ॥ ॥
मेया आत्मांगुलेनैव प्राप्येंद्रियगोचराः प्रमाणांगुलमानेन स्युर्महीयांसोऽधुना हि ते ८० उत्सेधांगुलमानेन क
थं नरतत्वक्रिणः पुर्यादौ स्वांगुलमित नवद्वादशयोजने ८१ एकत्र वादिता नंता सर्वत्र श्रूयते जनैः तस्मा २२
दंगुलेनमेया विषया इतियुक्तिमत् ८२ अद्य। प्रमाणांगुलजानेकलक्षयोजनसंमिते स्वर्विमाने कथं घं

टारवः श्रूयते सुरैः ८३ नैश्चयिकांगुलैरेव विषयो घटते श्रुतेः द्वितीयोपांगटीकायामस्योत्तरमवेक्ष्यतां ८४
तथाहि तस्यां मेघौघरसित गंभीरमधुरशब्दायां योजनपरिमंडलायां सुस्वराभिधानायां घंटायां त्रिस्ताडि
तायां सत्यां यत्सूर्याभं विमानं तत्प्रासादनिष्कुटेषु ये आपतिताः शब्दवर्गणापुद्गलास्तेभ्यः समुच्छलितानि
यानि घंटाप्रतिश्रुतिशतसहस्राणि घंटाप्रतिशब्दलक्षास्तैः संकुलमपि जातमभूत् किमुक्तं भवति घंटायां
महता प्रयत्नेन ताडितायां ये विनिर्गताः शब्दपुद्गलास्तत्प्रतिघाततः सर्वासु दिक्षु विदिक्षु बहिर्भावतः
समुच्छलितैः प्रतिशब्दैः सकलमपि विमानमनेकयोजनलक्षमानमपि बधिरितमुपजायते इति एतेन द्वाद
शभ्यो योजनेभ्यः समागतः शब्दः श्रोत्रग्राह्यो भवति न परतः ततः कथमेकत्र ताडितायां घंटायां सर्वत्र तच्छ
ब्दश्रुतिरुपजायते इति यदुच्यते तदपाकृतमवसेयं सर्वत्र दिव्यानुभावतस्तथारूपप्रतिशब्दोच्छलनेन यथोक्त
दोषासंभवात् अपरं च इगवीसं खलु लक्खा चउतीसं चेव तह सहस्साइं तह पंचसया भणिया सत्तत्तीसाय अ
इरित्ता ॥२१॥३४॥५३७ इति नयणविसयमाणं पुक्खरदीवड्ढवासिमणुयाणं पुव्वेण य अवरेण य पि
हं२ होइ नायव्वं ॥ एवं च ॥ सद्यांगुलोद्भि विषयो नियमं वदतः कथं अत्रैतत्तत्त्वतामर्यमावदंत्येवं बुधैरिदं ८५ लक्ष
योजनमानाद्धि विषयः परमस्तु यः अनास्वरं पर्वतादि वस्त्वपेक्ष्य स निश्चितः ८६ स्यादनास्वरं तु सूर्यादि वस्त्वपेक्ष्याधि
कोऽपि सः व्याख्यानतो विशेषार्थप्रतिपत्तिरियं किल ८७ इदं विशेषावश्यके स्पर्शितः ॥ अनंताणुद्भवान्येतानींद्रिया
णि खिलान्यपि असंख्यप्रदेशावगाढानि निखिलानि च ८८ लोकावगाहात्कृष्णश्रोत्रघ्राणेष्वसंख्यगुणे क्रमात् त

तोऽसंख्यगुणा जिह्वासंख्यघ्नस्पर्शनं ततः ८९ स्लोकप्रदेशानयनं श्रोत्रे संख्यगुणाधिकं ततोऽसंख्यगुणं घ्राणं जिह्वा
संख्यगुणा ततः ९० ततोऽप्यसंख्यगुणितप्रदेशं स्पर्शनेंद्रियं इत्यल्पबहुत्वमेषां स्यादवगाढप्रदेशाश्रयोः ९१ रुर्यो
पांगेतु ॥ श्रोत्राक्षिनासिकं द्वेद्वे जिह्वैकास्पर्शनं तथा एवं द्रव्येंद्रियाण्यष्टौ भावेंद्रियाणि पंचच ९२ सर्वेषां सर्व
जातित्वे द्रव्यतो भावतोऽपिच अतीतानींद्रियाणि स्युरनंतान्येव देहिनां ९३ विनानादिनिगोदिभ्यो ज्ञेयमेतत्तु
कोविदैः स्वजातावेव तेषांच तान्यतीतान्यनंतशः ९४ एकादीनी संति पंचांतानि भावेंद्रियाणि च एकद्वित्रिचतु
ः पंचेंद्रियाणां स्युर्यथाक्रमं ९५ भावीनि नैव केषांचिद्व्रत्ते तेभुक्तियायिनां केषांचित्पंचषट्सप्तसंख्यासंख्यानं
तशः ९६ सिध्यतां भाविनी नवे नरनारकनाकिनां पंचाक्षतिर्यक्पृष्ट्वं बृहूणां पंचैव जघन्यतः ९७ ष
ष्ठ्यादि जन्मांतरितमुक्तीनां तु मनीषिभिः षट्सप्तप्रमुखान्येवं भाव्यानि प्रोक्तदेहिनां ९८ संख्येयानिच तानि
स्युः संख्यातभवकारिणां असंख्येयान्यनंतान्यसंख्येयानंतजन्मनां ९९ रिष्टामघामाघवती नारकाणां व यु
ग्मिनां नृणां तिरश्चां भावीनी दशतानि जघन्यतः १०० पंचाक्षेभ्योऽन्यत्रनेषामुत्पत्तिर्नाप्यनंतरे भवे मुक्तिस्तत
एषां दशोक्तानि जघन्यतः १ वाय्वग्निविकलाक्षाणां जघन्यतो भवंति षट् स्मादिजन्मांतरितेषां मुक्तिर्नानंतरं य
तः २ एकद्वित्रिचतुःपंचेंद्रियाणां स्युरनुक्रमात् द्रव्येंद्रियाणि संख्येकं द्वे चत्वारि षडष्ट च ३ भविष्यंति न केषां
चि केषांचिदष्टवा नव दशवा भन्याकेषांचिदसंख्यासंख्यान्यनंतशः ४ भावना प्राग्वत् ॥ नारकस्य नारकत्वे २४
भावतो द्रव्यतोऽपि वा तान्यतीतान्यनंतानि संति पंचाष्ट वस्फुटं ५ न विष्यंति न केषांचि केषांचित्पंचवष्टव तेया

नितान्येकवारं नरकं यास्यतोंगिनः ६ संख्येयान्येतानि संख्यवारं नरकयायिनः असंख्येयानप्यनंतान्येवं भाव्या
निधीधनैः ७ अतिक्रांतान्यनंतानि सुरत्वे नारकस्य च वर्त्तमानानि नैवस्युर्भाविनी पुनरुक्तवत् ८ विजयादिवि
मानत्वे यदि स्युर्नारकांगिनां भावनीयान्यतीतानि संति भाविनी चस्त्रयं ९ नृत्वे नृणामतीतान्यष्ट च पंचम् संति तद्भ
वमुक्तीनां तानि भावीनि नैव च १० अन्येषां तु मनुष्यत्वे भावीनि पंचवाष्टव जघन्यतोऽपि स्युर्मुक्तिर्यन्ममानुष्यमंतरा ११
अनुत्तरामराणां च स्वत्वे संत्यष्ट पंच च यदि स्युर्नत भावीनि तावंत्येव तदा खलु १२ विजयादिविमानेषु द्विरुत्पन्नो ह्यनंत
र भवे विमुक्तिमाप्नोति ततो युक्तं यथोदितं १३ अन्यजातित्वे त्वनंतान्यतीतान्यपि संति न भावीनि संख्यान्येवैषां नृ
त्ववैमानिकत्वयोः १४ तथोक्तं श्रीप्रज्ञापनावृत्तौ ॥ इह विजयादिषु उर्ध्वगतो जीवो नियमात्ततश्च्युतो न जातु चि
दपि नैरयिकादिषु पंचेंद्रियतिर्यक्पर्यवसानेषु तथा व्यंतरेषु ज्योतिष्केषु च मध्ये समागमिष्यति मनुष्येषु सौधर्मा
दिषु वागमिष्यतीति ॥ सर्वार्थसिद्ध देवत्वे सर्वार्थसिद्धनाकिनां नस्युर्नैतन्न विष्यंति संति पंचाष्ट वस्फुटं १५ तथा
मन्यगतित्वेऽतीतानि स्युरनंतशः नैव संति न विष्यंति नृगतावष्ट पंच वा १६ संज्ञिपंचेंद्रियाणां चतस्माद्विज्ञा
नसाधनं मनो नोइंद्रियं तच्च द्विविधं द्रव्यभावतः १७ तत्रच ॥ मनःपर्याप्तिनिर्माणनामकर्मोदयादिह मनोयोग्य
वर्गणा नमादाय दलिकान्यलं १८ मनस्त्वेनादितानि जंतुना द्रव्यमानसं जिनैरुक्तं तथा चाहुनंद्यध्ययनचूर्णि
कृत् १९ मणपज्जत्तिनामकम्मोदयओ जोग्गे मणोदव्वे घेत्तुं मणत्तेण परिणामियादव्वा दव्वमणो भन्नइ इति ॥
मनोद्रव्यावलंबेन मनःपरिणतिस्तु या उंतोर्भावमनस्तत्स्यात्तथोक्तं पूर्वसूरिभिः २० जीवस्स गुणपरिणामकि

रियावंतो भावमणं किं भणियं होइ मणदव्वालंबणो जीवस्स मणणवावारो भावमणो भन्नइ इति नंद्यध्ययनचूर्णौ ॥ अत एव च ॥ द्रव्यचित्तं विना भावचित्तं न स्यादसंज्ञिवत् विनापि भावचित्तं तु द्रव्यतो जिनवद्भवेत् २१ तथा च भावमनो विनापि च द्रव्यमनो भवति यथा भवस्थकेवलिनः इति प्रज्ञापनावृत्तौ लोके च वदंतः श्रोत्रघ्राणरसनत्वक्चक्षूंषि वाक्पाणिपादपायूपस्थलक्षणान्येकादशेंद्रियाणि सुश्रुतादौ उक्तानि नाममालायामपि बुद्धींद्रियस्पर्शपानादि पाण्यादि तु कर्मेंद्रियमित्यभिहितं इतींद्रियाणि ॥ संज्ञा येषां संति ते स्युः संज्ञिनोऽन्ये त्वसंज्ञिनः संज्ञिनस्ते च पंचाक्षा मनःपर्याप्तिशालिनः २२ ननु संमूर्छिमपंचाक्षां तेष्वेकेंद्रियादिषु आहाराद्याः संति संज्ञास्तन्नस्ते किं न संज्ञिनः २३ अत्रोच्यते ओघरूपादल्पत्वान्नास्ति भूमोहोदयेन च अत्यानना अव्यक्ताश्च ततो नहि संज्ञिनामता २४ निद्राव्याप्तोऽसुमान् कंडूयनादि कुरुते यथा मोहाच्छादितचैतन्यास्तथाहाराद्यमीष्वपि २५ ततश्च ॥ संज्ञासंबंधमात्रेण न संज्ञित्वमुरीकृतं न स्वेकेनैव निष्केन धनवानुच्यते जनैः २६ अताहृग्रूपयुक्कोऽपि रूपवान्नाभिधीयते धनी किंतु बहुद्रव्यैः रूपवान्रम्यते रूपतः २७ महत्या व्यक्तया कर्मक्षयोपशमजातया संज्ञया शास्त्रवेदिनां लभते संज्ञितां तथा २८ इदमर्थतो विशेषावश्यके ततश्च ॥ येषामाहारादिसंज्ञा व्यक्तचैतन्यलक्षणः कर्मक्षयोपशमजाः संज्ञिनस्तेऽपरे तथा २९ दीर्घकालिक्यादिका वा संज्ञा येषां न संति ते संज्ञिनः स्युर्यथायोगमसंज्ञिनस्तु उज्झिताः ३० इति संज्ञितादि ॥ वेदस्त्रिधा स्यात्पुंवेदः स्त्रीवेदश्च तथा परः क्लीबवेदश्च तेषां स्युर्लक्षणानि यथाक्रमं ३१ पुंसां यतो योषिदिच्छा स पुंवेदोऽभिधीयते पुरुषेच्छा यतः ३५

स्त्रीणां स स्त्रीवेद इति स्मृतः ३२ यतो द्वयाभिलाषः स्यात् क्लीबवेदः स उच्यते तृणफुंफुमवडंगज्वलनोपमिता इमे ३३ पुरुषादिलक्षणानि चैवं प्रज्ञापनावृत्तौ स्थानांगवृत्तौ योनिर्मृदुत्वमस्थैर्यं मुग्धता क्लीबता स्तनौ पुंस्कामितेति लिंगानि सप्त स्त्रीत्वे प्रचक्षते ३४ मेहनं खरता दार्ढ्यं शौडीर्यं श्मश्रु धृष्टता स्त्रीकामितेति लिंगानि सप्त पुंस्त्वे प्रचक्षते ३५ स्तनादि श्मश्रुकेशादि भावाभावसमन्वितं नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितं ३६ पुमांसोऽल्पाः स्त्रियः संख्यगुणाः अनंतकाः अनंताः क्लीबवेदाश्च सवेदा अधिकास्ततः ३७ इति वेदः ॥ जिनोक्तादविपर्यस्ता सम्यग्दृष्टिर्निगद्यते सम्यक्श्रद्धानशालिनां साप्या स्वद्वैवं जायतेंगिनां ३८ चतुर्गतिकसंसारे पर्यटंति शरीरिणः वशीकृता विपाकेन गुरुस्थितिककर्मणां ३९ अथैतेषु कश्चिदंगी कर्माणि निखिलान्यपि कुर्याद्यथाप्रवृत्ताख्यकरणेन स्वभावतः ४० पल्यासंख्यलवानेककोट्यब्धिस्थितिकानि वै परिणामविशेषोऽत्र करणं प्राणिनां मतं ४१ तत्त्रिधात्र चाद्यं स्याद्यथाप्रवृत्तनामकं अपूर्वकरणं नामानिवृत्तिकरणं तथा ४२ वक्ष्यमाणग्रंथिदेशावधि प्रथममीरितं भिद्यमानेऽस्मिन् द्वितीयं भिन्ने ग्रंथौ तृतीयकं ४३ त्रीण्यप्यमूनि भव्यानां करणानि यथोचितं संभवंत्येकमेवाद्यमभव्यानां तु संभवेत् ४४ आद्येन करणेनांगी करोति कर्मलाघवं धान्यपल्यगिरिसरिदृषदादिनिदर्शनैः ४५ यथा धान्यं भूरि भूरि कश्चिद्गृह्णाति पल्यतः क्षिपत्यत्राल्पमल्पं च कालेन कियताप्यथ ४६ धान्यपल्यः सोऽल्पधान्यशेष एवावतिष्ठते एवं बहूनि कर्माणि जरयन्नसुमानपि ४७ बध्नंश्चाल्पाल्पानि तानि कालेन कियतापि हि स्यादल्पकर्मानाभोगात्मकाद्यकरणेन सः यथाप्रवृत्तकरणं नन्वनाभोगरूपकं

भवत्यनाभोगतश्चैवंरूपं कर्मक्षयोगिनां ४९ अत्रोच्यते यथा मिथो घर्षणेन ग्रावाणोऽद्रिनदीगताः स्युश्चित्राकृतयो
ज्ञानशून्या अपि स्वभावतः ५० तथा यथाप्रवृत्तात्स्युरप्यनाभोगलक्षणात् लघुस्थितिककर्माणो जंतवोऽत्रांतरेऽथ
च ५१ रागद्वेषपरीणामरूपोस्ति ग्रंथिरुत्कटः दुर्भेदो दृढकाष्ठादिग्रंथिवद्गाढचिक्कणः ५२ मिथ्यात्वं नोकषायाश्च
कषायाश्चेति कीर्त्तितः जिनैश्चतुर्दशविधोऽभ्यंतरग्रंथिरागमे ५३ प्रागुक्तरूपस्थितिककर्माणः केपि देहिनः यथा
प्रवृत्तकरणाद् ग्रंथेरभ्यर्णमियति ५४ एतावच्च प्राप्तपूर्वैरभव्यैरप्यनंतशः न त्वीशाते ग्रंथिमेनं भेत्तुं कदापि
हि ५५ श्रुतसामायिकस्यास्य लाभः केषांचिदत्र च शेषाणां सामायिकानां लाभस्त्वेषां न संभवेत् ५६ भव्या अपि बहवस्
तेऽत्रागता रागादिनिर्जिताः केचित्कर्माणि बध्नंति प्राग्वद्दीर्घस्थितीनि ते ५७ केचित्तत्रैव तिष्ठंति तत्परीणामशा
लिनः न स्थितीः कर्मणामेते वर्द्धयंत्यल्पयंति वा ५८ चतुर्गतिभवा भव्याः संज्ञिपर्याप्तपंचखाः अपार्द्धपुद्गलपरा
वर्त्तांतर्भवमुक्तयः ५९ तीव्रधारपर्शुकल्पापूर्वाख्यकरणेन हि आविःकृत्य परं वीर्यं ग्रंथिं भिंदंति केचन ६०
यथा जनास्त्रयः केपि महापुरं यियासवः प्राप्ताः क्वचन कांतारे स्थानं चौरैर्भयंकरं ६१ तत्र द्रुतं द्रुतं यांतो ददृ
शुस्तस्करद्वयम् तद्दृष्ट्वा त्वरितं पश्चादेको भीतः पलायितः ६२ गृहीतश्चापरस्ताभ्यामन्यस्त्ववगणय्य तौ भयस्था
नमतिक्रम्य पुरं प्राप पराक्रमी ६३ दृष्टांतोपनयश्चात्र जना जीवा भवोऽटवी पंथाः कर्मस्थितिर्ग्रंथिदेशस्त्विह
भयास्पदं ६४ रागद्वेषौ तस्करौ द्वौ तद्भीतो वलितस्तु सः ग्रंथिं प्राप्यापि दुर्भावाद्यो ज्येष्ठस्थितिबंधकः ६५ चौररुद्ध २६
स्तु स यस्तादृग्रागादिबाधितः ग्रंथिं भिनत्ति यो नैव न चापि वलते ततः ६६ स त्वभीष्टपुरं प्राप्तो योऽपूर्वकर

लब्धुं रागद्वेषावनाकृत्य सम्यग्दर्शनमाप्तवान् ६७ सम्यक्त्वमौपशमिकं ग्रंथिं भित्वाश्नुते सुमान् महानंदं भटइव जि
तदुर्जयशात्रवः ६८ तच्चैवं॥ अथानिवृत्तिकरणे नातिस्वच्छाशयात्मना करोत्यंतरकरणमंतर्मुहूर्त्तसंमितं ६९
कृते च तस्मिन्मिथ्यात्वमोहस्थितिर्द्विधा भवेत् तत्राद्यांतरकरणादधस्तन्यपरोर्द्धगा ७० तत्राद्यायां स्थितौ मिथ्या
दृक्सन्मिथ्यादलवेदनात् अतीतायामथैतस्यां स्थितावंतर्मुहूर्त्ततः ७१ प्राप्नोत्यंतरकरणं तस्याद्यक्षण एव सः
सम्यक्त्वमौपशमिकमपौद्गलिकमाप्नुयात् ७२ यथा वनदवो दग्धेंधनः प्राप्यातृणं स्थलं स्वयं विध्यायति तथा मिथ्या
त्वोग्रदवानलः ७३ अवाप्यांतरकरणं क्षिप्रं विध्यायति स्वयं तदौपशमिकं नाम सम्यक्त्वं लभतेऽसुमान् ७४ इदं
चोपशमश्रेण्यामपि दर्शनसप्तके उपशांते भवेच्छ्रेणिपर्यंतावधि देहिनां ७५ तथा यथौषधविशेषेण जनैर्मदनको
द्रवाः त्रिधा क्रियंतेऽशुद्धार्द्धशुद्धशुद्धभेदतः ७६ तथाऽनेनौपशमिकसम्यक्त्वेन पटीयसा विशोध्य क्रियते त्रेधा मिथ्या
त्वमोहनीयकं ७७ उदयेऽशुद्धपुंजस्य क्षायोपशमिकं भवेत् क्षायिकं तद्भवसिद्धेस्त्रिचतुर्भवभाजोऽथवा ७९ सम्य
ग्दृष्टिव्यपदेशनिबंधनमितीरितं सम्यक्त्वं त्रिविधं शुद्धश्रद्धारूपं मनीषिभिः ८० यद्विकद्वित्रिचतुःपंचभेदं भवे
दिदं जिनोक्ततत्त्वश्रद्धानरूपमेकविधं भवेत् ८१ द्विधा नैसर्गिकं चोपदेशिकं चेति भेदतः भवेत्क्षायिकं चाव
द्यारिकं चेति वा द्विधा ८२ द्रव्यतो भावतश्चेति द्विधा चापरिकीर्त्तितं तत्र नैसर्गिकं स्वाभाविकमन्यद्गुरोर्गिरा ८३
यथा पथभ्रांतः कश्चिदुपदेशं विनाऽध्वगः मार्गं प्राप्नोति कश्चित्तु मार्गविज्ञोपदेशतः तथैव ८४ यथा वा कोद्रवा
केचित्स्युः कालपरिपाकतः स्वयं निर्दमनाः केचिद्गोमयादिप्रयत्नतः ८५ कश्चिज्ज्वरो यथा दोषपरिपाकाद्व्रजे

उ.९
पुंजस्यार्द्धविशुद्धस्योदयेन भवति मिश्रदृग् ७८ उदयेऽशुद्धपुंजस्य

स्वयं कश्चित्पुनर्भेषजादिप्रयत्नेनोपशाम्यति ८६ स्वभावादपरोपाया यथा शुद्धं न चेत्स्वयः यथोज्वलं स्यात्स्त्र
वास्त्रा भावयन्नतोपि च ८७ सम्यक्त्वमेवं केषांचिदंगिनां स्यान्निसर्गतः गुरूणामुपदेशेन केषांचित्पुनर्वेदि
दं ८८ नैश्चयिकं सम्यक्त्वं ज्ञानादिमयात्मशुद्धपरिणामः स्याद्व्यावहारिकं तद्धेतुसमुत्थं च सम्यक्त्वं ८९ जिन
वचनं तत्त्वमिति श्रद्दधतोऽकलयतश्च परमार्थं तद्व्यतो न वेत्ता वस्तुनः परिणमविशस्य ९० क्षायोपशमिकमि
तं पौद्गलिकत्वाद्व्यतस्तदुपदिष्टं आत्मपरिणामरूपेण भावः क्षायिकौपशमिकेति ९१ गीतिः ॥ कारकरोच
कदीपकभेदादेतत्त्रिधाथवा त्रिविधं स्यात्क्षायोपशमिकमुपशमजं क्षायिकं चेति ९२ जिनप्रणीताचारस्य क
रणकारकं भवेत् रुचिमात्रकरं तस्य रोचकं परिकीर्त्तितं ९३ स्वयं मिथ्यादृष्टिरपि परस्य देशनादिभिः यः सम्य
क्त्वं दीपयति सम्यक्त्वं तस्य दीपकं ९४ क्षायोपशमिकादीनां स्वरूपं दर्शितं पुरा सास्वादनयुतेनास्मिस्त्रयेतस्याच्च
तुर्विधं ९५ वेदकेनान्वितेनास्मिन्नतुष्कं पंचधापि तत् सास्वादनं च स्यादौपशमिकं वमतोंगिनः ९६ त्रयात्रमुक्त
पुंजानां मध्ये क्षीणयोर्द्वयोः शुद्धस्य पुंजस्यांत्याणु वेदने वेदकं भवेत् ९७ षट्षष्टिः साधिका ष्टीनां क्षायोपशमि
कस्थितिः उत्कृष्टा स्याज्जघन्या चांतर्मुहूर्त्तमिता मता ९८ ज्येष्ठाप्यौपशमिकस्थितिरंतर्मुहूर्त्तकी क्षायिकस्य
स्थितिः सादिरनंता वस्तुतः स्मृता ९९ साधिकाः स्युर्भवस्थत्वे सात्रयस्त्रिंशच्च यः उत्कर्षतो जघन्या च सास्वादं त
मुहूर्त्तिकी १०० सास्वादनस्यावल्यः षट् ज्येष्ठा जघन्या समयात्मिका एकः समयो वेदकस्योत्कर्षजघन्यतोपि च १० ३ग
१ उत्कर्षादौपशमिकं पंचैवं सास्वादनं च पंचशः वेदकं क्षायिकं चैकवारं जीवस्य संभवेत् २ वारान्नवेत्यसंख्य

यान् क्षायोपशमिकं पुनः अथैतेषां गुणस्थाननियमः प्रतिपाद्यते ३ सास्वादनस्यात्सम्यक्त्वं गुणस्थाने द्विती
यके तुर्यादिषु चतुर्ष्वेषु क्षायोपकं भवेत् ४ अष्टासु तुर्यादिष्वौपशमिकं परिकीर्त्तितं तुर्यादिष्वेकादशसु सम्य
क्त्वं क्षायिकं भवेत् ५ तुर्यादिषु चतुर्षु वेदकं कीर्त्तितं जिनैः गुणस्थानप्रकरणाद्विशेषः शेषतस्ततः ६ मि
थ्यादृष्टिर्विपर्यस्तो जिनोक्तवस्तुतत्त्वतः सास्वादिमिथ्यात्विनां तच्च मिथ्यात्वं पंचधा मतं ७ आभिग्रहिकमाद्यं स्या
दनाभिग्रहिकं परं तृतीयं किल मिथ्यात्वमुक्तमाभिनिवेशिकं ८ तुर्यं सांशयिकाख्यं स्यादनाभोगिकमंतिमं
आभिग्रहेण निर्वृत्तं तत्राभिग्रहिकं स्मृतं ९ नानाकुदर्शनेष्वेकमस्मात्स्वाभीष्टदर्शनं इदमेव शुभं नान्यदि
त्यं वं प्रतिपद्यते १० समस्तं गीदर्शनानि यद्वशादखिलान्यपि शुभानि माध्यस्थ्याद्वदेतदनाभिग्रहिकं हि तत् ११
यतो गोष्ठामाहिलादिवदात्मीयकुदर्शने भवत्यभिनिवेशस्तदुक्तमाभिनिवेशिकं १२ यतो जिनप्रणीतेषु दे
शतः सर्वतोपि वा पदार्थेषु संशयः स्यात्तत्सांशयिकमीरितं १३ अनाभोगेन निर्वृत्तमनाभोगिकसंज्ञिकं यस्मा
देकेंद्रियादीनां मिथ्यात्वं पंचमं तु तत् १४ यस्य जिनोक्ततत्त्वेषु न रागो नापि मत्सरः सम्यग्मिथ्यात्वसंज्ञा सा
मिश्रदृष्टिः प्रकीर्त्तिता १५ यथैष्टिवनरानालिकेरद्वीपनिवासिनः जिनोक्तेषु मिश्रदृशो न द्विष्टा नापिरा
गिणः १६ यदाहुः कर्मग्रंथकाराः ॥ जिय अजिय पुण्णपावासवसंवरबंधमुक्खनिज्जरणा जेणं सद्दहइ स
म्मं खइगाइं बहुभेयं १७ मीसान रागदोसो जिणधम्मे अंतमुहु जहा अन्ने नालियरदीवमणुणो मिच्छं जि
णधम्मविवरीयं १८ सम्यग्मिथ्यादृशः स्तोकास्तेभ्योऽनंतगुणाधिकाः सम्यग्दृशस्ततो मिथ्यादृशोऽनंतगुणाधिका १९

इतिदृष्टिः मतिश्रुतावधिमनःपर्यायाख्यकेवलं ज्ञानानि पंच तत्राद्यमष्टाविंशतिधास्मृतं २० तथाहि अवग्रहेहावा
यारव्या धारणा चेति हीधियः मतिज्ञानस्य चत्वारो मूलभेदाः प्रकीर्तिताः २१ शब्दादीनां पदार्थानां प्रथमग्रहणं हि य
त् अवग्रहः स्यात्स द्वेधा व्यंजनार्थविभेदतः २२ व्यज्यते येन सद्भावादीपेनेव घटादयः व्यंजनं ज्ञानजनकं तच्चोपक
रणेंद्रियं २३ शब्दादिभावमापन्नो द्रव्यसंघात एव वा व्यज्यते यत्ततो व्यंजनं तदिति व्युत्पत्त्यपेक्षया २४ ततश्च व्यंजनैर्व्यं
जनानां यः संबंधः प्रथमः स हि व्यंजनावग्रहोस्पष्टतरावबोधलक्षणः २५ आवल्यसंख्येयभागो व्यंजनावग्रहे भवे
त् कालमानं लघु ज्येष्ठमानप्राणपृथक्त्वकं २६ स चतुर्धा श्रोत्रजिह्वाघ्राणस्पर्शनसंभवः अप्राप्यकारिभावात्स्यान्न
चक्षुर्मनसोरसौ २७ शब्दादेरर्थः परिच्छेदो मनाक्स्पष्टतरो भवेत् किंचिदित्यात्मकः सोयमर्थावग्रह उच्यते २८ का
लतोर्थावग्रहस्तु स्यादेकसमयात्मकः निश्चयाद्व्यवहारात्तु समयादांतमुर्हूर्तिकः २९ तस्यैवार्थावग्रहीतस्य धर्मान्वे
षणरूपिका ईहा भवेत्कालमानमस्याश्चांतमुर्हूर्तकं ३० निर्णीतार्थस्य मनसा धरणं धारणा स्मृता कालसंख्येतासं
ख्यस्त्वस्या मानमवेक्ष्यते ३१ बाल्ये दृष्टं स्मरत्येव पर्यंते संख्यजीवितः ततः स्याद्धारणामानमसंख्यकालसंमितं ३२ यथा
हि सुप्ते पूर्वं श्रोत्रेण शब्दसंहतिः ततश्च किंचिदश्रौषमित्यर्थावग्रहो भवेत् ३३ ततस्त्वाद्दिशब्दनिष्ठं माधुर्यादि
विचिंतयेत् इयमीहा ततोवायो निश्चयात्मा धृतिस्ततः ३४ एवं गंधरसस्पर्शेष्वपि भाव्या मनीषिभिः घ्राणजिह्वास्प
र्शनानां व्यंजनावग्रहादयः ३५ व्यंजनावग्रहाभावाच्चक्षुर्मानसयोः पुनः चत्वारोर्थावग्रहाद्या धारणांता भवंति हि ३८
३६ यथा प्रथमतो दृष्टे वस्तुगोचरमागते किंचिदेतदिति ज्ञानं स्यादर्थावग्रहोस्फुटं ३७ ततस्तत्तद्धर्माणां समी

क्षेहा प्रजायते निश्चयस्तस्तरे वाय मित्यवायस्ततो भवेत् ३८ ततस्तथा निश्चितस्य धारणं धारणा भवेत् भाव्यं ते मनसो
प्येवमथार्थावग्रहादयः ३९ यथा हि विस्मृतं वस्तु पूर्वं किंचिदिति स्मरेत् ततश्च तत्तद्धर्माः स्मर्यंते लीनचेतसा ४०
ततश्च तत्तद्धर्माणां स्मरणात्तद्विनिश्चयः ततः स्मृतानिश्चितस्य पुनस्तस्यैव धारणं ४१ एवमर्थावग्रहेहा अवायधार
णाः इह सुश्रुतविंशतिः षड्भिर्हि ताइंद्रियमानसैः ४२ व्यंजनावग्रहैः पूर्वोदितैश्चतुर्भिरन्विताः स्युस्ते ष्टाविंशतिर्भेदा
मतिज्ञानस्य निश्चिताः ४३ भगवतीवृत्तौ तु घोटाश्रोत्रादिभेदेनावायश्च धारणापि च इत्येवं द्वादशविधं मतिज्ञानमुदा
हृतं ४४ द्वादशेहावग्रहयोश्चत्वारो व्यंजनस्य च उक्ता भेदाः श्रोत्रतश्चैतत्रनिवच्चेत्यादिके ४५ यदाह भाष्यकारः
नाणमवायधिईओ दंसणमिट्ठं जहोग्गहेहाओ नन्वष्टाविंशतिविधं मतिज्ञानं यदागमे जेगीयते तत्कथमेवमुक्तं वि
कल्प्यते ४६ अत्रोच्यते मतिज्ञानवक्षराद्विदर्शनानां मिथो भिदं अविवक्षित्वैवमतिमष्टाविंशतिधाविदुः ४७ किंच
एकैकश्च प्रकारोयं द्वादशधा विनिर्दिश्यते ज्ञानस्यास्य ततो भेदाः स्युः षट्त्रिंशत्रिशतत्रयं ४८ तद्यथैवं बहु बहु बहु
विधान्यक्षिप्रारव्यनिश्रितरतदन्याः संदिग्धासंदिग्ध ध्रुवाध्रुवारव्या मतेर्भेदा ४९ तथाहि आस्फालिते तूर्यवृंदे
कश्चिच्छब्दकदंबकं भेरीशब्दा इयंतोत्र तावंतः शंखनिःस्वनाः ५० इत्थं पृथक् पृथक् कृत्वा जानात्यबहु वेदथा अथ
तोन्यस्तूर्यशब्दस्य तत्र बहु विद्भवेत् ५१ माधुर्यादिविविधबहुधर्मयुतं वक्ति यः स बहुविधवित् अबहुविध
वित्तु शब्दं वेत्येकद्व्यादिधर्मयुतं ५२ वेत्ति कश्चिदचिरेण चिरेणान्यो विमृश्य च क्षिप्राक्षिप्रग्राहिणौ तौ निर्दिष्टौ
यथाक्रमं ५३ लिंगापेक्षं वेत्ति कश्चित्तु जने ध्वजादिना यं सनं वेत्ति श्रितग्राही परो लिंगानपेक्षया ५४ निःसंशयं यस्तु

वेत्तिसोऽसंदिग्धविद्यादितः ससंज्ञायंयस्तुवेत्ति संदिग्धोगाढकोदिसः ५४ ज्ञातेयएकदानूघोनोपदेशमपेक्ष्य
तेंकवयाहीनचेदेषतदन्योऽकचविद्धवेत् ५६ नन्वेकसमयस्थायीप्रोक्तः प्राच्योरवग्रहः संभवेत्तिकथंतत्रप्र
कारावक्तादयः ५७ सत्यमेतन्मतः किंतुद्विविधोऽवग्रहः श्रुते निश्चयात्क्षणिकोव्यावहारिकश्चांतर्क्षणः
५८ अपेक्ष्यावग्रहंमत्वा ततश्चव्यावहारिकं भेदाग्रहोक्तावज्ञातादयोनैश्चयिकेतुन ५९ तथोक्तं तत्त्वार्थवृत्तौ न
त्वेवावग्रह एकसामायिकः शास्त्रे निरूपितो नचैकस्मिन्समयेवैवेकोवग्रह एवंविधोयुक्तोऽल्पकालत्वादित्युच्य
ते सत्यमेवमेतत् किंतु अवग्रहोद्विधा नैश्चयिकोव्यावहारिकश्च तत्र नैश्चयिकोनामसामान्यपरिछेदः सचैकसा
मयिकः शास्त्रे निर्दिष्टस्ततो नैश्चयिकादनंतरमीहेवमात्मिकाप्रवर्त्तते किमेषस्पर्शोन्यतास्पर्शइति तदनंतरो
ऽपायः स्पर्शोयमिति अयं चापायोऽवग्रहइत्युपचर्यते आगामिनोभेदानंगीकृत्ययस्मादेतेनसामान्यमवच्छिद्यते
यतः पुनरेतस्मादीहाप्रवर्तिष्यते कस्यायंस्पर्शस्ततश्चापायोनविष्यत्स्पर्शायमिति अयमपिचापायः पुनरवग्रह
इत्युपचर्यते अनंतरवर्तिष्यते केस्याय अनंतरवर्तिनीमीहामपायं वाश्रित्य एवं यावदस्यांतेनिश्चयस्तत्रजातो
नवतियत्रापरं विशेषंनाकांक्षतीत्यर्थः अपायएव नवतिनतत्रोपचारइति अतोयएषऔपचारिकोवग्रहस्तमं
गीकृत्यबह्वबह्वादयःअवग्रहास्तानीत्यतदुच्यते नत्वेकसमयवर्तिनं नैश्चयिकमित्येवं सर्वत्रौपचारिकाश्रयणंव्याख्येय तुले
मिति औत्पत्तिकीवैनयिकीकार्मिकीपारिणामिकी आभिः सहाभिनेदाः स्युश्चत्वारिंशाशतत्रयं ६० नदृष्टोन
श्रुतश्चप्राग्मनसापिनचिंतितः यथार्थस्तत्क्षणादेवययार्थोगृह्यतेधिया ६१ लोकद्वयाविरुद्धासाफलेनाव्य

भिचारिणी बुद्धिरौत्पत्तिकीनाम निर्दिष्टारोहकादिवत् ६२ गुरूणांविनयात्साप्ताफलदात्रपरत्रच धर्मार्थका
मशास्त्रार्थपटुर्वैनयिकीमतिः ६३ नैमित्तिकस्यशिष्येणविनयेनयथोदितः स्थविरायाघटकूपेसद्यः सुतस
मागमः ६४ शिल्पमाचार्यसंदेशात्स्यात्कर्मचस्वतः नित्यव्यापारशिल्पं कदाचित्कंतुकर्मवा ६५ याकर्मा
भिनिवेशोत्थलब्धतत्परमार्थिका कर्मन्यासविचारान्यांविस्तीर्णसुप्रशःफला ६६ तत्तत्कर्मविशेषेषुसमर्थाका
मिकीमतिः केषुचिद्दृश्यतेसाच चित्रकारादिकारुषु ६७ सुदीर्घकालेनयः पूर्वापरार्थालोचनादिजः आत्मधर्मः
सोत्रपरिणामस्तज्जन्यावाबुद्धया ६८ अनुमानहेतुमात्रंदृष्टांतैः साध्यसाधिका वयोविपाकेनपुष्टीभूताभ्युदयमोक्ष
जा ६९ अनयादेरिवश्रेयाद्यर्थासापारिणामिकी आभ्योधिकापंचमीतुनार्हतोप्युपलभ्यते ७० यद्वाद्वैधमतिर्लो
के प्रथमाश्रुतनिश्रिता शास्त्रसंस्कृतबुद्धेस्सा शास्त्रार्थालोचनोद्भवा ७१ सर्वथाशास्त्रसंस्पर्शरहितस्ययथा
विधात्क्षयोपशमतोजातानवेदश्रुतनिश्रिता ७२ सर्वाप्यंतरनवत्यस्मिनूमतिरश्रुतनिश्रिता यथोक्तधीचतु
ष्कवत्पंचमानास्तिसंभवः ७३ इदमर्थतोनंदीसूत्रवृत्तिस्थानांगसूत्रवृत्त्यादिषु जातिस्मृतिरप्यतीतसंख्यातनवा
वबोधिकामतिज्ञानस्यैवभेदः स्मृतिरूपतयाकिल ७४ यदाह्याचारांगटीकायांजातिस्मरणंचाभिनिबोधकविशेष
इति इतिमतिज्ञानं श्रूयतेतच्छ्रुतंशब्दः सश्रुतज्ञानमुच्यते भावश्रुतस्यहेतुत्वाद्धेतौकार्योपचारतः ७५ श्रुता
दुत्पद्यतज्ज्ञानं श्रुतज्ञानंतदुच्यते श्रुतग्रंथानुसारीयोबोधः श्रोत्रमनःकृतः ७६ ननुश्रुतज्ञानमपिश्रोत्रेंद्रिय
निमित्तकं तन्मतिज्ञानतःकोस्यभेदोयत्कथ्यतेपृथक् ७७ अत्रोच्यते वर्त्तमानार्थविषयंमतिज्ञानंपरंततः।

रीयो विषयं त्रैकालिकार्थविषयं श्रुतं ७८ विस्पष्टं चक्षुर्वद्धितानेकसूक्ष्मार्थदर्शनात् छद्मस्थोपि श्रुतबलादुच्यते
श्रुतकेवली ७९ तदुक्तं नयणं अणइसेसं वियाणइ एस छउमत्थो त्ति जीवस्य ज्ञस्वभावत्वान्मतिज्ञानं हि श्रुतं
संसारे भ्रमतोऽनादौ पतितं न कदापि यत् ८० अक्षरस्यानंतभागो नित्योद्घाटित एव हि निगोदिनामपि भवेदिति तत्
रिणामिकं ८१ यदागमः सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ जइ सो वि आवरिज्जा
जीवो अजीवत्तणं पाविज्जा इति ८२ श्रुतज्ञानं पुनर्नैवं मतिवज्जीवस्य सर्वदा आप्तोपदेशापेक्षं यस्मादेतन्मतिपूर्वकं
८३ मतिज्ञानं स्मरणादीन्द्रियानिन्द्रियहेतुकं श्रुतं तु स्यात्त्वशिक्षितोपि पदानुसारिणामिव ८४ इत्याद्यधिकं त[illegible]
श्यादिभ्योऽवसेयं ॥ चतुर्दशविधं तच्च यद्वा विंशतिधा भवेत् चतुर्दशविधत्वं तु तत्रैवं परिभाष्यते ८५ अक्षरश्रुत
मित्येकं स्याद्द्वितीयमनक्षरं तार्त्तीयीकं संज्ञिश्रुतं तुर्यं श्रुतमसंज्ञिनः ८६ सम्यक्श्रुतं पंचमं स्यात् षष्ठं मिथ्याश्रुतं
भवेत् स्यादिश्रुतं सप्तमं स्यादनादिश्रुतमष्टमं ८७ सांतश्रुतं तु नवममनंतं दशमं श्रुतं एकादशं गमरूपमगमं द्वादशं पु
नः ८८ त्रयोदशं चांगरूपमंगबाह्यं चतुर्दशं प्रायो व्यक्ता अमी भेदास्तथापि किंचिदुच्यते ८९ तत्राक्षरं त्रिधा संज्ञा व्यंज
नलब्धिभेदतः तत्र संज्ञाक्षरमेता लिप्योऽष्टादशोदिताः ९० तथा हि हंसलिवी १ भूअलिवी २ जक्खा ३ रक्खसीय ४
बोधव्वा उड्डी ५ जवणी ६ तुरुक्की ७ कीडी ८ दविडीय ९ सिंधविया १० ९१ मालविणी ११ नडी १२ नागरि १३ लाडलिवि
१४ पारसीय १५ बोधव्वा तह अनिमित्तीयलिवी १६ चाणक्की १७ मूलदेवीय १८ ९२ अकारादिहकारांतं भवति व्यंज ४८
नाक्षरं अज्ञानात्मकमप्येतद्यस्माच्छ्रुतकारणं ९३ ततः श्रुतज्ञानतया प्रज्ञप्तं परमर्षिभिः लब्ध्यक्षरं त्वक्षरोप

MEMORIAL

लब्धिरर्थविबोधिका ९४ तैस्तैरभिलाप्यभावानां प्रतिपादकं अक्षरश्रुतमुद्दिष्टमनक्षरश्रुतं परं ९५ कासि
तक्ष्वेडिताद्यं यन्मोमारूयतिवक्तिका इत्याद्यभ्यासायद्दितस्माच्छ्रुतमनक्षरं ९६ स्याद्दीर्घकालिकी संज्ञा येषां ते संज्ञि
नो मताः श्रुतं संज्ञिश्रुतं तेषां परं त्वसंज्ञिकश्रुतं ९७ सम्यक्श्रुतं जिनप्रोक्तं भवेदावश्यकादिकं तथा मिथ्याश्रुतमपि
स्यात्सम्यग्दृक्परिग्रहात् ९८ आवश्यकं तदपरमिति सम्यक्श्रुतं द्विधा षोढा चावश्यकं तत्र सामायिकादिभेदतः ९९
तथा हि सामाइयं १ चउवीसत्थो २ वंदणयं ३ पडिक्कमणं ४ काउस्सग्गो ५ पच्चक्खाणं ६ चेति ॥ आवश्यकेतरच्चांगा
नंगात्मकतया द्विधा अंगात्मकं द्वादशधा दृष्टिवादश्चांगात्मकं भवेत् १०० आचारांग १ सूत्रकृतं २ स्थानांगं ३ समवाय
कम् ४ पंचमं भगवत्यंगं ५ ज्ञाताधर्मकथापि च ६ १ उपासकांत ७ कृद ८ नुत्तरोपपातिका ९ दशाः प्रश्नव्याक
रणं चैव १० विपाकश्रुतमेव च ११ २ परिकर्म १ सूत्र २ पूर्वानुयोग ३ पूर्वगतः ४ चूलिका ५ पंच स्युर्दृष्टिवादभेदाः
पूर्वाणि चतुर्दशापि १४ पूर्वगते ३ उत्पादपूर्व १ मथाग्रायणीय २ मथ वीर्यतः प्रवादं ३ स्यात् अस्ति ४ ज्ञाना ५ त्स
त्याद् ६ अथात्मनः ७ कर्मण ८ श्च परं ४ प्रत्याख्यानं ९ विद्याप्रवाद १० कल्याणनामधेयं च ११ प्राणवायं च १२ क्रियाविशा
ल १३ मथ लोकबिंदुसारमिति १४ ५ दृष्टिवादं पंचधाय मंगं द्वादशमुच्यते उपांगमूलसूत्रादि स्यादनंतात्मकं च तत् ६
किंच व्याकर्णछंदोलंकृतिकाव्य नाट्यतर्कगणितादिसम्यक्दृष्टिपरिग्रहपूतं सम्यक्श्रुतं जयति ७ मिथ्याश्रुतं तु
मिथ्यात्विलोकैः स्वमतकल्पितं रामायणभारतादि वेदवेदांगकादि च ८ उक्तं च भाष्यकृता पूर्वांतर्गतेयं गाथा
ऋग् १ यजुः २ सामा ३ ऽथर्वाणो ४ वेदा अंगानि षट् ६ पुनः शिक्षा १ कल्पो २ व्याकरणं ३ छंदो ४ ज्योतिष निरुक्तः

६ १० ततश्च षडंगी वेदाश्चत्वारो मीमांसान्वीक्षिकी तथा धर्मशास्त्रं पुराणं च विद्या एताश्चतुर्दश ११ तथा। आ
युर्वेदो १ धनुर्वेदो २ गांधर्वं ३ चार्थशास्त्रकं ४ चतुर्भिरेतैः संयुक्ताः स्युरष्टादश ता पुनः १२ अपूर्णदशपूर्वी
तमपि सम्यग्श्रुतं भवेत् मिथ्यात्विभिः संगृहीतं मिथ्याश्रुतं विपर्ययात् १३ द्रव्य १ क्षेत्र २ काल ३ भावैः ४ सा
द्यंतं भवति श्रुतं अनाद्यपर्यवसितं भूयस्तान् प्रतीत्य च १४ साद्यंतं क्षेत्रतोऽत्रैव नरतैरवताश्रयात् अनाद्यपर्य
वसितं विदेहापेक्षया पुनः १५ कालतश्चावसर्पिण्युत्सर्पिण्योः सादिसांतिकं महाविदेहकालस्यापेक्षयाद्यंतवर्जि
तं १६ भवसिद्धिकमाश्रित्य साद्यंतं भावतो भवेत् क्षायोपशमिकज्ञाननाशो यदस्य केवलक्षणे १७ नठंमि छाउमथिए
नाणे इति वचनात् अनाद्यनंतं चाभव्यमाश्रित्य श्रुतमुच्यते श्रुतज्ञानश्रुताज्ञानभेदस्यात्राविवक्षणात् १८ क्षा
योपशमिकभावे यद्वानाद्यंतमीरितं एवं साद्यनादिसांतमनंतं श्रुतमूह्यतां १९ गमाः सदृशपाठाः स्युर्यत्र तद्गमि
कं श्रुतं तच्चाद्यो दृष्टिवादे स्यादन्यच्चागमिकं भवेत् २० अंगाविष्टं द्वादशांगान्यंमदावश्यकादिकं इत्थं प्ररूपिताः
प्राज्ञैः श्रुतभेदाश्चतुर्दश २१ ये भेदा विंशतिस्तेऽपि कथ्यंते लेशमात्रतः न ग्रंथविस्तरभया दिदसम्यक्प्रपंचि
ताः २२ तथाहि पद्यय १ अक्खर २ पय ३ संघाया ४ पडिवत्तीय ५ तहय अणुओग ६ पाहुडपाहुड ७ वत्थु ८
पुव्वाय ९ ससमासा २३ तत्र च अविभागपरिच्छेदो यो ज्ञानस्य प्रकल्पितः स पर्यायो य आद्यस्तस्यासौ पर्यायस
मासमासकः २४ लब्ध्यपर्याप्तस्य सूक्ष्मनिगोदस्य शरीरिणः यदाद्यक्षणजातस्य श्रुतं सर्वजघन्यतः २५ तस्माद ४१
न्यत्र यो जीवांतरे ज्ञानस्य वर्द्धते अविभागपरिच्छेदः स पर्याय इति स्मृतः २६ ये विभागपरिच्छेदा आद्ययोरन्येषु

द्वेष्विषु वृद्धिंगतास्ते पर्यायसमास इति कीर्त्तितः २७ तथो क्रमाचारांगवृत्तौ। सर्वनिकृष्टो जीवस्य दृष्ट उपयोग ए
षवीरेण सूक्ष्मनिगोदापर्याप्तानां स च भवति विज्ञेयः २८ तस्मात्प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानामलब्धि
निमित्तैः करणैः कायेंद्रियवाग्मनोदृग्भिः २९ मध्ये च अक्षराणां स्याद्यदनंतरदक्षरं तदक्षरं तत्संदेहो ऽक्षरस
मास इष्यते ३० पदानां यादृशानां स्यादाचारांगादिषु ध्रुवं अष्टादशसहस्रादि प्रमाणं तत्पदं भवेत् ३१ आदीनित
त्समासः स्यादेवं सर्वत्र भाव्यतां संघातप्रतिपत्त्यादौ समासो ह्यनया दिशा ३२ गतींद्रियादि द्वाराणां ग्राषष्टेरेकदेश
कः गत्यादिरेकदेशोऽस्याः स्वर्गतिस्तत्र मार्गणा ३३ जीवादेः क्रियते सोऽयं संघात इति कीर्त्यते गत्यादि आद्य
वयवमार्गणात्तत्समासकः ३४ संपूर्णगत्यादिद्वारे जीवादेर्मार्गणा तु या प्रतिपत्तिरियं जीवा निगमे दृश्यतेऽधुना
३५ सत्पदप्ररूपणाद्यनुयोगद्वारमुच्यते प्राभृतांतः स्यादधिकारः प्राभृतप्राभृतं भवेत् ३६ वस्त्वंतवर्त्यधिकारः
प्राभृतं परिकीर्त्तितं पूर्वांतवर्त्यधिकारो वस्तुनाम्ना प्रचक्ष्यते ३७ पूर्वमुत्पादपूर्वादि ससमासाः समेऽप्यमी श्रुत
स्य विंशतिर्भेदा इत्थं संक्षेपतः स्मृताः ३८ इति श्रुतज्ञानं अवधानं स्यादवधिः साक्षादर्थविनिश्चयः अवशब्दो
व्ययं यद्वा सोऽधः शब्दार्थवाचकः ३९ अधोऽधो विस्तृतं वस्तु धीयते परिबुध्यते अनेनेत्यवधिर्यद्वा मर्यादा वाच
कोऽवधिः ४० मर्यादा रूपिद्रव्येषु प्रवृत्तिर्न त्वरूपिषु तयोपलक्षितं ज्ञानमवधिज्ञानमुच्यते ४१ अनुगाम्यननु
गामी वर्द्धमानस्तथा क्षयी प्रतिपात्यप्रतिपाती त्यवधिः षड्विधो भवेत् ४२ यद्विदेशांतरगतमप्यन्वेति स्वधा
रणं अनुगाम्यवधिज्ञानं तद्विज्ञेयं स्वनेत्रवत् ४३ यत्र क्षेत्रे समुत्पन्नं यत्तत्रैवावबोधकृत् द्वितीयमवधिज्ञानं त

शंखवलितदीपवत् ४४ यदंगुलस्यासंख्येयभागादिविषयं पुरा समुत्पद्यानुविषयं विस्तरेण विवर्द्धते ४५ अलोके
लोकमात्राणि यावत्खंडान्यसंख्यशः स्यास्तकाशयितुं शक्तं वर्द्धमानं तदीरितं ४६ अप्रशस्ताध्यवसायात् ही
यते यस्तु तिद्धणं आऊस्तदवधिज्ञानं हीयमानं मुनीश्वराः ४७ स्याद्वर्द्धमानं शुष्कोपचीयमाने धनाग्निवत् ही
यमानं परिमिताद्वग्निं धनवत्किंचित् ४८ योजनानां सहस्राणि संख्येयान्यप्यसंख्यशः यावल्लोकमपि दृष्ट्वा पत
ति प्रतिपातितत् ४९ प्रमादेन पतत्येतद्ध्वांतरांश्रयेण वा यथाश्रुतं स्वरूपं च वक्ष्येथाप्रतिपातिनः ५० य
स्य देशमलोकस्य दृष्टमेकमपि द्रुतं स्यात् अप्रतिपात्येव केवलं तदनंतरं ५१ हीयमानप्रतिपातिनोश्चायं
विशेषः प्रतिपाति हि निर्मूलं विध्यायत्येकदेलया ५२ हीयमानं पुनर्ज्ञाप्तिमुपयाति शनैः शनैः ५३ इत्यव
धिज्ञानं ॥ मनस्त्वेन परिणतद्रव्याणां यस्तु पर्यवः परिच्छेदस्स हि मनःपर्यवज्ञानमुच्यते ५३ यद्वा मनोद्रव्य
स्य पर्याया नानावस्थात्मको हि ये तेषां ज्ञानं खलु मनःपर्यायज्ञानमुच्यते ५४ स्यादृजुधीविपुलधीलक्षणस्वा
मिभेदतः तद्विभेदं संयतस्याप्रमत्तस्यर्द्धिशालिनः ५५ अनेनः चिंतितः कुंभ इति सामान्यग्राहिणी मनोद्र
व्यपरिच्छित्तिर्यस्यासहजुधीः श्रुतः ५६ अनेन चिंतितः कुंभः ससौवर्णः समाधुरः इयत्प्रमाणोऽद्यतनः पीत
वर्णः सदाकृतिः ५७ एवं विशेषविज्ञाने मतिर्यस्य पटीयसी ज्ञेयोयं विपुलमतिर्मनःपर्ययलब्धिमान् ५८
इति मनःपर्ययज्ञानं ॥ केवलं यन्मतिज्ञानाद्यन्यज्ञानानपेक्षणात् ज्ञेयानंत्यादनंतं वा शुद्धं वावरणक्षयात् ४२
५९ सकलं वादित एव निःशेषावरणक्षयात् अनन्यसदृशत्वेनाथवासाधारणं भवेत् ६० भूतभाविभव

द्भावस्वरूपोद्दीपकं स्वतः तद्ज्ञानं केवलज्ञानं केवलज्ञानिनिर्मितं ६१ इति केवलज्ञानं ॥ कुत्सितं ज्ञानमज्ञानं कु
त्सार्थस्य नत्रोन्वयात् कुत्सितत्वं तु मिथ्यात्वयोगात्त्रिविधं पुनः ६२ मत्यज्ञानं श्रुताज्ञानं विभंगज्ञानमित्यपि अ
थ स्वरूपमेतेषां दर्शयामि यथाश्रुतं ६३ मतिज्ञानश्रुतज्ञाने एव मिथ्यात्वयोगतः अज्ञानसंज्ञो भजतो नीचसंगा
दिवोत्तमः ६४ तथोक्तं ॥ अविसेसिया मइच्चिय सम्मद्दिट्ठिस्स सा मइन्नाणं मइअन्नाणं मिच्छादिट्ठिस्स सुअंपि एमे
व ६५ भंगा विकल्पा विरुद्धा सुस्तेत्रेति विभंगकं विरूपो वावधेर्भंगो भेदो यं तद्विभंगकं ६६ एतच्च ग्रामनगरसन्नि
वेशादिसंस्थितं समुद्रद्वीपवृक्षादिनानासंस्थानसंस्थितं ६७ अष्टानामप्यथैतेषां विषयो वर्ण्यतेऽधुना द्रव्यक्षेत्र
कालभावैर्व्यक्तस्तत्र कथ्यते ६८ सामान्यतो मतिज्ञानी सर्वद्रव्याणि बुध्यते विशेषतोऽपि देशादिभेदैस्तान्वगा
छति ६९ किंतु जानातिनिःशेषविशेषापेक्षया स्फुटान् एषधर्मास्तिकायादीन्सर्वेपसर्वात्मनातु न ७० योग्यदे
शस्थितान्सच्छदीस्तु जानाति पश्यति श्रुतभावितया बुध्या सर्वद्रव्याणि वेत्ति वा ७१ लोकालोकौ क्षेत्रतश्च का
लतस्त्रिविधं च तं सर्वाद्धा वा भावतस्तु भावानौदयिकादिकान् ७२ अत्र च भाष्यकारः ॥ आएसो त्तिपगारो ओघा
देसेण सव्वदव्वाइं धम्मत्थिकाइयाइं जाणइ न उ सव्वभावेणं ७३ खेत्तं लोगालोगं कालं सव्वद्धमहव तिविहं ति पं
चोदइयाइए भावे जं नेयमेवइयं ७४ आएसो त्ति वसोत्तं सुत्तं वलद्धसुतस्स मइनाणं पसरइ तब्भावणया वि
णावि सुत्ताणुसारेणं ७५ इति मतिज्ञानविषयः ॥ भावश्रुतोपयुक्तः सन् जानाति श्रुतकेवली दर्शपूर्वादि
भृद्ध्याणि निलाप्यानि केवलं ७६ यद्यप्यभिलाप्यानां नाशोऽस्ति श्रुतेन याप्येते सर्वेस्तु श्रुतविषयः प्रसंगतो

ऽनुप्रसंगाच्च ७७ यदाऽऽह ॥ पन्नवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं पन्नवणिज्जाणं पुण अणंतभागो सुअ
निबद्धो ७८ तथा श्रुतानुवर्त्तिमनसा ह्यवस्तु दर्शनात्मना इत्यपूर्वादिन्द्रव्याण्यभिलाप्याणि पश्यति ७९ तद्वारतस्तु
नजननाविशेषाध्यविशेषतः इष्टवस्तु पश्यतीत्यत्र तत्त्वमेतन्निरूपितं ८० सर्वात्मनादर्शनेऽपि पश्यत्येव कथंचन श्रे
वेयकानुत्तरादि विमानालेख्यनिर्मितेः ८१ नो चेत्स्यात्सर्वथादृष्टस्यालेख्यकरणं कुतः तुर्योपांगे श्रुतज्ञानपश्यत्ता
पि प्ररूपिता ८२ क्षेत्रतः कालतोऽप्येवं भावतो वेत्ति सश्रुतः भावानौदयिकादींस्त्वापर्यायांश्चाभिलाप्यगान् ८३ इ
ति श्रुतज्ञानविषयः द्रव्यतोऽथावधिज्ञानी रूपिद्रव्याणि पश्यति भाषातैजसयोरंतःस्थानि तानि जघन्यतः ८४ उत्कृ
ष्टतस्तु सर्वाणि सूक्ष्माणि बादराणि विशेषाकारतो वेत्ति ज्ञानत्वादस्य निश्चितं ८५ क्षेत्रतोऽथावधिज्ञानी जघन्यात्
त्रिपश्यति उत्सर्पिण्यवसर्पिण्य असंख्येयतमं भागं मंगुलस्योपयोगतः ८६ अलोके लोकमात्राणि पश्येत्खंडा
न्यसंख्यशः उत्कर्षतोऽवधिज्ञानविषयः शास्त्र्यपेक्षया ८७ असंख्यभागमावल्या जघन्यादेष पश्यति उत्सर्पिण्यव
सर्पिण्युत्कर्षेणत्वसंख्यकाः ८८ अतीताश्चापि तावत्यस्तावतोऽनागता अपि तावत्कालेऽन्तर्भावि रूपिद्रव्यावबो
धतः ८९ पर्यायान् भावतोऽनंतानेष वेत्ति जघन्यतः आधारद्रव्यानंतेन प्रतिद्रव्यं तु नेयतः ९० उत्कृष्टतोऽपि पर्या
याननंतान्वेत्ति पश्यति सर्वेषां पर्यवाणां वानंतत्वेऽपि पर्यवाः ९१ इत्यवधिज्ञानविषयः स्कंधाननंतानृजुधी
रूपयुक्तो हि पश्यति नृक्षेत्रे संज्ञिपर्याप्तैर्मनस्त्वेनोररीकृतान् ९२ मनोज्ञानस्याऽनितरां क्षयोपशमपाटवात्
विशेषयुक्तमेवासौ वेत्ति वस्तु घटादिकं ९३ स्कंधान् जानाति विपुलधीश्चैतानेवसाधिकान् अपेक्ष्य द्रव्यप ४२

र्यायान् तथा स्पष्टतरानपि ९४ द्विधा मनःपर्यवस्य द्रव्यतो विषयो ह्ययं विषयं क्षेत्रतोऽप्यस्य ब्रवीमि ऋजुधीरिह ९
५ अधस्तिर्यग्लोकमध्याद्वेत्ति सप्रभावितो ऋजुधीर्यो जिन मद्भ्यांतसंज्ञिमनांस्यसौ ९६ ज्योतिश्चक्रोपरितलं या
वदूर्ध्वं सवीक्षते तिर्यक्क्षेत्रे द्विधाऽथोधिसार्द्धद्वीपद्वयात्मकं ९७ उक्तं क्षेत्रं विपुलधिर्निर्मलं वीक्षते विधा विष्कंभायामब
हुलैः सार्द्धांगुलसाधिकं ९८ ऋजुधीः कालतः पल्यासंख्यभागं जघन्यतः अतीतामागतं जनात्युत्कर्षादपि तन्मि
तं ९९ तावत्कालभूतगामीमनःपर्यायबोधतः तावंतमेव विपुलधीस्तु पश्यति निर्मलं १०० सर्वभावानंतभाववर्त्ति
नोऽनंतपर्यवान् ऋजुधीर्भावतो वेत्ति विपुलस्याश्च निर्मलान् १ इति मनःपर्यायविषयः केवली द्रव्यतः सर्वद्रव्यं मूर्त्तिम
मूर्त्तकं क्षेत्रतः सकलं क्षेत्रं सर्वकालं च कालतः २ भावतः सर्वपर्यायान् प्रतिद्रव्यमनंतकान् भावतो भाविनो भूतान् सम्य
ग् जानाति पश्यति ३ विदाय कालयोः सर्वद्रव्येषु संगतावपि पृथग्युक्तिः पुनः क्षेत्रकालरूपोऽतिविंसतो ४ इति केवल
ज्ञानविषयः ४ मत्यज्ञानी तु मिथ्यात्वमिश्रेणावग्रहादिका उत्पत्तिक्यादिना यज्ञापदार्थान् विषयीकृतान् ५ वेत्त्यपायादिनं
ताश्च पश्यत्यवग्रहादिना मत्यज्ञानेन विशेषसामान्यावगामात्मना ६ मत्यज्ञानपरिगतं क्षेत्रं कालं च वेत्त्यसौ मत्यज्ञानपरिग
तान् सर्वेत्तिपर्यवानपि ७ श्रुताज्ञानी पुनर्मिथ्या श्रुतसंदर्भगमितान् द्रव्यक्षेत्रकालभावान् कथंचिद्वेत्ति पश्यति ८
यथा स शिवराजर्षिर्दिग्प्रोक्षकतापसः विभंगज्ञानतोऽपश्यत्सप्तद्वीपपयोनिधीन् ९ निरूपितानसंख्येयान् जगद्गुरु
निरूपितान् संदिहानो वीरपार्श्वे प्रव्रज्य प्रययौ शिवं १० इदं पंचविधं ज्ञानं जिनैर्यत्परिकीर्त्तितं तद्धि प्रमाणं भवतः प्र
त्यक्षं च परोक्षकं ११ स्वस्य ज्ञानस्वरूपस्य घटादेर्यत्परस्य च निश्चायिकं ज्ञानमिदं तत्प्रमाणमिति स्मृतं १२ यदाऽऽह ॥

स्वपरव्यवसायिज्ञानं प्रमाणमिति॥ तत्रेंद्रियमनोऽपेक्षं यज्जीवस्यैवोपजायते तत्स्याध्यक्षं प्रमाणं स्यादत्र ज्ञानत्रयात्मकं १४
इंद्रियैर्देवनिर्ज्ञानं यदात्मसुप्रजायते तत्परोक्षमिति ज्ञेयमाद्यज्ञानद्वयात्मकं १५ प्रत्यक्षे च परोक्षे चापायांशो निश्च
यात्मकः यः स एवात्र साकारः प्रमाणव्यपदेशभाक् १६ यथाभिहितं॥ साकारः प्रत्ययः सर्वो विमुक्तः संशयादिना
साकारार्थपरिच्छेदात्प्रमाणं तन्मनीषिणाम् १७ सामान्यैकगोचरस्य दर्शनस्यात एव च न प्रामाण्यं संशयादेरप्येवं च न
प्रमाणता १८ अत एव मतिज्ञाने सम्यक्त्वदलिकान्वितः योऽपायांशः स प्रमाणं स्यात्सौगलिकसद्दृशां १९ प्रक्षीण
सप्तकानां चापायांश एव केवलः प्रमाणमप्रमाणं वा व्यवहाराच्चानिर्णयात् २० श्रुतज्ञानेऽप्यपायांशः प्रमाणमनया
दिशा निमित्तापेक्षणाद्द्वे ते परोक्षे इति कीर्तिते २१ परोक्षं द्वानलज्ञानं धूमज्ञाननिमित्तकं लोके तदिदमेवेद्ये इंद्रि
यादिनिमित्तके २२ इदं च निश्चयनयापेक्षयाभ्यपदिश्यते यत्सत्त्वव्यपदेशोऽपि व्यवहारात्मनो नयोः २३ तथोक्तं
नंद्यां तं समासओ दुविहं पन्नत्तं इंदियपच्चक्खं च नोइंदियपच्चक्खं च इत्यादि॥ ननु च॥ प्रत्यक्षमनुमानं चागमश्चेति त्र
यं विदुः प्रमाणं कापिलाश्चाक्षपादास्तत्सोपमानकं २४ मीमांसकाः षडर्थापत्त्यभावाभ्यां सहोचिरे द्वे त्रीणि वा कणभु
जो बौद्धाश्चार्हितो विदुः २५ एकं च लोकायतिकाः प्रमाणानीत्यनेकधा परैरुक्तानि किं तानि प्रमाणान्यथवान्यथा २
६ अत्रोच्यते॥ एतान्याद्यज्ञानयुग्मेंतर्भूतान्यखिलान्यपि इंद्रियार्थसंनिकर्षलिंगनिमित्तकतया किल २७ अप्रामाण्ये
निवामूनि मिथ्यादर्शनयोगतः असद्बोधव्याप्तत्वादन्नवाक्यप्रयोगवत् २८ पंचानामप्यथैतेषां सद्भावो विवा ४४
र्यते एकं द्वे त्रीणि चत्वारि स्युः सदैकत्र देहिनः २९ प्राप्तं निसर्गसम्यक्त्वं येन स्यात्तस्य केवलि मतिज्ञानमनां वा

न्यश्रुतस्यापि शरीरिणः ३० अत एव मतिर्यस्य श्रुतं तत्रानिश्रितं श्रुतं यत्र मतिज्ञानं तत्र निश्रितमेव हि ३१ मति
ज्ञानश्रुतज्ञानरूपे द्वे नवतः सह त्रीणि ते सावधिज्ञाने समनःपर्यवे तु वा ३२ चत्वारि सहभावोऽपि व्यस्यस्यात्प्रमाणे
नवेत् पंचानां सहभावे तु मतं हितमुच्यते ३३ केचिदूचुर्जिनस्यापि तिर्यग्याकर्म्युदितेषु सति महोऽसिचं यत्र दीपा
दिन्यखिलान्यपि ३४ नवेंत्य किं चित्कराणि किं तु प्रकाशनं प्रति बाह्यस्थिकान्निज्ञानानि प्रोक्ते केवलेन तथा ३५ ततो
न केवले नैषां सद्भावो विरुध्यते अप्यापारान्तिकाल्पानामप्यक्षाणामिवार्हतः सत्र्याभावान्मतिज्ञानं न संभवेत् श्रुतज्ञा
नमपि यत्तन्मतिज्ञानपूर्वकं ३७ रूपिद्रव्यैकविषये न तृतीयतुरीयके लोकालोकविषयकज्ञानस्य सर्ववेदिनः ३
९ क्षायोपशमजान्यस्मात्स्यं च क्षायिकं मतं सद्भावस्तद्वेतेषां पंचानामेति नोचिती ४० कैरप्यनुपकल्पं तेजालका
न्यंतरमृजत्तः केवलज्ञाने तु ते बोधवृत्तिः कृतः ४१ किंच ज्ञानदर्शनयोरेवोपयोगो स्यात् यथाक्रमं अथो परार्था
यद्व्यबोधिनोः सर्ववेदिनः ४२ एकस्मिन्समये ज्ञानं दर्शनं चापरक्षणे सर्वज्ञस्योपयोगौ द्वौ समयांतरितौ सदा ४३
तथाहुः नाणंमि दंसणंमि य एत्तो एकतरयंमि उवउत्ता सव्वस्स केवलिस्स वि जुगवं दो नत्थि उवओगा ४४ इदं सैद्धांति-
कमतं तार्किकाः केचनोचिरे स्यातामेवोपयोगौ द्वावेकस्मिन्समयेऽर्हतः ४५ अन्यथा कर्मणद्वयस्याद्यावारकतामि
थः एकैकस्योपयोगस्यान्योपयोगो दयादुहः ४६ यद्येतयोः साद्यनः नास्थितिस्मकोपयोगयोः व्यर्थास्यात्प्राप्तु
दयादेकैकसमयांतरे ४७ अन्ये च केचन प्राहुर्ज्ञानदर्शनयोरिह नास्ति केवलिनो भेदो निःशेषावरणक्षयात्
४८ उक्तं च केइ भणंति जुगवं जाणइ पासइ य केवली नियमा अन्ने एगंतरियं इच्छंति सुओवएसेणं ४९ अन्ने न चेव

वीसं दंसणम्मि छंति जिणवरिंदस्स । अंचियकेवलनाणं तं चियसंदेसणं बिंति ५० अथ ज्ञानस्थितिर्दिश्यते भगवद्भिः पर
मेश्वरैः साद्यनंता सादिसांता तत्राद्या केवलस्थितिः ५१ शेषज्ञानानां द्वितीया तत्राद्यज्ञानयोर्लघुः अंतर्मुहूर्त्तमुत्कृ
ष्टा षट्षष्टिसागराणि च ५२ इयं चैवं त्रयस्त्रिंशत्सागरमानो भवौ द्वौ विजयादिषु द्वाविंशतिसागरमानात् वाऽनवांस्त्रीन्
च्युतादिषु ५३ क्षयोपशमिकं वा या स्यात् सम्यक्त्वमथवा मनुजेषु सातिरेकान् वा भवैः षट्षष्टिर्वाब्धयस्तदा ५४ यदाहुः
दो वारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं । अइरेगं नरभवियं नाणाजीवाण सव्वद्धं ५५ अथोत्कृष्टावधिज्ञानस्थि
तिरेषोपवर्णिता जघन्या चैकसमयं तस्मिन्नेवावधिर्भवेत् ५६ यदा विभंगज्ञानी सम्यक्त्वं प्रतिपद्यते तदा विभं
गं समये तस्मिन्नेवावधिर्भवेत् ५७ तेन द्वितीये तद्ज्ञानं चेत्पतेन्मरणादिना तदा जघन्या विज्ञेयावधिज्ञानस्थि
तिर्बुधैः ५८ संयतस्याप्रमत्तत्वे वर्त्तमानस्य कस्यचित् मनोज्ञानं समुत्पद्य द्वितीयसमये पतेत् ५९ एवं मनःपर्य
वस्य स्थितिर्लघ्वी क्षणात्मिका देशोना पूर्वकोटीशु महती सापि भाव्यते ६० पूर्वकोट्यायुषो दीक्षाप्रतिपत्तेर
नंतरं मनोज्ञाने समुत्पन्ने यावज्जीवं स्थिते वसा ६१ केवलस्थितिरुक्तैव साद्यनंतेत्यनंतरं मत्यज्ञानश्रुताज्ञा
नस्थितिस्त्रेधा भवेदथ ६२ अनाद्यनंताऽभव्यानां भव्यानां द्विविधा पुनः अनादिसांता साद्यंता तत्राद्या ज्ञान
संभवे ६३ सादिसांता पुनर्द्वेधा जघन्योत्कृष्टभेदतः जघन्यांतर्मुहूर्त्तं स्यात्सा चैवं परिभाव्यते ६४ जंतोर्भ्रष्टस्य
सम्यक्त्वात् पुनरंतर्मुहूर्त्ततः सम्यक्त्वलब्धौ लघ्वी स्यादज्ञानद्वितयस्थितिः ६५ अनंतकालचक्राणि कालतः ४५
परमा स्थितिः देशोनं पुद्गलपरावर्त्तार्द्धं क्षेत्रतस्तु सा ६६ भावना सम्यक्त्वतः परिभ्रष्ट वनस्पत्यादिषु भ्रमन् सम्य

क्त्वं लभतेऽवश्यं कालेन तावता पुनः ६७ जघन्या त्वेकसमयं विभंगस्य स्थितिः किल उत्पद्यसमयं स्थित्वात्र पततः
सा पुनर्भवेत् ६८ त्रयस्त्रिंशत्सागराणि विभंगस्य स्थितिर्गुरुः देशोनया पूर्वकोट्याऽधिकानि तत्र भावना ६९ दे
शोनपूर्वकोट्यायुः कश्चिदंगी विभंगवान् ज्येष्ठायुः प्रतिष्ठाने तिष्ठेद्विभंगसंयुतः ७० इति ज्ञानस्थितिः ॥ अथांतरं ॥
मत्यादिज्ञानतो भ्रष्टः पुनः कालेन यावता ज्ञानमाप्नोति मत्यादिज्ञानानामंतरं हि तत् ७१ अनंतकालचक्राणि कालतः स्या
न्मतिश्रुते देशोनं पुद्गलपरावर्त्तार्द्धं क्षेत्रतोंतरं ७२ एवमेवावधिमनःपर्यायज्ञानयोः परं अंतर्मुहूर्त्तमात्रं च सर्वेषामं
तरं लघु ७३ केवलस्यांतरं नास्ति साद्यनंता हि तत्स्थितिः अनाद्यंताऽनादिसांते ज्ञानद्वयेऽपि नांतरं ७४ सादिसांते पुन
स्त्रयोऽधिकाः पुनः षट्षष्टिसागराः इयमुत्कृष्टसम्यक्त्वस्थितिरेव तदंतरं ७५ अंतरं स्याद्विभंगस्य ज्येष्ठं कालो
वनस्पतेः अंतर्मुहूर्त्तं तेषु त्रिषु ज्ञेयं जघन्यतः ७६ स्तोका मनोज्ञा अवधिमंतोऽसंख्यगुणास्ततः मतिश्रुतिज्ञानवंतो
मिथस्तुल्यास्त्रयोऽधिकाः ७७ असंख्येयगुणास्तेभ्यो विभंगज्ञानशालिनः केवलज्ञानिनोऽनंतगुणास्तेभ्यः प्रकीर्त्ति
ताः जिनैः ७९ सर्वेषां पर्यवा द्वेधा स्वकीयापरभेदतः स्वस्वधर्मस्वरूपास्तत्र स्वे परधर्मात्मकाः परे ८० क्षयोपशमवैचि
त्र्यमतेरवग्रहादयः अनंतभेदाः षट्स्थानपतितत्वाद्भवंति हि ८१ षट्स्थानानि चैवं च अनंतासंख्यसंख्येयभागो
ऽवृद्धिर्यथाक्रमं संख्यासंख्यानंतगुणे वृद्धिरितीदृक्षषट् ८२ अनंतासंख्यसंख्यानामनंतासंख्यसंख्यकाः भे
दाः स्युरित्यनंतास्तु मतिज्ञानस्य पर्यवाः ८३ यतिज्ञेयं मतिज्ञानं विनयेतयथापवा ज्ञेयानंतास्ततोऽनंता मतिज्ञानस्य
पर्यवाः ८४ निर्विभागैः परिच्छेदैः स्थित्वं कल्पनयाथवा यतस्तत्रोपयुज्यंते ततस्तेऽप्यस्य पर्यवाः ८५ यद्यप्यस्मिन्न संबं

ध्य तथाप्यस्योपयोगतः तेद्रमीयाअसंबद्वस्वोपयोगिभिर्नादिवत् ८६ आह च॥ जइते परपज्जाया न तस्स अह तस्स
न परपज्जाया आचार्य आह॥८७ जं तंमि असंबद्धा तो परपज्जाय ववदेसो ८८ चायसपज्जायविसेसणाइणा तस्स जमु
वजुज्जंति सधणमिवासंबद्धं दव्वं तितो पज्जवा तस्स ८९ त्यागेन स्वपर्यायैर्विशेषणादिना च परपर्याया घटा
दिपर्यायायेन कारणेन तस्य ९० ज्ञानस्योपयुज्यंते उपयोगं यांति यतो घटादिसकलवस्तुपर्यायपरित्याग एव ज्ञादिरर्थः
९१ सुज्ञातो भवतीति सर्वे परपर्यायाः परित्यागमुखेनोपयुज्यंते तथा परपर्यायसद्भाव एव तेऽ ९२ स्वपर्याय इति विशेष
यितुं शक्या इति स्वपर्यायविशेषणेन परपर्याया उपयुज्यंते ९३ श्रुतेप्यनंताः पर्यायाः प्रोक्ताः स्वपरभेदतः स्वीयास्तत्र
च निर्दिष्टास्तत्राक्षरानक्षरादयः ९४ क्षयोपशमवैचित्र्याद्विषयानंत्यतश्च ते श्रुतानुसारिबोधाना मानंत्यात्स्युरनंतकाः
९५ अविभागपरिच्छेदै रनंतावान्चैतिते अनंताः परपर्याया अप्यस्मिंस्ते घटवत् ९६ अथवास्याक्षुतज्ञानं श्रुत
२ ग्रंथानुसारतः श्रुतग्रंथस्याक्षरात्मा नान्यकारादिकानिच ९७ तच्चैकैकमुदात्तानुदात्तस्वरितभेदतः एकस्वान्य
प्रयत्नामनासिकाद्विशेषतः ९८ संयुक्तासंयुक्तयोगद्वा दिसंयोगभेदतः आनंताच्चाभिधेयानां भिद्यमानमनंतधा
९९ केवलोजननेकारः शेषवर्णयुतश्च तान्ते सर्वेस्य स्वपर्यायास्तदन्ये परपर्यवा १०० एवं च॥ अनंतस्वान्यपर्या
यमेकैकमक्षरं श्रुते पर्यायास्तेखिलद्रव्यपर्यायराशिसम्मिता १ आह च॥ एक्केकमक्खरं पुण सपरपज्जायभेयओ
भिन्नं तं सव्वदव्वपज्जायरासिमाणं मुणेयव्वं २ जेत्तह इकेवलोसे सव्वण सहितो अपज्जवेगारो तेतस्स सपज्जाया सेसा ४६
परपज्जवा तस्स ३ अयंभावः यान्यान्केवलोकारः शेषवर्णसहितश्च जनने ते तस्य स्वपर्यायाः शेषाःशेषव

र्णसंबंधिनो घटाद्यपरपदार्थसंबंधिनश्च परपर्यायास्तस्याकारस्येति एवं विधानेकवर्णपर्यायौघैः समन्वितं तत
आनंतपर्यायं श्रुतज्ञानं श्रुतं श्रुते ४ अथावधेः स्वपर्याया विविधाया भिदोऽवधेः क्षायोपशमिकभवप्रत्ययादि
विभेदतः ५ तिर्यग्नैरयिकस्वर्गिनरादिस्वामिभेदतः अनंतभित्स्वविषयद्रव्यपर्यायभेदतः ६ असंख्यभि
त्सविषयक्षेत्रकालभेदतोपि च निर्विभागैर्विभागैश्च तेचैवं स्युरनंतकाः ७ एवं मनःपर्यवस्य केवलस्य च पर्यवाः
निर्विभागैर्विभागैश्च स्वाम्यादिभेदतोपि च ८ अनंतद्रव्यपर्यायज्ञानाच्च स्युरनंतकाः अज्ञानत्रितयस्यैवं ज्ञेयानंत
पर्यवा ९ अष्टोप्येतानि तुल्यानि व्यपेक्षास्वान्यपर्यवान् यद्वोऽल्पबहुत्वं
च तदपेक्ष्य स्वीयपर्यवान् १० तत्र स्तोकाः सर्वतः स्तोका मनःपर्यायपर्यवाः मनोद्रव्यैकविषयमिदं ज्ञानं वेद्यतः ११
एभ्योऽनंतगुणाः किंच विभंगज्ञानपर्यवा मनोज्ञानापेक्षया यद्विभंगविषयो महान् १२ आरभ्य नवमग्रैवेयकादास
प्तमस्थितिं उपाधःक्षेत्रके तिर्यक् चासंख्यद्वीपवार्धिगे १३ रूपिद्रव्याणि कतिचित्तत्पर्यायांश्च वेत्ति सः अनंत
गुणितास्तेभ्यः श्रुताज्ञानमिदं यतः सर्वमूर्तामूर्तद्रव्यसर्वपर्यायगोचरं १६ श्रुताज्ञानविषयानां केषांचिद्विषय
त्वतः स्पष्टत्वाच्च श्रुतज्ञानतेभ्यो विशेषतोधिका १७ अभिलाप्यानभिलाप्य विषयेऽनंतसंगुणाः मत्यज्ञाने श्रुताज्ञा
नादनभिलाप्यैकगोचरात् १८ मतिज्ञानपर्यवाश्च तत्ता विशेषतोधिकाः मत्यज्ञानाविषयत्वात्स्फुटत्वतः १९ तेभ्यो यानांविषय
प्यनंतगुणिताः केवलज्ञानपर्यवाः सर्वानावावविनिखिलद्रव्यपर्यायभासनात् २० इतिज्ञानं द्विरूपं
हि न वेद्वस्तु सामान्यतां विंघतः तत्र सामान्यबोधाय स्तद्दर्शनमितोदितं २१ यथा प्रथमतो दृष्टो घटोयमिति

बुध्यते तद्दर्शनं तद्विशेषबोधो ज्ञानं भवेत्ततः २२ सामान्येनावबोधाय चक्षुषा जायतेंगिनां तच्चक्षुर्दर्शनं प्राज्ञ
स्तस्माच्चतुरिंद्रियान् २३ यः सामान्यावबोधोयं श्चक्षुषो जायतेंगिनां तेष्वेवे- स्पर्शाद्यक्षवर्जपरेंद्रियैः
अचक्षुर्दर्शनं तस्मात्सर्वेषामपि देहिनां २४ येनावधेरुपयोगे सामान्यमवबुध्यते अवधिज्ञानतोम
वतस्मादवधिदर्शनं २५ यद्येवमवधिज्ञाने भवत्यवधिदर्शनं एवं विभंगेप्यवधिदर्शनं कथितं श्रुते २६
अयं भावः सम्यग्दृगवधिज्ञाने सामान्यावगमात्रकं यद्येतत्स्यात्तथा मिथ्यादृग्विभंगेपि तद्भवेत् २७ ना
म्नावकथितं प्राज्ञैस्तत्तप्यवधिदर्शनं अनाकारत्वाविशेषाद्विभंगदर्शनं ततः २८ अयं सूत्राभिप्रायः ॥ आहुः
कर्मग्रंथकारास्तु यद्यपि स्तः पृथक्पृथक् साकारेतरभेदेन विभंगावधिदर्शने २९ तथापि मिथ्यादृक्पत्वान्नसम्यग्वस्तु
निश्चयः विभंगस्याप्यनाकारत्वेनास्यावधिदर्शनात् ३० ततोऽनेनदर्शनेन पृथक्विवक्षितेन किं तत्कर्मग्रंथिके
नास्य पृथग्गेतद्विवक्षितं ३१ तथोक्तं सुत्ते अविभंगस्स परूवियं उहिदंसणं बहुसोकीसपुण पडिसिद्धं कम्मप
गडीपगरणंमि ३२ इत्याद्यधिकं विशेषणवत्याः प्रज्ञापनायाश्चाष्टत्रिंशत्तमपदवृत्तितश्चावसेयं ॥ सर्वभूतभवज्ञाविव
स्तुसामान्यभावतः बुध्यते केवलज्ञानादस्तु केवलदर्शनात् ३३ आदौ दर्शनमन्येषां ज्ञानं तदनु जायते केवलज्ञा
निनामादौ ज्ञानं तदनु दर्शनं ३४ अतएव सव्वन्नूणं सव्वद्दरसीणमिति पठ्यते प्रज्ञप्ताः सर्वतः स्तोकाजंतवो
ऽवधिदर्शनाः अचक्षुर्दर्शनास्तेभ्योऽनंतगुणिताधिकाः ३५ कालश्चक्षुर्दर्शनस्य जघन्योऽन्तर्मुहूर्तकं साति ४३
रेकं पयोराशिसहस्रं परमः पुनः ३७ अचक्षुर्दर्शनस्याथ भव्याभव्यापेक्षया भवेत् अनाद्यंतोऽनादिसांतो भव्या

नां सिद्धियायिनां ३८ जघन्येनैकसमयः स्यात्कालोऽवधिदर्शने उत्कर्षतोऽवधिषट्षष्टिर्वार्द्धयः साधिकामताः
३९ ज्येष्ठेनावधिज्ञानकालः षट्षष्टिवार्द्धयः अवधिदर्शनेतद्द्वियथोक्तं घटेतकथं ४० अत्रोच्यते अव
धौ विभंगे वाऽवधिदर्शनमास्थितं ततो द्वाभ्यां सद्भावाद्युक्तः सोऽवधिदर्शने ४१ अत्र बहुवक्तव्यं तत्तु प्रज्ञापना
ष्टादशपदवृत्तितोवसेयं ॥ कालः सादिरनंतश्च भवेत्केवलदर्शने एतकस्याप्यनादित्वं नाचक्षुर्दर्शनं विना ४२ इ
ति दर्शनं चतुष्टयी दर्शनानां अज्ञानी ज्ञानपंचकं अमी द्वादश निर्दिष्टा उपयोगा बहुश्रुतैः ४३ ज्ञानपंचकम
ज्ञानत्रयं साकारका अमी ऊक्ताः शेषास्त्वनाकाराश्चतुर्दर्शनलक्षणाः ४४ इत्युपयोगाः आहारकाः स्युः सर्वस्या
ः सर्वे विक्रगतिं विना त्रिचतुःसमयांतास्यात्तत्रानाहारितापि च ४५ गतिर्द्विधा हि जंतूनां प्रस्थितानां परं भवं सरला
ऋद्विक्राचापि तत्रैकसमयादिमा ४६ उत्पत्तिदेशो यत्र स्यात्समश्रेणिस्थितस्थितः तत्रैकसमयेनैव ऋजुगत्यासु
मान्व्रजेत् ४७ परजन्मायुराहारौ क्षणेस्मिन्नेव सोश्रुते उत्पमेतद्दृजुगतौ निश्चयव्यवहारयोः ४८ द्वितीयसमये
भुंक्ते व्यवहारनयाश्रयात् उदेति परजन्मायुरिदं तात्पर्यमत्र च ४९ प्राग्भवांत्यक्षणो वक्रापरिणामाभिमुख्यतः के
श्चिद्वक्रादिसमयो गण्यते व्यवहारतः ५० ततश्च भवांतराद्यसमये गते स्वस्मिन्द्वितीयके समये परजन्मायुरु
देतिखलुतन्मते ५१ यदाहुः उज्जुगइ पढमसमये परभवियं आउयं तहाहारो वक्काइ बीयसमये परभविआ
उं उदयमेइ ५२ निश्चयनयाश्रयात्तु संमुखो गागतेर्यः प्राक्भवस्य क्षणे तथापि हि सत्त्वात्प्राग्भवसंबंधि संघातपरि
शाटयोः ५३ समयः प्राग्भवस्यैव संभवेत्पुनर्गतेः प्राच्यांगसर्वशाटो यो भवेद्धारक्षणे एव यत् ५४ परभवपटमेसा

डोत्ति आगमवचनात् उदेति समयेन्नैव गतिः सद्ददत्तद्वायुषा ततोऽन्यजन्मायुर्वक्रगता वृष्यादिमत्क्षणे ५५ त्रिभिर्वि
शेषकं॥ तत्र संघातपरिशाटस्वरूपं चैवमागमे संघातः परिशाटश्चूतो द्वौ समुदितावपि ५६ औदारिकादिदेहानां
प्रत्येकं करणत्रयं ५७ सर्वात्मना पुद्गलानामाद्ये हि ग्रहणक्षणे सर्वात्मनोत्पत्तिदेश द्वितीयादिषु चोनयं ५८ यथा सर्प
र्पिकायां स्नेहायामपूपकः गृह्णाति प्रथमं स्नेहं सर्वात्मना तु सृजेत् ५९ ततश्च किंचित् गृह्णाति स्नेहं किंचित्तु न
स्सृजेत् संघातभेदरूपत्वात् पुद्गलानां स्वभावतः ६० तथैव प्रथमोत्पन्नः प्राण्युत्पत्तिप्रथमक्षणे सर्वात्मनोत्पत्तिदेशा
स्थितान् गृह्णाति पुद्गलान् ६१ ततश्चाभवपर्यंतं द्वितीयादिक्षणेषु तु गृह्णन् सृजंश्चतान् क्रियात् संघातपरिशाट
नं ६२ तत आयुः समाप्तौ च भवायुः प्रथमक्षणे स्यात् शाटएव प्राग्देहपुद्गलानां न तु ग्रहः ६३ औदारिकं चैक्रि
याहारकेषु त्रयोप्यमी संघातः परिशाटः स्यात् तैजसे कार्मणे सदा ६४ अनादित्वान्न चैतेनैव संघातः केवलोऽन
योः केवलः परिशाटश्च संभवेन्मुक्तिगामिनां ६५ अत्र वक्तव्यताविस्तरोऽस्ति सचावश्यकवृत्त्यादिभ्योऽवसेयः
अप्रस्तुतं॥ वक्रागतिश्च तत्र स्यादेकैकवक्रादिनिर्युता तत्राद्याद्विसैकैकक्षणद्वयाक्रमासुरा ६६ तथाहि
यदोर्ध्वलोकपूर्वस्यामधः श्रयति पश्चिमां एकवक्राद्विसमयास्याद्वक्रागतिस्तदा ६७ समश्रेणिगतित्वेन जंतु
रेकेनयात्यधः द्वितीयसमये तिर्यग्गत्युत्पत्तिदेशमाश्रयेत् ६८ पूर्वदक्षिणोर्ध्वदेशादधश्चेदपरोत्तरां व्रजेत्तदाद्वि
कुटिलागतिस्त्रिसमयात्मिका ६९ एकेनाधः समश्रेण्या तिर्यगन्येन पश्चिमां तिर्यगेवतृतीयेन वायव्यां दिशि याति ४८
सः ७० त्रसानामेतदंतैव वक्रास्यान्नाधिकापुनः स्थावराणां चतुःपंचसमयांतापि साभवेत् ७१ तत्र चतुः

समयात्वेवं॥ त्रसनाड्या बहिरधोलोकस्य विदिशोदिशं यात्येकेन द्वितीयेन त्रसनाड्यंतरे विशेत् ७२ ऊर्ध्वं यातितृतीये ।विग्रहगति
न चतुर्थे समये पुनः त्रसनाड्या विनिर्गत्य दिशं प्राप्य स्थानमाश्रयेत् ७३ दिशो विदिशि या नेतु नाडीमाद्ये द्वितीयके ऊर्ध्वा स्थापना२४
धस्तृतीये तु बहिर्विदिशि तुर्यके ७४ यदोक्तरीत्या विदिशोऽधोचेत विदिशि क्वचित् त
दात्समयाः पंचात्स्यात् पंचसमयागतिः ७५ उक्तंच॥ विदिसाउ दिसंपढमे बीए पइस
रइ नाडिमज्झंमि उड्ढं तइए तुरिए उनीइ विदिसं तु पंचमए ७६ इति भगवतीवृत्तौ शतक
१४ प्रथमोद्देशके स्थापनेयं भगवती सप्तमशतक प्रथमोद्देशके तु पंचसामयिकी
विग्रहगतिमाश्रित्येत्थमुक्तं दृश्यते इदं च सूत्रेन दर्शितं प्रायेणेत्थमनुत्पत्तेरिति व्यवहा
रापेक्षया चन वेदाहारकोऽसुमान् गतौ किंजेक वक्रायां समयद्वितयेपि हि ७७ तथाहि
समये पूर्वे शरीरमथ तत्सृजेत् तस्मिंस्तु नस्तच्छरीरयोग्याः केचन पुद्गलाः ७८ लोमाहारेण
संबंधमायांति जीवयोगतः औदारिकादिपुद्गलादानं चाहारउच्यते ७९ एवमाद्यसम
ये आहारः परिभावितः सचैवं द्विवक्रादावप्याद्यक्षण आहृतिः ८० द्वितीयसमये चासु
मुत्पत्तिदेशमापतेत् तदा तद्वयोग्याणून् यथासंभवमाहरेत् ८१ द्विवक्रातु त्रिसमया
मध्यस्तत्र निराहृतिः आद्यंतयोः समयोराहारः पुनरुक्तवत् ८२ एवं च त्रिचतुर्वक्रे
चतुःपंचक्षणात्मके मध्यास्तयोर्निराहाराः साहारावादिमांतिमौ ८३ यदाहुः इगउत्तिच

उक्कोसु उ गाइसमयेषु परभवाहारो उ गावक्काइसु समया इगदोतिन्नि उ अणाहारा ८४ निश्चयनयेन भवस्य भाविन: प्र
थमे क्षणे प्राग्वपुषा सह असंबंधादनाहारता च भाविनोगस्य नाकृति: ८५ द्वितीयसमये तु स्वं स्थानं प्राप्याहरेत्तत: समय: स्या
दनाहार एकवक्रगतावपि ८६ अन्यस्यां त्वनाहारो तृतीयस्यां त्रयस्तथा चतुर्थ्यामपि चत्वार: साहारांत्योऽखिलासु
यत् ८७ ततश्च व्यवहारेणोत्कर्षत: समयास्त्रय: निश्चयेन तु चत्वारो निराहारा: प्रकीर्तिता: ८८ सामान्यात्सर्वत: स्तो
का निराहारा: शरीरिण: आहारका असंख्येयगुणास्तेभ्य: प्रकीर्तिता: ८९ त्रिविधश्च स आहार ओजआहार आदिम:
लोमाहारो द्वितीयश्च प्रक्षेपाख्यस्तृतीयक: ९० तत्राद्यं देहमुत्सृज्य ऋज्व्या कुटिलयाथवा गत्वोत्पत्तिस्थानमाप्य प्रथ
मे समये सुमान् ९१ तैजसकार्मणयोगेनाहारयति पुद्गलान् औदारिकाद्यंगयोग्यान् द्वितीयादिक्षणेषु च ९२
औदारिकादिमिश्रेण रश्रुत्वा रूपप्रस्तत: यावच्छरीरनिष्पत्तिरंतर्मुहूर्तकालिकी ९३ सूत्रं यदाहु: तेएण
कम्मएणं आहारेइ अणंतरं जीवो तेण परं मीसेणं जाव सरीरस्स निप्फत्ती ९४ समस्तैरप्योजआहार ओजो देहार्हपुद्ग
ला: ओजो वा तैजस: कायस्तद्रूपस्तेन वा कृत: ९५ शरीरपर्याप्त्यनंतरं पुद्गलानां समाहृति: त्वगिंद्रियादिस्पर्शेन
लोमाहार: स उच्यते ९६ मुखे कवलनिक्षेपाद्यो कावलिकाभिध: एकेंद्रियाणां देवानां नारकाणां च नह्यसौ
९७ जीवा: सर्वेऽप्यपर्याप्ता ओजआहारिणो मता: देहपर्याप्तिपर्याप्ता लोमाहारा: समेंऽगिन: ९८ ओजसो नाभोग एव
लोमस्त्वाभोगजोऽपि च एकेंद्रियाणां लोमोऽपि स्यादनाभोग एव हि ९९ तथोक्तं संग्रहणीवृत्तौ एकेंद्रियाणामति ४९
स्तोकाऽपटुमनोद्रव्यलब्धीनामाभोगमात्राद्वस्तुतोऽनाभोगनिर्वर्तित एव द्विक्षणोनोनवक्रे जघन्याकायस्थि

ति: आहारित्वेतरित्वकालश्चक्राणसंख्यया: १००० गुणानां गुणस्थानान्यमूनि च चतुर्दश वक्ष्ये स्वरूपमेते
षामन्वर्थव्यक्तिपूर्वकं १ तथाहु: मिच्छे सासणमीसे अविरयदेसे पमत्त अपमत्ते नियट्टी अनियट्टी सुहुम उवसम खी
ण सजोगी अजोगी गुणा: २ गुणा ज्ञानादयस्तेषां स्थानं नाम स्वरूपभित् शुद्ध्यशुद्धिप्रकर्षापकर्षकृत्वात्र प्रकीर्त्यते
३ तत्र मिथ्या विपर्यस्ता जिनप्रणीतवस्तुषु दृष्टिर्यस्य प्रतिपत्ति: स मिथ्यादृष्टिरुच्यते ४ यत्तु तस्य गुणस्थानं सम्यग्दृ
ष्टिमाश्रित: मिथ्यादृष्टिगुणस्थानं तदुक्तं पूर्वसूरिभि: ५ ननु मिथ्यादृशां दृष्टेर्विपर्यासात्कुतो न वेह ज्ञानादिगु
णसद्भावो यद्गुणस्थानतोच्यते ६ अत्र ब्रूम: नवेद्यद्यपि मिथ्यात्ववतामस्ताभिदा प्रतिपत्तिर्विपर्यस्ता प्रतिपत्तिर्न
वि ध्रुवं ७ आस्तामन्येमनुष्याद्या निगोददेहिनामपि अस्त्यव्यक्तस्पर्शमात्रप्रतिपत्तिर्यथास्थिता ८ यथा घनघनच्छन्ने
र्केऽपि स्यात्कापि तत्प्रभा अनावृत्तानवेद्यात्रिदिनाभेद: प्रसज्यते ९ इति प्रथमगुणस्थानं १ आद्यमौपशमिकाख्यस
म्यक्त्वमपि गच्छति अनंतानुबंध्युदये जघन्यात्समयेन यत् ११ षडावलिं त्वाक्षेपेयकारस्य नवेत्सदं आसादनमि
त्यनंतानुबंध्युदयवाचकं १२ ततश्च ॥ आसादनेन युक्तो य: ससासादन उच्यते स चासौ सम्यग्दृष्टिस्तद्गुणस्थानं द्वि
तीयकं १३ तत्रैवं प्राग्लब्धस्यौपशमिकसम्यक्त्वस्य जघन्यत: शेषे क्षणे परं सुशेषास्तकार्षदावली च षट् १४ महा
विभीषिकोस्योनकल्प: केनापि हेतुना कस्याप्यनंतानुबंधिकषायानुदयोन्वेत् १५ अथैतस्मिन्ननंतानुबंधिनामु
दये सति सासादनसम्यग्दृष्टिगुणस्थानं स्पृशत्यसौ १६ यदिवोपशमश्रेण्या: स्यादिदं पततोंगिन: सम्यक्त्वस्यौपशमि
कस्यांते कस्यापि पूर्ववत् १७ ततश्च ऊर्ध्वं च मिथ्यात्वमवश्यं प्राप्नोगच्छति पतन्द्वितीयसोपानाद्यथा मेवह्निगच्छति १८

म्यक्तस्यात्रमाद
येत् यो ऽनंतानुबं
धिकषायोदय:
सायमादन: १०
उत्कर्षादावली
षट्कात् स

नाम्नासास्वादनसम्यग्दृग्गुणस्थानमपष्टः अतेतत्वचाश्चयोमितिमद्भिरयंस्मृतः १९ उद्वम्यमानसम्यक्त्वास्वादनेनस
ह्यास्तियः सहिसास्वादनसम्यक्दृष्टिरित्यभिधीयते २० यथाहिभुक्तक्षीरान्नमुद्वमन्मक्षिकादिना किंचिदास्वादयत्ये
वतद्रसंवम्यमानसः २१ तथायमपिमिथ्यात्वाऽभिमुखोऽत्रांतमानसः सम्यक्त्वमुद्वमन्नास्वादयेत्किंचनतद्रसं २२ इदं
द्वितीयं ॥पूर्वोक्तपुंजत्रितये सयद्यर्द्धविशुद्धकः समुदेतितदातस्योदयेनस्याछरीरिणः २३ श्रद्धाजिनोक्ततत्त्वेश्र
चिश्रुद्धासौतदोच्यते सम्यग्मिथ्यादृष्टिरितिगुणस्थानंवतत्रतत् २४ अंतर्मुहूर्त्तकालोस्य ततऊर्द्धंसदेहन्नृतं
अवश्यंयातिमिथ्यात्वंसम्यक्त्वमथवाप्नुयात् २५ इतितृतीयम् सावद्ययोगाविरतायः स्यात्सम्यक्त्ववानपिगुण
स्थानमविरतसम्यग्दृष्ट्याख्यमस्यतत् २६ पूर्वोक्तमौपशमिकं शुद्धपुंजोदयेनवा क्षायोपशमिकंनिरवंसम्यक्त्वं
प्राप्तवानपि २७ सम्यक्त्वंक्षायिकंवाप्तो क्षीणदर्शनसप्तकः कलयन्नपिसावद्यविरतिंमुक्तिदायिनी २८ नैवाप्र
त्याख्याननामकषायोदयविघ्नतः सदेशतोपिविरतिं कर्त्तुंपालयितुंक्षमः २९ इतिचतुर्थम् ॥ स्थूलसावद्यविर
माद्योदेशविरतिंश्रयेत् सदेशविरतिस्तस्यगुणस्थानंतदुच्यते ३० सर्वसावद्यविरतिंजनतोप्यस्यमुक्तिदां तदादे
तोप्रत्याख्यानावरणायांतिविघ्नतां ३१ इतिपंचमः संयतस्सर्वसावद्ययोगेभ्योपिरतोपियः कषायनिद्राविकथादि
प्रमादैः प्रमाद्यति ३२ सप्रमत्तः संयतोस्य प्रमत्तसंयताभिधं गुणस्थानंप्राक्तेनेभ्यः स्याद्विशुद्धिप्रकर्षिते ३३ व
क्ष्यमाणेभ्यश्चतेभ्यः स्याद्विशुद्धप्रकर्षितं शुद्धिप्रकर्षापकर्षावेवंनाचोपरिष्ठपि ३४ इतिषष्टम् यश्चनिद्रा
कषायादिप्रमादरहितोयतिः गुणस्थानंभवेत्तस्याप्रमत्तसंयताभिधं ३५ इतिसप्तमम् स्थितिघातोरसघातोगुण

MEMORIAL

श्रेणिस्तथापरा गुणानांसंक्रमश्चैव बंधोनवतिपंचमः ३६ एषांपंचानामपूर्वकरणंप्रागयेक्षया नवेयस्यासावपूर्व
करणोनामकीर्त्तितः ३७ गरीयस्याःस्थितेर्ज्ञानावरणीयादिकर्मणां योपवर्त्तनयाघातः स्थितिघातःसउच्यते ३८
कर्मद्रव्यस्यकटुकत्वादिकस्यरसस्यहि योपवर्त्तनयाघातोरसघातःसकीर्त्यते ३९ एतौपूर्वगुणस्थानेषुल्पावे
चकरोतिसः विशुद्धत्वात्तयास्मि सुमहांतौ स्युद्धिर्द्धितः ४० यस्याग्राश्रित्यदलिकस्वनांनालघीयसीं चकारकाल
लेद्राघीयसीं शुध्यपकर्षतः ४१ अस्मिंस्त्वाश्रित्यदार्धलकरचनांताप्रघीयसीं करोतिकालतोल्पानदपूर्वांप्रागपेक्ष
या ४२ तथाबध्यमानसुनप्रकृतिष्वशुभात्मनां तासामबध्यमानानांदलिकस्यप्रतिक्षणे ४३ असंख्यगुणवृ
ध्यायः पेक्षः सगुणसंक्रमः तमप्यपूर्वंकुर्वीतसोत्रशुद्धिप्रकर्षतः ४४ स्थितिंद्राघीयसींपूर्वगुणस्थानेषुबद्ध
वान् अशुद्धत्वादिहपुनस्तामपूर्वांविशुद्धतः ४५ पल्यासंख्येयभागेनहीनहीनतरांसृजेत् तद्गुणस्थानमस्यस्यादपू
र्वकरणनिधं ४६ अष्टमि:कलकम् ॥ क्षपकश्चोपशमिकश्चेत्यसोन्वृतिद्विधा क्षपणोपशमार्हत्वादेवायंश्रो
मततथा ४७ नयद्यपिक्षपयति नचोपशमयत्ययं तथाप्युक्तस्तथाराज्यार्हः कुमारोयथानृपः ४८ अंतर्मुहूर्त्त
मानाया अपूर्वकरणस्थितेः आद्यएवक्षणएतद्गुस्थानंप्रपन्नकान् ४९ त्रैकालिकांजिनोपेक्ष्य जघन्यादीन्यसं
ख्यसः स्थानान्यध्यवसायस्योत्कृष्टांतान्यभिचंतिहि ५० असंख्यलोकाकाशांशमितानिस्युरमूनि च ततोधिकाधि
कानिस्युर्द्वितीयादिक्षणेषुतु ५१ आद्येक्षणेयजघन्यंततोनंतगुणोज्ज्वलं भवेदाद्यक्षणोत्कृष्टं ततोनंतगुणाधिकं
५२ क्षणद्वितीयेजघन्यमेवमंत्यक्षणावधिमिथः षट्स्थानपतितान्येकक्षणभवानितु ५३ समकालंप्रपन्नानांगु

णस्थानमिदं खलु बहूनां भव्यजीवानां वर्त्तते परस्परं ५४ तत्कृताध्यवसायस्थानव्यावृत्तिलक्षणा निवृत्ति
स्तन्निवृत्त्याख्यमपूर्वत्कीर्त्यते बुधैः ५५ इति चाष्टमम् ॥ परस्पराध्यवसायस्थानव्यावृत्तिलक्षणा निवृत्तिर्यस्य
नास्त्यसावनिवृत्त्याख्यो समानस्तु चेत् ५६ तथा किट्टीकृतसूक्ष्मसंपरायव्यपेक्षया स्थूलो यस्यास्त्यसौ तस्माद् बादर
संपरायकः ५७ ततः पदद्वयस्यास्य विहिते धर्मधारये स्यात्सो निवृत्तिबादरसंपरायाभिधस्ततः ५८ तस्यानिवृ
त्तिबादरसंपरायस्य कीर्त्तितं गुणस्थानमनिवृत्तिबादरसंपरायकं ५९ अंतर्मुहूर्त्तमानस्य यावंतोस्य क्षणाः ख
लु तावंत्येवाध्यवसायस्थानान्याहुर्जिनेश्वराः ६० यस्मिन् यदेकसमये प्राप्तानां भूयसामपि एकमेवाध्यवसाय
स्थानकं कीर्त्तितं जिनैः ६१ अनंतगुणशुद्धं च प्रतिक्षणं यथोत्तरं स्थानमध्यवसायस्य गुणस्थानेत्र कीर्त्तितं ६२
क्षपकश्चोपशमकश्चेत्यसौ भवति द्विधा क्षपयेच्चोपशमयेच्चासौ यन्मोहनीयकं इति नवमं सूक्ष्मः कीट्टीकृतो
लोभ कषायोदयलक्षणः संपरायो यस्यासौ सूक्ष्मसंपरायः स उच्यते ६४ क्षपकश्चोपशमश्चेति स्यात्सोपि द्विविधः गुण
स्थानं तस्य सूक्ष्मसंपरायादिनामयोभिधं स्मृतं ६५ इति दशमम् ॥ येनोपशमिता विद्यमाना अपि कषायकाः नीता
विपाकप्रदेशोदयादीनामयोग्यतां ६६ उपशांतकषायस्य वीतरागस्य यत् छद्मस्थस्य गुणस्थानं तदाख्यातं तदाख्य
या ६७ असौ ह्युपशमश्रेण्यारंभेऽनंतानुबंधिनः कषायान् प्राग् विरतो देशेन विरतोऽथवा ६८ प्रमत्तो वाप्रमत्तः
सन् शमयित्वा ततः परं दर्शनमोहत्रितयं शमयेद् धर्मशुद्धधीः ६९ कर्मग्रंथावचूरौ तु इहोपशमश्रेणिकृदप्र
मत्तयतिरेव केचिदाचार्या अविरतदेशविरतप्रमत्ताप्रमत्तयतीनामन्यतमस्याहुरिति दृश्यते ७० परिवृत्तिशता ५१

वृत्त्यासौ प्रमत्ताप्रमत्तयोः गत्वा चापूर्वकरणगुणस्थानं ततः परं ७१ क्लीबस्त्री
वेदौ हास्यादिषट्कं पुंवेदमप्ययक्रमात् प्रत्याख्यानाप्रत्याख्यानसंज्वलनाः क्रुधः
७२ तथैव त्रिविधमानं मायां च त्रिविधां तथा द्वितीयतृतीयौ लोभौ विंशतिः
प्रकृतिरिमा ७३ शमयित्वा गुणस्थाने नवमे दशमे ततः शमी संज्वलनं लोभं
शमयत्यपि दुर्जयं ७४ उपशमश्रेणिस्थापना ॥ एकं क्षणं जघन्येनोत्कर्षेणां
तर्मुहूर्त्तकं उपशांतकषायः स्यात् ह्येव नियमात्ततः ७५ अद्धाक्षयाद्भवांता
द्वा पतत्यद्धाक्षयात् पुनः पतन् पश्चानुपूर्व्यासौ याति यावत्प्रमत्तकं ७६ गुणस्था
नद्वयं याति कश्चित्ततोप्यधस्तनं कश्चित्सासादनभावं प्राप्य मिथ्यात्वमप्यहो
७७ नवक्षयाद्यः पतति सत्वाद्यक्षण एव हि सर्वाण्यपि बंधनानि करणानि प्रवृत्त
येत् ७८ गुणस्थानस्यास्य योक्ता स्थिति रेकं क्षणं लघुः अंतर्मुहूर्त्तः सा
याज्जीविताक्षयात् ७९ कुर्याद् उपशमश्रेणिमुत्कर्षादेकजन्मनि द्वौ वारौ चतु
रो वारांश्चांगी संसारमावसन् ८० श्रेणिरेकैव एकभवे भवेत्सिद्धांतिनां मते
क्षपकोपशमकश्रेण्योः कर्मग्रंथमते पुनः ८१ कृतैकोपशमश्रेणिः क्षपक
श्रेणिमाश्रयेत् नवेतत्रद्विः कृतोपशमश्रेणिस्तु नैव तां ८२ इति कर्मल·ह

उपशमश्रेणि
स्थापना १३

०६त्येकाः॥ क्षीणाः कषायाः यस्मिंस्तु यस्मात् क्षीणकषायकः वीतरागछद्मस्थ गुणस्थानं यदस्य तत् ८३ अपूर्वं
दत्तनोवर्षाष्टकाधिकवयान्: सध्यानः क्षपकश्रेणिमप्रमादः प्रपद्यते ८४ तथोक्तं कर्मग्रंथलघुवृत्तौ॥ क्षपकश्रेणिप्रतिप
न्नो मनुष्यो वर्षाष्टकोपरिवर्त्ती अविरतादीनामन्यतमोऽत्यंतशुद्धपरिणामउत्तमसंहननः तत्र पूर्वविदप्रमत्तः शुक्ल
ध्यानोपगतोऽपि केचन धर्मध्यानोपगतस्याद्यः तत्क्रमश्चायं॥ सउर्यादिगुणस्थानचउष्कान्यतरेंतद्येत् अंतर्मुह
र्त्तायुगपत्सागनंतानुबंधिनः ८५ ततः क्रमेण मिथ्यात्वं मिश्रं सम्यक्त्वकं तद्येत् अंतर्मुहूर्त्तायुगपदन्यते कृतकृतक
रणः क्षीणेऽस्मिन् सप्तकेऽत्र सः ८६ बद्धायुः क्षपकश्रेण्यारंभकश्चेन्निवर्त्तते अनंतानुबंधिनाशानंतरं जीवितक्षया
त् ८७ तदा मिथ्यात्वोदयेन स्याद् योऽनंतानुबंधिनः बध्नाति मिथ्यात्वरूपतद्बीजस्याविनाशतः ८८ क्षीणमिथ्यात्वबी
जेऽत्र स्यात् अनंतानुबंधिनो न बंधोऽस्ति क्षितिरुद्धो बीजदग्धे हि नांकुरः ८९ सुरेष्वुत्पद्यतेऽवश्यं बद्धायुः क्षीणसप्तकः
चेत्तदानीमपतितपरिणामो म्रियेत सः ९० निपतत्परिणामस्तु बद्धायुर्म्रियते यदि गतिमन्यतमां याति स विशुद्ध्य
नुसारतः ९१ बद्धायुष्कोऽथवाऽबद्धायुः क्षपको म्रियते न चेत् नियमात्सप्तमे क्षीणे विश्राम्यति तथाप्यसौ ९२ सकलक्ष
कश्चैव विधायसप्तकक्षायं क्षयं नयेत्तु नरकतिर्यगायुषी ततः परं ९३ प्रत्याख्यानाष्टमं तद्येत् गुणे नवमे तस्मिन्न
ष्टक्षपिते क्षपयेदिति षोडशप्रकृतीः ९४ तिर्यग्नरकस्थावरयुगलान्युद्योतमातपं चैव स्यानर्द्धित्रयमाधारणवि
कलैकाक्षजातीश्च ९५ कषायाष्टकशेषं च क्षपयित्वांतये क्रमात् क्लीबस्त्रीवेदहास्यादिषट्कपुरुषवेदकान् ९६
क्रमः पुंस्यारंभकेऽयं स्त्रीउक्षपयितुमात् क्लीवपुंवेदहास्यादिषट्कं नपुंवदं ततः क्रमात् ९७ ततः संज्वलन

क्रोधमानमाया अपि लोभनयेत् ततः संज्वलनं लोभं क्षपयेद्दशमे गुणे ९८ ततोऽपद्वादशे
क्षीणकषायाख्ये गुणे सुमान् निद्रां च प्रचलां चास्यांतये दंतादिमक्षणे ९९ पंचज्ञानावर
णानि चतस्रो दर्शनावृत्तीः पंचविघ्नांश्च क्षणेऽन्त्ये क्षपयित्वा जिनो भवेत् १०० क्षपकश्रेणि
स्थापना॥ योगो नामात्मनो वीर्यं तत्स्याद्द्विविधं यतः वीर्यांतरायक्षयणक्षयोपशम
संभवात् १ योगो द्विधा सकरणोऽकरणश्चेति कीर्त्तितः तत्रैकेवलिनो ज्ञेयदृश्येषु
खिलवस्तुषु २ उपयुंजानस्य किल केवले ज्ञानदर्शने योऽसावप्रतिघो वीर्यविशे
षोऽकरणः स तु ३ अयं चनात्राधिकृतो योगः सकरणस्तु यः मनोवाक्कायकरणहेतु
कोऽधिकृतोऽत्र सः ४ केवल्युपेतस्तैर्योगैः सयोगीकेवलीन चेत् सयोगिकेवल्याख्यं स्या
द्गुणस्थानं च तस्य यत् ५ मनोवाक्काययोगांश्चैवं योगाः केवलिनोऽपि हि भवंति कार्यि
कस्तत्र गमनागमनादिषु ६ वाचिको यतमानानां जिनानां देशनादिषु भवत्येवं
मनोयोगोऽप्येषां विश्वोपकारिणं ७ मनःपर्यायवद्भिर्वा देवैर्वानुत्तरादिभिः पृष्ट
स्य मनसार्थस्य कथनं मनसोत्तरं ८ नास्ति योगोऽस्यैत्ययोगी सा दृक्ताग्यश्च केवली
गुणस्थानं भवेत्तस्यायोगिकेवलिनामकं ९ तद्वैवम् अंतर्मुहूर्त्तशेषायुः सयो
गीकेवली किल जेत्राणातीतं प्रतिपित्सु ध्यानं योगान् रुणद्धि सः १० तत्र पूर्वं वाद

क्षपकश्रेणिस्थापना १४

रेण काययोगेन बादरौ रुणद्धि वाङ्मनोयोगौ काययोगं ततश्च तं ११ सूक्ष्मक्रियं चानिवृत्ति शुक्लध्यानं विभावयन् सूक्ष्मात्
स्वांगयोगेन सूक्ष्मौ मानसवाचिकौ १२ रुणद्ध्यथो काययोगं स्वात्मनैव च सूक्ष्मकं स्यात्तदा त्रिभागोन देहव्यापिप्रदेश
कः १३ शुक्लध्यानं समुच्छिन्नक्रियमप्रतिपाति च ध्यायन्पंचह्रस्ववर्णोच्चारमानं स कालतः १४ शैलेशीकरणं याति
स्वप्राप्तो भवतस्ततो योगव्यापाररहितोऽयोगी सिध्यत्यसौ ततः १५ आद्यं द्वितीयं तुर्यं च गुणस्थानान्यमूनि वै गच्छंत
मनुगच्छंति परलोके शरीरिणं १६ मिश्रदेशाविरताद्यन्येकादशपराणि च सर्वथा त्वपरित्यज्य जीवा यांति परं भवं १
७ तत्र मिश्रे स्थितः प्राणी मृतिं नैवाधिगच्छति सुदेशाविरतादीनि यावत्क्षीणं निवर्तयेत् तृतीयं गुणस्थानं द्वादशं
च त्रयोदशं विनान्ये ह्येकादशसु गुणेषु म्रियतेऽसुमान् १९ स्तोका एकादशगुणस्थिता उत्कर्षतोऽपि यत् चतुःपंचाश
देवामी युगपत्संभवंति हि २० तेभ्यः संख्यगुणाः क्षीणमोहास्ते त्वष्टयुक्शतं युगपत्स्युरष्टमादित्रिगुणस्थास्ततोऽधिका
: २१ मिथस्तुल्याश्च यच्छ्रेणिद्वयस्था अपि संगता स्युर्द्विदशाप्युत्तरशतं प्रत्येकं त्रिषु तेषु ते २२ योग्यप्रमत्तप्रमत्ता स्तेभ्यः
संख्यगुणाः क्रमात् यत्ते मिताः कोटिकोटिशतकोटिसहस्रकैः २३ पंचमस्था द्वितीयस्था मिश्राश्चाविरताः क्रमात् प्र
त्येकं स्युरसंख्येयगुणास्तेभ्यस्त्वयोगिनः २४ स्युरनंतगुणा मिथ्यादृशस्तेभ्योऽप्यनंतकाः इदमल्पबहुत्वं स्यात्सर्वत्रोत्कर्ष
संभवे २५ विपर्ययोऽप्यन्यथा स्यात् स्तोकाः स्युर्जातुचिद्यथा उत्कृष्टशांतमोहेभ्यो जघन्याः क्षीणमोहकाः २६ एवं स्या
त्साद्यनादिष्ट विभाव्यः मिथ्यात्वं कालतोऽनादिमांतं स्यात्सादिसांतकं अनाद्यनंतं च न तत्साद्यनंतं तु संभवेत् २७ ५२
स्यादाद्यं तत्र भव्यानामनापूर्वसदृशां द्वितीयं प्राप्य सम्यक्त्वं पुनर्मिथ्यात्वमीयुषां २८ स्यात्तृतीयमभव्यानां सदामि

थ्यात्ववर्त्तिनां आनंत्यासंभवात्सादेस्तुर्यं युक्तमसंभवि २९ सासादनं चोत्कर्षेण षडावलिमितं पुरा तुर्यं मितं समधिक
त्रयस्त्रिंशत्पयोधिभिः ३० सर्वार्थसिद्धदेवत्वे त्रयस्त्रिंशत्पयोनिधीन् स्थित्वाविरतसम्यक्त्व ततोऽत्राप्यागतोऽसकौ ३१
यावद्द्वयापि विरतिं नाप्नोति तावदप्ययत् तुर्यमेव गुणस्थानमुररीकृत्य वर्त्तते ३२ किंचिन्न्यूनवाष्टाब्द पूर्वकोटि
मितं मतं त्रयोदशं पंचमं च गुणस्थाने उभे अपि ३३ अंतिमं ह्रस्वपंचवर्णमात्रं रूपैः किलाक्षरैः अविलंबोच्चरितयो
च्चारितो प्रथमं भवेत् ३४ आंतर्मुहूर्तिकानि स्युः शेषाणि ह्यप्यमूनि च स्यात्पुनः प्राप्तिरूपमेषामुच्यतेंतरं ३५ जघ
न्यं सास्वादनस्य पल्यासंख्यांशसंमितं शेषेषु च दशानां स्यादंतर्मुहूर्तमंतरं ३६ मिथ्यात्वस्यात्तदुत्कृष्टं द्विषट्षष्टिपयो
धयः साधिकाः कथितास्तत्र श्रूयतां भावनात्विदं ३७ अनुभूय स्थितं कश्चित्सम्यक्त्वस्य गरीयसीं मिश्रं ततो मुहू
र्तमनुभूय ततः पुनः ३८ षट्षष्टांभोनिधिमितां सम्यक्त्वस्य गुरुस्थितिं समाप्य कोऽपि मिथ्यात्वं जातु याति तदा हि तत्
३९ देशोनपुद्गलपरावर्त्तार्द्धप्रमितं मतं द्वितीयादीनां दशानां गुणानां ज्येष्ठमंतरं ४० क्षपकस्यांतरं जातु न स्यात्त्रिष्टष्टमा
दिषु सकृत्स्यात्क्षीणमोहादित्रयेऽप्यंतरं न हि ४१ इति गुणः दश पंचाधिका योगाः सप्तस्युस्तत्र कायिकाः चत्वारो मान
सास्तावंतश्च वाचकाः ४२ औदारिकस्तन्मिश्रः स्याद्वैक्रियस्तेन मिश्रितः आहारकस्तन्मिश्रः सप्तमस्तैजसकार्म
णः ४३ पर्याप्तानां नृतिरश्चामौदारिकाभिधो भवेत् स्यात्तन्मिश्रस्त्वपर्याप्ता पर्याप्तानां तथोच्यते ४४ कार्मणेन वैक्रिये
णाहारकेण त्रिविधा औदारिकमिश्रकाययोगं योगीश्वराः जगुः ४५ औदारिकांगनामादि तादृक्कर्मनियोगतः
उत्पत्तिदेशं प्राप्तेन तिरश्चा मनुजेन वा ४६ यदौदारिकमारब्धं न च पूर्णीकृतं चेत् तावदौदारिकमिश्रः कार्मणेन सह

ध्रुवं ४७ तथोक्तं॥ निर्युक्तिकारेण शस्त्रपरिज्ञाध्ययने॥ तेएण कम्मएणं आहारेइ अणंतरं जीवो तेण परं मिस्सेणं जा
व सरीरस्स निप्फत्ती ४८ ननु मिश्रत्वमुभयनिष्ठमौदारिकं यथा मिश्रं भवेत् कार्मणेन तथा तेनापि कार्मणं ४९ सत
औदारिकमिश्रमेवेदं कथमुच्यते अस्य कार्मणमिश्रत्वमपि किं नाभिधीयते ५० अत्राहुः॥ आसंसारकार्मणस्याविच्छि
न्नत्वेन सर्वदा सकलेष्वपि देहेषु संभवेदस्य मिश्रिता ५१ ततश्च कार्मणमिश्रमित्युक्ते निर्णेतुं नैव शक्यते किमौदारि
कसंबंधि किं चापरशरीरजं ५२ औदारिकस्य चोत्पत्तिं समाश्रित्य प्रधानता कादाचित्कतया चास्य प्रतिपत्तिरसंशया
५३ तदौदारिकमिश्रत्वव्यपदेशस्य यौक्तिकः न तु कार्मणमिश्रत्वव्यपदेशस्तथाविधः ५४ यदाप्यौदारिकदेहधरो
वैक्रियलब्धिमान् पंचाक्षतिर्यग्मनुष्यश्च पर्याप्तो बादरानिलः ५५ वैक्रियांगमारभते न चापूर्णीकृतं भवेत् तदौदारिक
मिश्रं स्याद्वैक्रियेण सह ध्रुवं ५६ एवमाहारकारंभकाले मत्तलब्धिशालिनः सदाहारकदेहेन मिश्र औदारिको भवेत् ५७
यद्यप्यत्रोभयत्रापि मिथः स्यादेव मिश्रिता तथाप्यारंभकत्वेनौदारिकस्य प्रधानता ५८ तत औदारिकेणैव व्यपदेशोऽपि न
वैक्रियाहारकाभ्यां व्यपदेशो जिनैः स्मृतः ५९ मतं सिद्धांतिनामेतत् कर्मग्रंथविदः पुनः वैक्रियाहारकमिश्रे एव प्राहु
रिमे क्रमात् ६० यदारंभे वैक्रियस्य परित्यागे च तस्य ते वदंति वैक्रियं मिश्रमेवमाहारकेऽपि च ६१ वैक्रियदेहपर्याप्त्या प
र्याप्तस्य शरीरिणः वैक्रियः काययोगः स्यात् मिश्रस्तद्विधानवेत् ६२ यथा यादृशायां स्यान्मिश्रो नारकनाकिनां योगः स
म्यक् कार्मणेन सह स्याद्वैक्रियमिश्रकः ६३ तथा यदा मनुष्यो वा वा तिर्यक्पंचेंद्रियोऽथवा वायुर्वा वैक्रियं कृत्वा कृतका ५४
र्योऽयत्त्यजेत् ६४ औदारिकशरीरांतः प्रवेष्टुं यतते तदा योगो वैक्रियमिश्रः स्यात् सममौदारिकेण च ६५ मिश्रीभा

वो यदप्यत्रोभयनिष्ठस्तथाप्यसौ प्राधान्याद्वैक्रियेणैव स्यातो नौदारिकेण तु ६६ प्राधान्यं तु वैक्रियस्य प्रारंभे निरूपि
तं ततः औदारिकेऽनुप्रवेश एतस्यैव बलेन यत् ६७ आहारकांगपर्याप्त्या पर्याप्तानां प्तानां शरीरिणां आहारकः काय
योगः स्यादुक्तः पूर्वर्षिणां ६८ आहारकं वपुः कृत्वा कृतकार्यस्य तस्य तु त्यक्तुकामस्य प्रविशतस्तदाहारकमि
श्रकः ६९ द्वयोः समेऽपि मिश्रत्वे बलेनाहारकस्य यत् औदारिकेऽनुप्रवेशस्तेनेत्थं व्यपदिश्यते ७० तैजसं कार्म
णं चेति द्वे सदा सहचारिणी ततो विवक्षितः सैको योगस्तैजसकार्मणः ७१ अंतरां विग्रहगतावथ केवलिनं पु
नः समुद्घाते समयेषु स्यात् त्रितीयादिषु त्रिषु ७२ एवं निरूपितास्सप्तयोगाः कायसमुद्भवाः अथ चित्तवचोजातां श्र
णुश्चतुरो ब्रुवे ७३ सत्योऽथासत्यमृषा न सत्यो न मृषापि च मनोयोगश्चतुर्द्धैवं वाग्योगोऽप्येवमेव च ७४ तत्र च संत
इत्यभिमीयंते पदार्था मुनयोऽथवा तेषु साधुहितं सत्यं मनःसंचरतो यथा ७५ पदार्थानां हितं तत्र यथावस्थितचिं
तनात् मुनीनां च हितं यस्मान्मोक्षमार्गैकसाधनं ७६ स्वतो विप्रतिपत्तिर्वा वस्तुस्थापयितुं किल सर्वज्ञोक्तानु
सारेण चिंतनं सत्यमुच्यते ७७ यथास्ति जीवसद्रूपो व्याप्यस्थितस्तनुं भोक्ता स्वकर्मणां सत्य मित्यादि परिचिंतनं
७८ प्रश्ने विप्रतिपत्तौ वा स्वभावादुक्तवस्तुषु विकल्पितं जैनमतोत्तीर्णं यत्तदसत्यकं ७९ नास्ति जीवो यथैकांत
नित्योऽनित्यो महानणुः अकर्त्ता निर्गुणो सत्यमित्यादि परिचिंतनं ८० किंचित्सत्यमसत्यं वा यस्यां तूभयधर्मयुक्
स्यात्तत्सत्यमृषा मिश्रं व्यवहारनयाश्रयात् ८१ यथान्यद्रुमिश्रेषु बहुष्वशोकशाखिषु अशोकवनमेवेदं मित्या
दिपरिचिंतनं ८२ सत्त्वात्कतिपयाशोकतरूणामत्र सत्यता अन्येषामपि सद्भावादवेद सत्यतापि च ८३ न वेद सत्य

मेवेदं निश्चयापेक्षया पुनः विकल्पितस्वरूपस्या सत्यावादिह वस्तुतः ७४ विमर्शप्रतिपत्तिरिषासां स्वरूपमात्रचिंतनं उ
क्तनयद्वयेण योगात्सत्यं न मृषा चेनतत् ७५ यथा चैत्राद्यावनीया गौरनेयो घटस्ततः पर्यालोचन मित्यादि स्यादस
त्यामृषाभिधं ७६ व्यवहारापेक्षयैव एष्य तदुदीर्यते निश्चयापेक्षया सत्ये सत्ये चांतर्भवेदिदं ७७ तथाहि आ
यच्चेत्यादि संकल्प्य दंभेन विदधीत चेत् अंतर्भवेत्तदासत्ये सत्ये पुनः स्वभावतः ७८ सत्यमितस्माज्ञापनीयं वाग्यो
गस्य विशेषतः भाविताश्चिंतनभेदा भाष्यास्तत्र तु जल्पने ७९ एवं मनोवचोयोगाः स्युः प्रत्येकं चतुर्विधा ततो योगाः
पंचदश व्यवहारनयाश्रयात् ८० किमु कश्चिद्विशेषोस्ति भाषावाग्योगयोर्ननु भाषाधिकारो यस्तोक्तः सत्वे वाग्यो
गतः पृथक् ८१ अत्रोच्यते सुप्यतेऽनियोगात्स्यादिति व्युत्पत्तियोगतः भाषाप्रवर्त्तको जंतुप्रयत्नो वाग्योग उच्यते
८२ भाषात्वेनापादिताया भाषाद्रव्यसंततिः सा भाषास्यादतो भेदो भाषावाग्योगयोः स्फुटं ८३ तथोक्तं भाष्य
कइहेतो गिण्हइ य काइएणं निसिरइ तह वाइएण जोएणंति अत्र कश्चिदाह तत्र कायिकेन गृहीतानीत
घक्तं तस्यात्मव्यापारस्वरूपत्वात् निसृजति उक्तं एवं वाचिकेन कोयं वाग्योग इति किं वाग्व्यापारपत्न अहो स्वि
त् हि समर्हेउः कायसंरंभ इति यदि प्रथमो विकल्पः स खल्वयुक्तस्तस्य योगत्वानुपपत्तेस्तथा च नवा केवलाजीवव्या
व्यापारस्तस्या पुद्गलमात्रपरिणामस्वरूपत्वात् रसादिवत् योगश्चात्मनः शरीरवतो व्यापार इति न च तया भाषानि
सृजतीत्यापन्नमनिष्टं चैतदत्रोच्यते नाभिप्रायापरिज्ञानादिदमनुयोगविधानं एव वाग्योगो मनोयोगश्चेति का
यव्यापारस्वरूपस्य सिद्धवत्तदभावात्ततश्चात्मनः शरीरव्यापारे सति येन शब्दद्रव्योपादानं करोति स कायिकः
परस्रजते किं तु सैव निसृज्यत इत्युक्तं अथ द्वितीयं पक्षः ततः स कायव्यापार एवेति कृत्वा कायिकेनैव

५५

येन तु कायसंरंभेण तान्येवं मुंचति स वाचिक इति तथा येन मनोद्रव्याणि मन्यते समानस इति कायव्यापार एवा
यं व्यवहारार्थं त्रिधा विभक्त इत्येतोऽदोषः अथ प्रसंगतो भाषास्वरूपं वक्ति सापि हि चतुर्विधोक्ता या येन स
त्यासत्यादिभेदतः ८४ संतो जीवादयो भावाः संतो वा मुनयोथवा मूलोत्तरगुणास्तेभ्यो हितासत्याभिधीयते ८५
अयं भावः मुक्तिमार्गाराधनीया सा गीः सत्योच्यते हिता सा तु सत्याप्यसत्येव यान्येषामहितावहा ८६ असत्या
दिनवेऽषा मुक्तिमार्गविराधनी द्विस्वभावा तृतीया स्यान्नाराधनविराधनी ८७ उक्तं च सच्चादिया सच्चामिह संतो
मुनयो गुणा पयत्या वा तव्विवरिया मोसा मीसा जा तदुभयसहावा ८८ अणहिगया जा तीसु वि सद्दो च्चिय केवलो
असच्चमोसा इति तत्र सत्या दशविधा प्रज्ञप्ताः परमर्षिभिः एभिः प्रकारैर्दशभिर्वदन्सत्याधिराधकः
८९ तथाहुः जणवय१ सम्मय२ ठवणा३ नामे४ रूवे५ पडुच्चसच्चे६ य ववहार७ भाव८ जोगे९
दसमे ओवम्मसच्चे य १० ११२ तस्मिंस्तस्मिन् जनपदे वचोर्थप्रतिपत्तिकृत् सत्यं जानपदं पिच्चं कोंकणादौ य
थापयः १ नवेत्संमतसत्यं व यत्सर्वजनसंमतं यथाम्भोजं पंकजत्वेप्यरविंदादि पंकजं २ तदन्नवेत्स्थापनासत्यं
स्थापितं तत्स्मृतीतिकृत् यथैककपुरो बिंदुद्वययुक्तः शतं भवेत् ३ अर्हदादिविकल्पेन कर्मलेप्यादिकं हि
यत् स्थाप्यते तदपि प्राज्ञैः स्थापनासत्यमीरितं ४ यद्यस्याभिमितं नाम नामसत्यं तु तद्भवेत् अवर्धयन्नपि
कुलं यथास्या कुलवर्धनः ५ तत्तद्वेषाद्युपादानाद्रूपसत्यं भवेदिदं यथात्र मुनिनेपथ्यो दांभिकोप्युच्यते मुनिः
६ वस्त्वंतरं प्रतीत्यस्याद्दीर्घता ह्रस्वतादिकं यदेकत्र तत्प्रतीत्यसत्यमुक्तं जिनेश्वरैः ७ दैर्घ्यं यथानामिकाया अ

धिकस्त्यकनिष्ठिको तस्यापेक्षयाद्यस्तु मध्यमामधिकस्तु ८ यथा चैत्रस्य पुत्रत्वं स्यात्तत्पितुरपेक्षया पितृत्वमपित
स्य च स्वपुत्रस्यापेक्षया ९ विवक्षया यल्लोकानां तस्मात्सत्यं व्यवहारतः गलत्यमत्रं शिखरी दह्यतेऽनुदरा कनी १०
न्यूनत्वस्य त्वरणादी नाम मत्रोदकयोरपि अविभेदं विवक्षित्वा लोको ब्रूते तथाविधं ११ संभोगबीजसंभूतो दराभावे
दं तिच १२ भावो वर्णादिकस्तेन सत्यं भावतो यथा नैकवर्णोपिनी
लस्य धवलत्वाद्बकोदरित १३ स्कंधस्कंधेषु सर्वेषु सर्ववर्णरसादयः निश्चयाद्व्यवहारस्तु प्रबलेन प्रवर्त्तते १४ यो
गाद्वस्तुसंबंधो योगसत्यं ततो भवेत् छत्रयोगाद्यथा छत्री छत्राभावेपि कर्हिचित् १५ इदं साधर्म्यमौपम्यं तेन सत्यं
तु रूपसा काव्येषु विदितं यद्वत्तटाकोऽयं पयोधिवत् १६ मृषा भाषापि दशधा क्रोधमानविनिस्सृताः माया लोभ प्रेम हा
स्य भय द्वेष विनिःसृताः १७ आख्यायिकानिःसृता तु कथास्वसत्यवादिनः चौर्यादिनाख्यातोपघात विनिः
सृता १८ तथाहुः कोहे माणे माया लोभे पेज्जे तहेव दोसेय हासे भय अक्खाइय उवघाइयणिस्सियादसमा । १९ सत्य
मृषापि दशधा प्रथमोत्पन्नमिश्रिता विगतमिश्रिता चान्यो त्पन्नविगतमिश्रिता २० जीवाजीवमिश्रे तत्र प्रथमोत्प
न्नमिश्रिता उत्पन्नानामनिश्चितसंख्यानं वदतो भवेत् २१ यथात्र नगरे जाता न्यूनं दशाद्य दारकाः मृतांस्तान्वदतोप्ये
वं भवेद्विगतमिश्रिता २२ शंखशंखनकादीनां राशौ तान्जीवतो बहून् दृष्ट्वा स्वांश्च मृतान्जीवराशावुक्तौजीव
मिश्रिता २३ तत्रैव स्वमृतान्भूरी दृष्ट्वा स्वल्पांश्च जीवतः अजीवराशिरित्येवं वदतोजीवमिश्रिता २४ एतावंतो ५६
ऽजीवंत एतावंतो मृता इति तत्रानिश्चित्य वदतो जीवाजीवविमिश्रिता २५ अनंतकायनिकरं दृष्ट्वा प्रत्येकमिश्रि

तं अनंतकायं तं सर्वं वदतोऽनंतमिश्रिता २६ एवं प्रत्येकनिकरमनंतकायमिश्रितं प्रत्येकं वदतः सर्वं भवेत्प्रत्ये
कमिश्रिता २७ अद्धाकालः स च दिनं रात्रिर्वा परिगृह्यते यस्यां स मिश्रितो साद्धा मिश्रिता जायते यथा २८ कंचनत्व
रयन्कश्चिद्वदेदुत्तिष्ठ भो लघु रात्रिर्वा परिगृह्यते जातेति दिवसे रात्रौ च रविरुद्गतः २९ अद्धाद्धैकदेशः स्या
द्रात्रेर्वा दिवसस्य वा सा मिश्रिता यया ह्यद्धा मिश्रिता स भवेदिह ३० कश्चिद्यथाद्यपौरुष्यां कंचनत्वरयन्वदेत् ज्वर
स्व जातो मध्याह्न एवमेव निशास्वपि ३१ यात्वसत्यामृषा मिश्रा भाषा सापि जिनेश्वरैः प्रज्ञप्ता द्वादशविधा विविधा
तिशयान्वितैः ३२ आमंत्रणाज्ञापनी च याचनी प्रच्छनी तथा प्रज्ञापनी प्रत्याख्यानी भाषा वेच्छानुलोमिका ३३ अन
भिगृहीता भाषा भिगृहीता निश्चयपरा संदेहकारिणी भाषा व्याकृताव्याकृता तथा ३४ हे देवेत्यादिकत्राद्या द्वितीया त्वमि
दं कुरु तृतीयेदं ददस्वेति तुर्या स्यात्पृच्छनोदनं ३५ पंचमी तु विनीतस्य विनेयस्योपदेशनं यथा हिंसाया निवृत्ता जंतवः स्युश्चि
रायुषः ३६ उक्तं च पाणिवहाउ नियत्ता हवंति दीहाउया अरोगाय एमाई पन्नत्ता पन्नवणी वीयरागेहिं ३७ षष्ठी तु याच
मानस्य प्रतिषेधात्मिका भवेत् सप्तमी पृच्छतः कार्यं स्वीयानुमतिदानतः ३८ कार्यं यथारभमाणः कश्चित्कंचन पृ
च्छति स प्राहेदं कुरु लघु ममाप्येतन्मुखं स्वख ३९ उपस्थितेषु बहुषु कार्येषु युगपद्यदि किमिदानीं करोमीति
कश्चित्कंचन पृच्छति ४० स प्राह सुंदरं यत्ते प्रतिभाति विधेहि तत् भाषानभिगृहीताख्या सा प्रज्ञप्ता जिनेश्वरैः
: ४१ अभिगृहीता सत्रैव नियतार्थावधारणं यथाधुनेदं कर्त्तव्यं न कर्त्तव्यमिदं पुनः ४२ अनेकार्थवादिनी तु
भाषा संशयकारिणी संशयः सैंधवस्योक्तौ यथा लवणवाजिनोः ४३ व्याकृता तु भवेद्भाषा प्रकटार्थनिश्चायिनी

अल्पा स्तनागमोरार्घ्यो ऽथवाऽसंख्या स्युरसंख्यिता ४४ आद्यास्त्रिंदशविधस्फुर्याद्दशधापुनः द्विचत्वारिंशदित्येवं भाषाभे
दाजिनैस्मृता: ४५ स्तोका:सत्यगिर:शेषा स्त्रयोऽसख्यगुणा: क्रमात् अनाषकाश्चतुर्भोपि स्युरनंतगुणाधिका: ४६
इतियोगा: के के जीवा:कियंतस्युरितिदृष्टातपूर्वकं निरूपणं यत्तन्मान मित्यत्र परिकीर्त्तितं ४७ परस्परं कतिपय
सजातीयव्यपेक्षया वस्त्वल्पत्वबहुता मात्रत्वेयाकनीयसी ४८ न्यायसो दिशि कस्यां के जीवा: कस्यां च केऽल्पका:
एवंरूपाल्पबहुता विशेयादिगपेक्षया ४९ प्राप्य इष्टादित्वमंगी जघन्योत्कर्षत:पुन: कालेन यावता प्नोति तस्मा
च्चेस्यात्तदंतरं ५० विवक्षितभवादुत्क्षेऽन्यस्मिंश्चयद्भवांतरे गत्वानुयोपितत्रैव यथासंभवमागति: ५१ जघन्यादुत्क
र्षतश्च वाराने तावतो भवेत: इत्यादियत्रोच्यते सो भवसंवेध उच्यते ५२ सदृशजातीयजीवानां परस्परव्यपेक्षया वस्तु
ते याल्पबहुत्वमहाल्पबहुतात्वसा ५३ भवउत्सुगमं द्वारैरेभि:सदागमज्ञानने नगरमिवसश्रीकं जीवास्तिकाय
निरूपणं विमलमनसां चेतां सीदप्रविश्यपरांमुदं दधउ विविधैरेधैर्व्यक्तीकृतैश्च पदेपदे ५४ विश्वाश्चर्यद कीर्त्ति
कीर्त्तिविजय श्रीवाचकेंद्रांतिषद्राजश्रीतनयोतनिष्टविनय: श्रीतेजपालात्मज: काव्यं यत्किलतत्र निश्चित
जगत्तत्वप्रदीपोपमे सर्गोनिर्गलितार्थसार्थसुभग: पूर्णस्तृतीय:सुखं इतिश्रीलोकप्रकाशे तृतीय:सर्ग:
ग्रंथाग्रं १२३८ व: द्वाराण्येवं वर्णितानि सप्तत्रिंशदितिक्रमात् निर्दिश्यंतेऽथसंसारिजीवेषु स्तिमितत्त्वव १ ज
घतो भाव्यते संसारिषु द्वारकदंबकं आदौ ततो विशेषेण प्रत्येकं भावयिष्यते २ द्विधा संसारिणो जीवा त्रसस्था
वरभेदत: त्रिविधा:स्युस्त्रिभिर्वेदै र्गतिभेदैश्चतुर्विधा: ३ एकद्वित्रिचतु:पंचेंद्रिया इति च पंचधा षोढाकायप्रका
रै:

॥५५॥ द्वाराण्येवं वर्णितानि सप्तत्रिंशदितिक्रमात् निर्दिश्यंतेऽथ संसारि जीवेष्वमूनि तत्र च १ जघतो
भाव्यंते संसारिषु द्वारकदंबकं आदौ ततो विशेषेण प्रत्येकं भावयिष्यते २ द्विधा संसारिणो जीवा त्रसस
स्थावरभेदत: त्रिविधा: स्युस्त्रिभिर्वेदै र्गतिभेदैश्चतुर्विधा: ३ एकद्वित्रिचतु:पंचेंद्रिया इति च पंचधा षो
ढाकायप्रकारै: स्युर्भवंत्येवं च सप्तधा ४ एकाक्षा बादरा: सूक्ष्मा: पंचाक्षा:संज्ञ्यसंज्ञिन: चत्वारोऽमी विकल
स्तै स्त्रिभि:सप्तसमन्विता: ५ चतुष्कैकेंद्रिया:सूक्ष्मा अपर्याप्तान्यभेदत: पंचाक्षा विकलाक्षाश्च भवंतीत्य
वमष्टधा ६ अंडजादिभेदतोऽष्टौ त्रसास्तत्रांडजा: किलपक्षिसर्प्पाद्या रसोत्था मद्यकीटादयोंगिन:
७ जरायुजा नृपगवाद्या यूकाद्या: स्वेदजा मता: संमूर्छजा जलूकाद्या: पोतजा: कुंजरादय: ८ उद्भिज्जा:
खंजनाद्या: देवाद्याश्चौपपातिका: स्थावरेणैकेन युक्ता नवधैत्यंगिनो मता: ९ अथवा नवधा स्थावरा:
पंच पंचाक्षै विकलैर्युता: दशधा विकलै:क्ष्माद्यै: पंचाक्षै: संज्ञ्यसंज्ञिभि: १० स्थावरै र्विकलै: पंचेंद्रिय
श्चवदत स्त्रिभि: एकादशधाऽमी स्यु: कायै: पर्याप्तकापरै: ११ पर्याप्तापर्याप्तकैश्च स्थावरै स्त्रिविधैस्त्रसै:
वदभेदादभवंत्येवं त्रयोदशविधा:किल १२ प्रागुक्ता:सप्तधा पर्याप्तकापर्याप्तभेदत: चतुर्दशविधा जीवा:
स्यु: पंचदशधाप्यमी १३ पंचाक्षा नारैतिर्यंच:स्त्रिविधा वेदभेदत: देवा द्विधा नारकाश्च त्वेवं पंचेंद्रिया नव
१४ द्विविधा बादरकाक्षा: पर्याप्तापरभेदत: सूक्ष्मकाक्षा विकलाक्षा: स्यु:पंचदशसंयुता: १५ तिर्यंच:पंच
धकाक्षा द्विका:पंचाक्षसंज्ञिका: वृंदवनारकाश्चाष्टौ पतेपर्याप्तकापरा: १६ इतिषोडशभेदा: प्रयुक्ता

नवधापंचेंद्रियाश्च पंचेंधेकस्थाः त्रिविधा विकलाएवं स्युः सप्तदशधांगिनः १८ प्रागुक्ता नवधा जीवाः पर्या
प्तापर्याप्तभेदतः भवंत्यष्टादशविधा जीवा एवं विवक्षिताः १९ पंचाक्षा नवधा प्रागष्टदशधा परेंगिनः पर्या
प्तान्याः स्युः जसूक्ष्मैकाक्षाः सविकलेंद्रियाः २० एकोनविंशतिविधा भवंत्येवं शरीरिणः प्रागुक्ता दशधा
पर्याप्तान्या विंशतिधेति च २१ स्थावरा विंशतिः सूक्ष्मान्य पर्याप्तान्यभेदतः चैसन्नवसमायुक्ता एकविं
शतिधांगिनः २२ प्रवेदिताः प्रकाराये एकादशशरीरिणां द्वाविंशतिविधाः पर्याप्तान्यभेदाद्धि धीकृ
ताः २३ एवं विवक्षावशतो जीवा भवंत्यनेकधा जीवानामाश्रयतः स्थानं लोकः सर्वोप्युदीरितः २४ शरी
रपर्याप्त्यादीनि सर्वाण्यप्यविशेषतः संभवंत्याश्रयतोजीव विज्ञेयानि यथागमं २५ इति समासतः सं
सारिजीवनिरूपणं ॥ संसारिणो द्विधोक्ताः प्राक्त्रसस्थावरभेदतः स्थावरास्तत्र पृथ्व्यंबु तेजो वायुमही
रुहः २६ पंचमी स्थावराः स्थावराख्य कर्मोदयाक्किलक्षता शमरुतौ तत्र जिनैरुक्तौ गतित्रसौ २७ इ
ति जीवाभिगमस्याभिप्रायेण आचारांगनिर्युक्ति वृत्त्यभिप्रायेण तु दुविहेत्यादि त्रसा एव जीवाश्च स
जीवा लब्धितस्तु त्रसा गति त्रसाश्च लब्धितो जीवा पुत्रसा इहेति अनेव नारकादयो गतित्रसा इति तात्प
र्यं ॥ वनस्पतिश्च प्रत्येकः साधारण इति द्विधा सर्वेऽपि बादराः सूक्ष्मा विना प्रत्येकभूरुहं २८ एकाद ५८
शैकेंद्रियाः स्युरेवं प्रत्येकसंयुताः अपर्याप्ताश्च पर्याप्ता एवं द्वाविंशतिः कृताः २९ तत्र स्म नोऽग्निप
वनाः साधारणवनस्पतिः एते पर्याप्तपर्याप्ता दशैवं सूक्ष्मदेहिनः ३० सुक्ष्मनामकर्मयोगाद्ये

प्रामाः सूक्ष्मातामिव चर्मचक्षुरगम्यास्ते सूक्ष्माः पृथ्व्यादयः स्मृताः ३१ सूक्ष्माः साधारणवनस्पतयो येत्र
शंसिताः ते च सूक्ष्मनिगोदाख्याः व्यंते श्रुतकोविदैः ३१ अनंतानामसुमतामेकैं सूक्ष्मनिगोदिनां साधा २
रणशरीरं यत्तु निगोद इति स्मृतः ३२ तच्चैकं भवति ह्यासि संबंधिस्तिबुकाकृति औदारिकं स्यात्प्रत्येकं त्वे
षां तैजसकार्मणे ३३ ते सदा ह्युच्छ्वासनिःश्वासाः समप्राहारकारिणः अनंता अति सूक्ष्मेंगो मरंते दंतयातनां
३४ तथोक्तं जं नरए नेरइया इक्कं पावंति गोअमा तिक्कं तं पुण निगोअमज्झे अणंतगुणियं वियाणाहि ३५
सूक्ष्मा अनंतजीवात्मका निगोदा भवंति भुवनेस्मिन् पृथ्व्यादि सर्वजीवा संख्यायकः संमिताश्चासंख्यया ३६
गीति भगवतीवृत्तौ एभिः सूक्ष्मनिगोदैश्च निचितोस्त्यखिलोपि हि लोकोंजनचूर्णपूर्ण समुद्गवत्समंततः ३
७ जीवाभिगमवृत्तौ असंख्येयैर्निगोदैश्च स्यादेकः किल गोलकः गोलकास्तेप्यसंख्येया भवंति भुवनत्र
ये ३८ गोलकप्ररूपणा चैवं षड्दिशं यत्र लोकः स्यात्तत्र संपूर्णगोलकः निष्पद्यते तन्मध्ये च स्यादुत्कृ
ष्टपदं खलु ३९ भूम्यासन्नापवरककोणांतिमप्रदेशकं देशानुकुर्यात्त्रिदिशमलोकावरणेन यः ४०
तत्र खंडस्य गोलस्य निष्पत्तिः सकलस्य न स्याज्जघन्यपदं तस्मिन् स्पृष्टमल्पैर्निगोदकैः ४१ लोकांतवर्यत्र
कुत्रापि संस्थितः स्यान्निगोदकः एकांगुलासंख्य भागमितक्षेत्रावगाहनः ४२ अन्योपि तत्रासंख्येया स्ता
वन्मात्रावगाहनाः अन्योन्यानुप्रवेशेन स्थितास्संति निगोदकाः ४३ तत्रान्यापेक्षया शश्वैः स्पृष्टं जीव
प्रदेशकैः विवक्षणीयमुत्कृष्टपदमेकप्रदेशकं ४४ तस्यामेव निगोदाव गाहनायां समंततः अन्य

निगोदाः षट्त्रिंशति प्रदेशवृद्धिहानितः ४५ विवक्षितनिगोदस्य मुत्कृष्टांश्रित्य प्रदेशकान् आकृष्याधापराने
ते स्वस्थिते र्निगोदकैः ४६ विवक्षितममुंचद्भिः स्वउत्कृष्टपदं किल एकोनिष्पाद्यते गोलो ह्यसंख्येयनि
गोदकः ४७ तथोक्तं उक्कोसपयममोत्तुं निगोअ ओगाहणाए सव्व ओ निप्फाइज्जइ गोलो पएसपरिवुड्ढि
हाणीहिं ४८ अथ गोलकमाश्रित्य तमेव प्राक् लक्षणं अन्यो निष्पाद्यते गोलो मुक्तोत्कृष्टपादं दितस्
४९ निरुक्तगोलकोत्कृष्टपदाश्रयत्रिनिगोदके परिकल्प्योत्कृष्टपदमन्यगोलककल्पनात् ५० इत्येके
क निगोदाव गाहनाप्रमिते किल क्षेत्रे भवति निष्पत्तिरेकैकगोलकस्यवै ५१ विवक्षितनिगोदाव गा
हनायामुत्थैः धिकाः निगोदांशास्तत्प्रदेशहानिस्थित्या व्यवस्थिताः ५२
विवक्षणीयास्त्रगोलकात् तत्रानुप्रविष्टकाः एवं गुरूपदेशेन ज्ञेया गोलकप
द्धतिः ५३ उक्तं हि तत्तो च्चिय गोलाओ उक्कोसपयं मुइत्तु जो अन्नो होइ निगो
यत्तंमि वि अन्नो निप्फज्जइ गोलो ५४ एवं निगोयमित्ते खेत्ते गोलस्स हो
इ निप्फत्ती एवं निप्फज्जंते लोगे गोला असंखिज्जा ५५ स्थापना च इत्या
द्यर्थतो भगवतीशतक ११ उद्देशके १० निगोदानि चिताश्चैतेनंतानंता
गिनिस्तथा निगोदेभ्यो यथा नित्यं नचैकोपि सदीयते ५६ यद्व्यावहा
रिकोगिभ्यो यावंतोयांति निर्वृतिं निर्यांति तावंतोऽनादि निगोदेभ्यः॥



५९

शरीरिणः ५७ तथोक्तं सिज्झंति जत्तिया किर इह संववहाररासिमज्झाओ इंति अणाइवणस्सइ मज्झाओ
तात्तिआतंमि ५८ इत्यादि प्रज्ञापनाद्धेतौ अनंतेनापि कालेन यावंतः स्युः शिवंगताः सर्वेप्येकनिगोदै
कानंतभागमिताह्निते ५९ कालेनभाविनाप्येवमनंता मुक्तिगामिनः विंत्यंते समुदिता सर्वापि नाधिका
स्ततः ६० एवं नता हृद्गभविताकाले सिद्धाः सोपूर्या अपि च शाधिकानंवत्येक निगोदानंतभागतः ६१ त
थाहुः जइयाहोई पुच्छा जिणाणमग्गंमि उत्तरं तइया इक्कस्स निगोअस्सय अणंतभागो उ सिद्धिगओ ६२
निगोदेष्विह येजीवा स्त्रैकेऽव्यावहारिकाः व्यवहाराद्तीतत्वा त्तेऽव्यावहारिकाः ६३ सूक्ष्मान्निगो
दतोऽनादेर्निर्गताएकशोपि ये पृथ्व्यादिव्यवहारं ते प्राप्ता व्यावहारिकाः ६४ सूक्ष्मानादिनिगोदेषु
यांति यद्यपिते पुनः तेप्राप्तव्यवहारत्वा त्तथापि व्यवहारिणः ६५ कदापि ये न निर्याता बहिः सूक्ष्मनि
गोदतः अव्यावहारिकास्तेस्यु र्दरीजातमृताइव ६६ तदुक्तं विशेषणवत्यां अत्थि अणंता जीवा जेहि
न पत्तो तसाइपरिणामो ते वि अणंताणंता निगोअवासं अणुहवंति ६७ सूक्ष्माणं भेदाः २ एभिर्लोको
खिलो व्याप्तः कज्जलेनेव कूंपिका क्वापि प्रदेशो नास्त्येभिर्विहीनः पुद्गलैरिव ६८ इति स्थानं ३ आहा
श्चतस्रस्तिस्रः स्युरेषां पर्याप्तयः क्रमात् पर्याप्तान्येषामथायुः श्वासः कायबलं तथा ६९ त्वगिंद्रियं चेत्या
मीषां प्राणाश्चत्वार ईरिताः संख्यायोनि कुलानां तु एषां गोषां न लभ्यते ७० नतत्र संख्या योनि कुला
नीया बादराणां प्रवक्ष्यते एतेषामपि सर्वासी सर्वसंवृतयोनयः ७१ इति पर्याप्त्यादिद्वारचतुष्टयं

अंतर्मुहूर्त्तमुत्कृष्टा नवत्येषां नवस्थितिः जघन्यास्तु लक्कनव रूपमंतर्मुहूर्त्तकं ७२ तथोक्तं दससहस्स
समासुरनारयाण सेसाणखुड्डुनवो इतिनवस्थिति: ७ सूक्ष्मनिगोदजीवानां त्रिधा कायस्थितिर्भवे
त् अनाद्यंताऽनादिसांतासाद्यंता वेतिभेदतः ७३ सूक्ष्मान्निगोदतोऽनादेर्निर्गता न कदापि ये नैवापि
निर्गमिष्यंति तेषामाद्या स्थितिर्भवेत् ७४ अनंतपुद्गलपरावर्त्तमानानवेदियं संतिवेवंविधा जीवा
येषामेषा स्थितिर्भवेत् ७५ यदुक्तं सामग्गिअभावाओ ववहारियरासिअप्पवेसाओ भवा वित्ते अणंता
जे सिद्धिसुहं न पावंति ७६ निगोदात्सूक्ष्मतो ये च निर्गता न कदाचन निर्यास्यंति पुनर्जातु स्थितिर्ये
षां द्वितीयिका ७७ अनंतपुद्गलपरावर्त्तमानात्वसावपि गतस्य कालस्यानंत्या त्केषांचिज्जाविनि
श्चित ७८ अनादिस्थितिकानस्तु यद्यनंता निगोदितः तदावक्ष्यमाणवनस्पतिकायस्थितिद्वये ग
रूत्तेकायपरावर्त्तं निखिलैर्वनकायिकैः वनस्पतीनां निर्लेपोऽनंतोऽप्यसंभवात् ८० अनार
तं किं च मुक्तिं गच्छद्भिर्भव्यदेहिभिः अवरादेवजगति भव्याभावः प्रसज्यते ८१ मुक्तिमार्गव्यवच्छेदो
प्येतच्चनेष्यते बुधैः संतीति प्रतिपत्तव्यं ततोऽनादिनिगोदिनः ८२ इत्याद्यधिकं प्रज्ञापनाप्रदेशप
दवृत्तितोऽवसेयं पुनर्याम्मान्निगोदं ये नुव्यवहारितां कायस्थितिः स्यात्साद्यंता तेषांतावद्विमा
नतः ८३ उत्सर्पिण्यवसर्पिण्यः संख्यातीताः प्रकीर्त्तिताः कालतः क्षेत्रतश्चाम्याः स्थितेर्मानमथब्रुः
वे ८४ लोकाकाशमिता संख्यखंडानां प्रदेशकाः एकैकस्यापहारेण क्रियमाणाः क्षणे क्षणे ८५ ६०

यावद्भिः कालचक्रैः स्युर्निर्लेपाश्च लतेऽपि हि तावंति तानि स्यात्काय स्थितिरेषा तृतीयिका ८६ कालचक्रा
ण्यसंख्यानि भवंत्येतान्यसंख्यया कालतोऽपि सूक्ष्मतरं क्षेत्रमाहुर्जिनेश्वराः ८७ यतोंगुलमिताकाश
श्रेण्यामत्रप्रदेशकाः गण्यमानाः समानाः स्युरसंख्योत्सर्पिणीक्षणैः ८८ यदाहुः सुहुमोयहोइकालो यहो४
तत्तोसुहुमयरं हवइखित्तं अंगुलसेढीमत्ते उसप्पिणीओ असंखेज्जा ८९ सूक्ष्मस्तोकोऽपिसमयः स्तोकं
कालतः क्षेत्रतोऽपि च स्यात्कायस्थितिरेषैव सूक्ष्मत्वेऽपि तथोक्ततः ९० एकेंद्रियत्वतिर्यक्त्वासंज्ञित्वे
ष्वप्यसंगतः वनस्पतित्वे क्लीबत्वे कायस्थितिमथब्रुवे ९१ आवल्यसंख्यभागस्य यावंतः समयाः खलु
स्युः पुद्गलपरावर्त्ताः तावंतः कायसंस्थितिः ९२ सर्वेषामियमुत्कृष्टा कायस्थितिरुदाहृता जघन्या
भवदंत मर्हूर्त्तमविशेषतः ९३ इतिकायस्थितिः ९ तैजसंकार्मणं चौदारिकं चेति वपुस्त्रयं एषा
दिसूक्ष्मजीवानां प्रज्ञप्तं परमेष्ठिभिः ९४ निगोदानां त्वनंतानामेकमौदारिकं वपुः सर्वसाधारणं हृद्य
प्येकत्वेकमीरिते ९५ इति देहाः ९ एकेंद्रियाणां संस्थानं सर्वेषां हुंडमीरितं तच्चाप्यपविशेषस्तु स्थ
ष्ठाहपजगत्त्रये: ९६ मसूरचंद्रसंस्थाना सूक्ष्मा क्षोणी द्विधापि हि सूक्ष्माः स्तिबुकसंस्थाना आपः प
यहरैः स्मृताः ९७ सूचीकलापसंस्थानं तेजो वायुर्ध्वजाकृतिः सूक्ष्मोनिगोदोऽनियतसंस्थानः परिकी
र्त्तितः ९८ इति जीवाभिगमाभिप्रायः संग्रहणीवृत्तौ च निगोदौदारिकदेहं स्तिबुकाकारमुक्तमिति
ज्ञेयं इति संस्थानं १० अंगुलासंख्यांशमानं सूक्ष्मैकेंद्रियादिहिनां सामान्यतः शरीरं स्यात् द्विशपत

स्तुवक्ष्यते ९९ इति देहमानं २ कषायानां वेदनाया मृत्योश्चेति जिनैस्त्रयः निरूपिताः समुद्घाताः
सूक्ष्मैकाक्षशरीरिणां १०० इति समुद्घाताः १२ एकेंद्रियेषु सर्वेषु विकलेंद्रियकेषु च संख्येयायुर्गर्भ
जेषु तिर्यक्पंचेंद्रियेष्वपि १ तादृशेष्वेव मर्त्येषु तेषु संमूर्छिमेषु च एते विपद्योत्पद्यंते सूक्ष्मा दशविधा अ
पि २ तेजो ऽनिलोद्भवं वर्जं नोत्पद्यंते स्वभावतः मनुष्येष्विति गच्छंति तत्सर्वौकेषु तान्विना ३ इति गतिः
१२ उत्पद्यंते च सर्वौकाः सूक्ष्मैकाक्षेषु ते ऽखिलाः स्वस्वकर्मानुभावेन गरिष्टनवशीकृताः ४ नारका
निर्जरास्तिर्यग्नराश्चासंख्यजीविनः नैषां सूक्ष्मेषु गमनं ० न चाप्यागमनं ततः ५ गतिष्वेवं चतसृषु
संक्षेपात्तु विवक्षिताः द्विगतयो द्व्यागतयो भवंति सूक्ष्मदेहिनः ६ तेजो ऽनिलोद्भवा नृत्वे नोत्पद्यंते स्वभा
वतः ततस्त एकगतयः प्रोक्ता द्व्यागतयो ऽपि च ७ सूक्ष्मेषु पृथ्वीसलिल तेजो ऽनिलेषु जंतवः उत्पद्यंते
च्यवंते च असंख्या निरंतरं ८ वनस्पतौ त्वनंतानामुत्पत्तिविलयौ सदा स्वस्थानतः परस्माच्च त्वसंख्या
नामागमो ऽमी ९ एकस्यापि निगोदस्य संख्यांशानंतजीवकः जायंते म्रियंते चापि किं पुनः सर्वमी
लीने १० तथाहि विवक्षितनिगोदस्य विवक्षितक्षणे यथा असंख्येयतमो भाग एक उद्वर्त्तते ध्रुवं ६१
११ उत्पद्यते ऽन्यस्तथैव द्वितीयसमये ऽपि हि एक उद्वर्त्तते ऽसंख्य भाग उत्पद्यते ऽपरः १२ उद्वर्त्तनोप
पातौ विरवेवं स्यातां प्रतिक्षणं यथैकस्य निगोदस्य संख्यभागस्य सर्वदा १३ तथैवान्यनिगोदाना
मपि त्रैलोक्यवर्त्तिनां उद्वर्त्तनोपपातौ स्तो ऽसंख्यांशस्य पृथक्पृथक् १४ उद्वर्त्तनोपपाताभ्यां न

वश्यामित्यनुक्षणं परावर्त्तंते निगोदा अंतर्मुहूर्त्तमात्रतः १५ जायमानैर्म्रियमाणैरंतर्मुहूर्त्तजीवि
भिः निगोदिभिर्नवनवैः स्युः शून्यास्तु मनागपि न ते १६ तथोक्तं गोलासंखभागो वट्टइ उव्वट्टणोववाए
१३४ मिएगनिगोए निच्चं एवं सेसेसु वि समए अंतोमुहुत्तमित्ता विइ निगोआ एअं विनिद्दिट्ठा पल्लट्टंति नि
गोआ तम्हा अंतोमुहुत्तेणं १८ एषामुत्पत्तिमरण विरहस्तु न विद्यते यज्जायंते म्रियंते वा ऽसंख्यानंतमनि
रंतरं १९ इत्यागति २४ अनंतराप्तिः समये सिद्धिर्वदितबुधैः ज्ञेयैषां प्राच्यशास्त्रेषु विभागेनाविवक्ष
णात् ३० इति द्वारद्वयं २६ कृष्णा नीला च कापोती लेश्यात्रयमिदं भवेत् सर्वेषां सूक्ष्मजीवानामित्युक्तं
सूक्ष्मदर्शिभिः ३१ इति लेश्याः २७ निर्व्याघातं प्रतीत्यैषामाहारः षड्दिगुद्भवः भवेद्व्याघातमाश्रित्य त्रि
चतुष्पंचदिगुद्भवः ३२ इत्याहारदिक् २८ न संहननमेतेषां संभवत्यस्थ्यभावतः मतांतरेण चैतेषां स
वार्त्तमित्युदाहृतं ३३ इति संहननानि २९ सर्वे कषायाः संज्ञास्तु स्युश्चतस्रो ऽथवा दश इंद्रियं चैकमा
स्यात् मतेषां स्पर्शनेंद्रियं ३४ इति द्वारत्रयं ३२ भूतभाविभवद्भाव स्वभावालोचनात्मिका संज्ञा
नैकेंद्रियाणामस्या स्तदेते ऽसंज्ञिनः स्मृताः ३५ इति संज्ञिता ३३ अमी जिनेश्वरैः क्लीव वेदा एव
प्रकीर्त्तिताः वेदस्त्वव्यक्तरूपः स्यादेषामंशात्कषायवत् ३६ इति वेदः ३४ संक्लिष्टपरिणामत्वा
त्सर्वैकेंद्रियदेहिनां मिथ्यादृष्टय एवामी निर्दिष्टाः परमेष्ठिभिः ३७ इति दृष्टिः ३५ मत्यज्ञानश्रुता
ज्ञाने सूक्ष्मैकेंद्रियदेहिनां तत्राप्यत्यंतमस्पष्टे शेषजीवव्यपेक्षया ३८ इति ज्ञाने ३६ चक्षुर्दर्श

नेषेषां मनश्चक्षुर्दर्शने न भवेत उपयोगास्त्रयो ज्ञानद्वयमेकं च दर्शनं २९ निराकारोपयोगाः स्युरचक्षु
र्दर्शनाश्रयात् द्वे ज्ञाने तु साकारा उपयोगाः सूक्ष्मदेहिनः ३० इति द्वारद्वयं २८ आहारकाः स
दाप्येते स्युर्विग्रहगतिं विना तस्यां त्वनाहारकाः अप्येते त्रिचतुरान् क्षणान् ३१ एषामुत्पन्नमात्राणा
मोजआहार ईरितः लोमाहारस्ततो द्विधा अनाभोगज एव च ३२ सचित्तः स्यादचित्तः स्यान्मिश्रया
त्मापि कर्हिचित् आहारे वा तसं नास्ति सदाहारार्थिनो ह्यमी ३३ तथोक्तं प्रज्ञापनायां पुढवी
काइयाणं भंते केवइकालस्स आहारट्ठे समुप्पज्जइ गोयमा अणुसमयं अविरहिए एवं जाव वण
स्सइकाइयाण इति इत्याहारकत्वं ३४ आद्यमेव गुणस्थानमेकं सूक्ष्मशरीरिणां अनाभोगिक
मिथ्यात्ववतामेषां निरूपितं ३४ इति गुणाः ३० दशानामपि सूक्ष्माणां त्रयो योगाः प्रकीर्तिताः
औदारिकस्तन्मिश्रश्च कार्मणश्चापि विग्रहे ३५ इति योगाः ३१ असंख्येयलोकमाननभः
खंडप्रदेशकैः तुल्याः सूक्ष्माग्निपृथ्व्यंबुमरुतः किंतु तत्र च ३६ लोकाकाशमिताः खंडा असंख्ये
याः अपि क्रमात् अग्न्यादिषूत्तरेषु तस्माद्रितमा मताः ३७ पर्याप्तापर्याप्त सूक्ष्मबादरानं
तकायिकाः चत्वारोऽपि स्युरनंत लोकाकाशांशसंमिताः ३८ अयं भावः लोकाकाशप्रदेशेषु ६२
निगोदसत्कजंतुषु प्रत्येकं स्थाप्यमानेषु पर्यंते स्यावनंतशः ३९ तत्रापि बादरसाधारणेभ्यः
पर्याप्तेभ्योऽनंतविदि अपर्याप्ता बादरास्तु असंख्येयगुणाधिकाः ४० बादरापर्याप्तकेभ्यः स

॥ असंख्यघ्नाः सूक्ष्मपर्याप्तकाः संख्यगुणास्ततः ४

स्युः पर्याप्तका इमे असंख्यघ्नाः सूक्ष्मपर्याप्तकाः संख्यगुणास्ततः ४१ इति मानं ३२ सूक्ष्मास्तेजस्का
यिकाः स्युः सर्वस्तोकास्ततः क्रमात् सूक्ष्माः क्ष्मांबुमरुतो विशेषाभ्यधिकाः स्मृताः ४२ असंख्येयलोक
मान नभः खंडप्रदेशकैः तुल्याः सर्वेऽप्यमी किंतु यथोत्तराधिकाधिकाः ४३ असंख्येयगुणाः सूक्ष्मवा
युभ्यः स्युर्निगोदकाः असंख्येयप्रमाणत्वाद्देतेषां प्रतिगोलकं ४४ तेभ्योऽनंतगुणाः सूक्ष्माः स्युर्वनस्प
तिकायिकाः तेभ्यः सामान्यतः सूक्ष्मा विशेषाभ्यधिकाः स्मृताः ४५ स्वस्वजातिष्वपर्याप्तकेभ्यः सं
ख्यगुणा मताः पर्याप्तकाय देहेन्या पेक्षयाभ्यधिकजीविनः ४६ आचारांगवृत्तौ तु सूक्ष्मा अपि पर्याप्त
कापर्याप्तकभेदेन द्विधा एव किंत्वपर्याप्तकनिश्रया पर्याप्तकाः समुत्पद्यंते यत्रैकोऽपर्याप्तकस्तत्र नि
यमादसंख्येयाः पर्याप्ताः स्युरित्युक्तमिति ज्ञेयं अत एवैकेंद्रियाः स्युः सामान्यतो विवक्षिताः पर्याप्ता ए
व भूयांसो जीवाश्रयणाद्यतस्तथा ४८ इति लघ्वल्पबहुता ३३ दिशामपेक्षयाल्पबहुत्वं तेषां न संभ
वेत् अमी प्रायः सर्वलोकापन्नाः सर्वत्र यत्समाः ४९ तथोक्तं प्रज्ञापनावृत्तौ इदं चाल्पबहुत्वं बा
दरानधिकृत्य द्रष्टव्यं न सूक्ष्मान् सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्र समत्वात् इति दिग
पेक्षयाल्पबहुता ३४ उद्धृतः सूक्ष्मजीवानामंतरं यदि विद्यते अंतर्मुहूर्तं सूक्ष्मत्वे जघन्यं कथि
तं जिनैः ५० यदुत्पद्य बादरेषु सूक्ष्मः सन्नुत्पद्य सूक्ष्मतां स्थित्वा तत्रांतर्मुहूर्तं पुनः सूक्ष्मत्वमाप्नुया
त् ५१ उत्कर्षतः कालचक्राण्यसंख्यातानि तानि च निष्पाद्यान्यंगुलासंख्यभागस्थ खांशमितैः क्षणैः ५२

अयं भावः एकस्मिन्नंगुलासंख्यभागे येऽभ्रप्रदेशकाः यावंति कालचक्राणि हृतैस्तैः स्युः प्रतिक्षणं
५३ उत्कर्षतो बादरत्वे तावती वर्णिता स्थितिः तां समाप्य पुनः सोऽन्य शरीरायुक्रमं दोंतरं ५४ सू-
क्ष्मस्योत्कृष्टमस्ता मित्थंपत्तिक्रमंतरं लघुस्यादंतर्मुहूर्त्तमनंतानामितरेषु ५५ तत्र सूक्ष्म-
क्ष्मादिजंतोः सूक्ष्मस्थूलवनस्पतौ गत्वा स्थित्वानंतकालं सूक्ष्मक्ष्मादित्वमीयुषः ५६ वनस्पतेश्च
सूक्ष्मस्यांतरमुत्कर्षतोऽनेहः कालचक्राण्यसंख्येयलोकमानानि पूर्ववत् ५७ तत्र सूक्ष्मक्ष्मा-
दितया त्यद्यसूक्ष्मवनस्पतेः स्थित्वोक्तकालं पुनरपु त्यक्त्वा स्ववनस्पतौ ५८ न संभवति चैतेषा-
मनंतकालमंतरं विना वनस्पतीनन्यत्रानंतस्थित्यभावतः ५९ जघन्यमंतरं त्वेषामंतर्मुहूर्त-
मीरितं क्ष्मादिष्वंतर्मुहूर्त्तं तत्र स्थित्वोत्पन्नो भवेदिह ६० इत्यंतरं ३५ प्रायो भवसंवेधो महात्-
बहुता त्वनेकजीवानां वक्ष्यते इत्थमयं वक्ष्ये जीवप्रकरणांते ६१ वर्णिताः किमपि सूक्ष्मदे-
हिनः सूक्ष्मदर्शिवचनानुसारतः युक्तभेदकथितं विशेषतः लक्ष्यश्रुतगिरावसीयतां ६२ वि-
श्वाश्चर्यकीर्त्तिकीर्त्तिविजयः श्रीवाचकेंद्रांतिषद्राज श्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्म-
जः काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे सर्गो निर्गलितार्थसार्थसुभगः पूर्णश्चतुर्थः ६३
सुखं १६३ इति लोकप्रकाशे चतुर्थः सर्गः समाप्तः ग्रंथाग्रं २८४ अक्षर १६ पं लिपं स्वतो विज-
यन ९८५॥ ॥वर्ण्यंति यत्र सप्तानां बादरैकेंद्रियांगिनः तेवपोटापविम्बु तेजोनिलास्त

थाक्षुमाः १ प्रत्येकाः साधारणाश्च षडप्येते द्विधा मताः पर्याप्ता अपर्याप्तभेदाद् द्वेधा दश बादराः २
बादराख्यनामकर्मोदयाद्ये स्थूलतां गताः चर्मचक्षुर्ग्राह्यमाना बादरास्ते प्रकीर्त्तिताः २ तत्रच अ-
पर्याप्तास्त्वविस्पष्टवर्णाद्या अल्पजीवनात् पर्याप्तानां च वर्णादिभेदैर्भेदाः सहस्रशः ३ बादरापृ-
थिवी द्वेधा मृदुः खरा अपरा भेदाः सप्त मृदोस्तत्र वर्णभेदविशेषजाः ४ कृष्णा नीलारुणा पी-
ता शुक्लेति पंच मृद्भिदः षष्ठी देशविशेषोत्था मृत्स्ना पांडुरिति श्रुता ५ नद्यादिपूरापगमे देशेत्र २
तिपिच्छिले मृदुश्लक्ष्णपंकरूपा सप्तमी पनकीति सा ६ इत्यर्थतः प्रज्ञापनावृत्तौ उत्तराध्ययनवृत्तौ
तु पांडुरिति पांडुः पांडुराईषत्कृष्णवतीत्यर्थः इति वर्णभेदेन षड्विधत्वमुक्तं इह च पांडुरग्रहणेन कृष्णा-
दिभेदानामपि स्वस्थाने भेदांतरसंभवसूचकं पनकोऽत्यंतसूक्ष्मरजोरूपः स एव मृत्तिका पनकमृत्तिका
पनकश्च नभसि विवर्त्तमानः स्यल्लोके पृथ्वीत्वेन रूढत्वाद्भेदेनोपादानमित्याद्युक्तं चत्वारिंशत्खरायाः २
श्च भेदाः प्रज्ञापिताः श्रुतेः अष्टादश मणिभेदास्तथा द्वाविंशतिः परे ७ गोमेद्यकांकस्फटिकलोहि-
ताख्या हरिन्मणिः षष्ठो मसारगल्लः स्याद् सप्तमो भुजमोचकः ८ इंद्रनीलश्चंदनश्च गैरिको हंसगर्भकः सौगंधिक
श्च पुलकः सतश्चंद्रप्रभाभिधः ९ वैडूर्यं जलकांतश्च रुचकांकोपजा इति खरक्ष्माया एव भेदा तन्मध्ये द्वा-
विंशतिस्त्विव १० भूर्नदीतटभित्त्यादेः १ शर्करा पलकर्कराः २ सिकताः सूक्ष्मकणिकाः ३ उपलाः
ग्रावाश्मकाः ४ शिलाः सदाः ५ क्षारभूरूपा ६ लवणं समुद्रजं ७ सुवर्णं ८ रूप्यं ९ ताम्रं १० त्रपु ११

त्रपु १२ सीसकं १२ धातवः १३ वज्रं १४ हरितालश्च १५ हिंगुलश्च १६ मनःशिला १७ प्रवालं १८ पा
रदश्चापि १९ सौवीराभिधमंजनं २० १३ पटलंपुनरभ्राणां २१ तथाताभ्रवालुकाः २२ अन्येप्येवंवि
धाश्चाद्या ज्ञेयाआप्तिवाक्यतः १४ इत्यर्थतः प्रज्ञापनावृत्तौ इतिपृथ्वीकायभेदाः जलभेदाजलंशुद्धं शी
तमुष्णमथावतः क्षारमीषदतिक्षारमम्लमीषत्तथाधिकं १५ हिमावश्यायकरका धूमरीक्ष्मांतरिक्षजं
हमामुद्भिद्तृणाग्रसंज्ञं नाम्नादरतनूदकं १६ घृतेक्षुवारुणीदुग्धोदकंतत्ररसांकितं घनोदध्यादयश्चा
प्येवेतयेनोपिताहृशाः १७ इत्यप्कायभेदाः शुद्धाग्निरत्राभिज्वाला स्फुलिंगांगारविद्युतः अलाता
ल्कामर्मुराख्या निर्घातकणकाभिधाः १८ काष्ठसंघर्षसंभूतः सूर्यकांतादिसंभवाः वह्निभेदाअमी
चाद्या येषामन्येपितथाविधाः १९ इत्यग्निभेदाः प्राच्योदीच्यप्रतीचीन दाक्षिणात्याविदिग्भवाः ऊर्ध्वाध
संभवावाता उद्भ्रामोत्कलिकानिलाः १९ गुंजाझंझाख्यसंवर्त्ता वातोमंडलिकाभिधः घनवात
स्तनुवात स्तत्रोद्भ्रामोऽनवस्थितः २० लहर्यइवपाथोधे वातस्योत्कलिकास्तुयाः रेणुकासुस्फु
टयोगस्त स्यानुकूलिकानिलः २१ गुंजनसशब्दंयोवाति सगुंजावातउच्यते झंझानिलोवृष्टि
युक्तः स्याद्वायोत्यंतनिष्ठुरः २२ आवर्तकस्तृणादीनां वायुःसंवर्त्तकाभिधः मंडलाकृतिरा ६४
मूलो मंडलीवातउच्यते २३ घनोघनपरीणामो धराद्याधारईरितः विरलःपरिणामेन
तनुवातस्ततोप्यधः २४ मंदंमंदंवयोवाति शीतःस्पर्शसुखावहः सउच्यतेशुद्धवात इत्या

द्याःस्युर्भूरिभिदः २५ इतिवायुकायभेदाः क्रमप्राप्तानिरूप्यंते भेदाश्चथवानस्पतेः साधारणस्यप्रत्येक
वपुषश्चयथाक्रमं २६ स्थावराणांसात्मकत्वमनंगीकुर्वतःप्रति आदौवनस्पतिद्वारा स्पष्टंतदुपप 7
द्यते २७ वृक्षादीनांसात्मकत्वे युक्तिर्युक्तोपियुक्तयः वनस्पतेःसात्मकत्वे गम्याःस्वजलदृष्टाअपि २
८ हिमात्रेणाचतोगर्वदर्पणेव्यक्तिपूर्वकं ततस्तदनुसारेण ज्ञेयान्येष्वपिचेतना २९ मूलेसिक्तेषुवृ
क्षेषु फलादिषुरसःस्फुटः सचोद्धामसमंतरेण कथमूर्ध्वंप्रसर्पति ३० रसप्रसर्पणंस्पष्टं सत्यूर्ध्वाम्ल
स्मादिषु तद्भावेतदभावो दृष्टश्चमृतकादिषु ३१ अन्वयव्यतिरेकाभ्यां ततोरसप्रसर्पणं उच्छ्वा
समाक्षिपतियत्र व्याप्यंनव्यापकंविना ३२ उच्छ्वासश्चात्मनोधर्मो निर्विवादमिदंखलु धर्मश्चधर्मिणि
भूते स्याविनाभावतःस्फुटं ३३ किंच दृश्यतेदोहदोत्पत्ति द्रुणामपिनृणामिव यत्नसाध्यफलंत्येते
ऽपिचपूर्यंतिवान्यथा ३४ दोहदश्चात्मनोधर्मः कथंनात्मानमाक्षिपेत् इच्छारूपोदोहदोहिनेच्छा
वंतंविनाभवेत् ३५ पंक्त्यानियतसंकोच विकाशाश्चप्रसुखाश्चपि पंक्तिनंकथमात्मानं नज्ञापयंति
युक्तिभिः ३६ यथातारतम्यमेवं द्रुमेष्वपिनरेष्विव केप्यरंडादिवन्नीचाः केप्याम्रादिवदुत्तमाः ३
७ उत्कटाःकंटकैःकेपि केचिदत्यंतकोमलाः कुटिलाःकेपिसरलाः कुब्जादीर्घाश्चकेचन ३८ द्रु
द्रावर्णगंधरसस्पर्शाः केचिच्चतान्यथा सविषानिर्विषाःकेपि सफलानिष्फलाःपरे ३९ जाताः
केचिदवकर स्थानादौचकेचन केचिच्चिरायुषःशाखाद्यैः केचिच्छिप्रमृत्यवः ४० विनाकर्माणि

नानात्व मिदं युक्तिसंगतं कथं विना कारणनानात्वं कार्यतद्भिन्नं संभवेत् ४१ कर्माणि च कार्यतया सं
न्नं कर्त्तारमेव हि आक्षिपंत्यविनाभूताः कुलालं कलशादिव ४२ वनस्पतेः सात्मकत्वं स्फुटमेव प्र
तीयते जन्मादिधर्मोपितत्वा मनुष्यादिशरीरवत् ४३ अनुमानं पुरस्कृत्य साधयत्यागमोपि वन
स्पतेः सचैतन्यमाचारांगे यथोदितं ४४ इमं पि जाइधम्मयं एयंपि जाइधम्मयं इमं पि वुड्ढिधम्मयं
एयंपि वुड्ढिधम्मयं इमं पि चित्तमंतयं एयंपि चित्तमंतयं इमं पि छिन्नं मिलाइ एयंपि छिन्नं मिलाइ
इमं पि आहारगं एयंपि आहारगं इमं पि अणिच्चयं एयंपि अणिच्चयं इमं पि असासयं एयंपि अ
सासयं इमं पि चओवचइयं एयंपि चओवचइयं इमं पि विपरिणामधम्मयं एयंपि विपरिणामधम्म
यमित्यादि अत्रैकं इदं शब्दवाच्यं मनुष्यशरीरं द्वितीयं चैतच्छब्दवाच्यं वनस्पतिशरीरमित्यनयोर्दृ
ष्टांतदार्ष्टांतिकयोजना वनस्पतेः सचैतन्यमेवं सिद्धमागमात् ततोऽस्य योनिजातत्वमपि सिद्धं
तदुच्यते ४५ तथाहि बीजस्य द्विविधावस्था योन्यवस्था तथापरा तन्मध्ये योन्यवस्थायां सा चैवं परि
ज्ञायते ४६ अंकुरोत्पत्तिक्षणेऽर्वाक् अंकुरनाम्याद्युक्तितः अत्यक्तयोन्यवस्थं च तद्बीजं योनिभूतकं ४७
तत्त्व अंकुरोत्पत्तिनिश्चयेन ध्रुवाज्ञातुं न शक्यते ततोऽनतिशायी बीजं सचेतनमुतेतरत् ४८ योनि
भूतं व्यवहारे यावद्ध्वस्तयोनिकं ध्वस्तयोनित्वजीवत्वा दग्धयोनिभूतमेव हि ४९ यन्नष्टेपि सजी
वत्वे योनित्वं नाशवित् न भवेत् परिनष्टे च योनित्वे सजीवत्वं न संभवेत् ५० एवं च उत्पत्तिस्थानकं

MEMORIAL

जंतोर्यदविध्वस्तशक्तिकं सा योनिस्तत्र शक्तिस्तु जंतूत्पादनयोग्यता ५१ तथोक्तं प्रज्ञापनावृत्तौ अथ
योनिरिति किमभिधीयते उच्यते जंतोरुत्पत्तिस्थानमविध्वस्तशक्तिकं तत्रस्थजीवपरिणमनशक्तिसंप
न्नमिति भावः अतएव श्रुतेपि यवा १ यवयवाश्चापि २ गोधूमं ३ व्रीहिश्च शालयः ५ धान्यानां श्रीजिने ३
शा मुक्ता योनिस्त्रिवार्षिकी ५२ कलाद १ मापाच पल ३ तिल ४ मुग ५ मसूरकाः ६ कुलत्थ ७ तुवरी
८ वृत्तचणका ९ वल्लका १० स्तथाप्युक्ता योनिरेतेषां श्रीजिनैः पंचवार्षिकी ५३ यद्वृत्ती लट्टातसी
शणकं गुकारट्टपककोद्रवाः बीजानि मूलकानां सर्षपावरट्टशालकाः ज्ञ्रयोनिरेतेषां सा सम
सप्तवार्षिकी ५४ षद्वृत्ती इयमत्र भावना कोष्टकादिषु निक्षिप्ते तेषां पिधानशालिनां लिप्तानां मु
द्रितानां चोक्तैव यायोनिसंस्थितिः ५५ तदनुध्वंसते योनि रंकुरोत्पत्तिकारणं न वेहीनमबीजं ते
नास्मं अंकुरितं भवेत् ५६ अंतर्मुहूर्त्तं सर्वेषां सर्षा योनिरूपन्यतः तत्केषांचिद्विचित्रत्वं जायते तमु
हूर्त्ततः ५७ परंतत्सर्वविज्ञेयं व्यवहारपथेन तु व्यवहारानुपूर्व्वोक्तेः कालमानेरचित्तता ५८ इ
दमर्थतः पंचमांगवचसारोद्धारे च ततश्च बीजे च योनिभूतं व्युत्क्रामति सदैव जंतुरपरो वा मूलस्य
श्च कर्त्ता स एव तत्प्रथमपत्रस्य ५९ आर्या इयमत्र भावना बीजस्य निर्वर्तकेन जीवेन स्वायुषः
क्षयात् यद्बीजं स्यात्परित्यक्तमथ बीजस्यतस्य च ६० अंबुकालक्ष्मादिरूपसामग्री संभवेस
ति स एव जीवस्तद्बीजानामौ बद्धाहशाकमेकः ६१ उत्पद्यते तत्र बीजे न्यो वा पृथ्वीकायिकादिकः नि

वहमूलादिनामगोत्रकर्मविज्ञायते ६२ सएवनिर्वर्त्तयति मूलंपत्रंतथादिमं मूलप्रथमपत्रेव त
तएवैककर्तृके ६३ यदागमः जोवियमूलेजीवो सोवियपत्तेपढमयाएत्ति अत्राहपरः नत्वेवमा
दिमदले मूलजीवकृतेसति उत्कृष्टकिशलेनंत कायिकत्वंविरुध्यते ६४ यदागमः सव्वोविकि
सलोखलु उग्गममाणो अणंतओभणिओत्ति अत्रोच्यते बीजमूलतयात्यद्य बीजजीवोथवापरः
करोत्युत्सूनतावस्थां ततोऽनंतरभाविनीं ६५ ध्रुवंकिशलयावस्थां सृजेत्यनंतजंतवः ततश्चते
षुजीवेषु विनष्टेषुस्थितिक्षयात् ६६ सएवमूलजीवस्तां तनुमनंतदेहिनां समापाद्यस्वांगतया
तावद्वर्धयतेकिल ६७ यावत्प्रथमपत्रंस्या त्ततश्चनविरुध्यते किशलेनंतकायित्व मेककर्तृ
कतापिच ६८ चतुर्भिःकलापकं अन्येत्वाचक्षते इहबीजसमुत्सूनावस्थैवप्रतिपाद्यते प्रथ
मपत्रशब्देनतस्याः प्रथमसमुद्भवात् ६९ ततश्च मूलंबीजसमुत्सूना वस्थाचेत्येककर्तृके अने
नचैवंनियमो लभ्यतेसूत्रसूचितः ७० एकजीवकृतेएव मूलेवास्तुनतादृशः नावश्यंमूलजी
वोऽहं शेषंकिशलयादिकं ७१ ततोऽत्रानयमध्यक्षिरूहं जोवियमूलेजीवो सोवियपत्तेपढम
याएइति सव्वोविकिसलओखलु उग्गममाणोअणंतओभणिओ इतिच एतदर्थतः प्रज्ञापनावृ ६६
त्तौ आचारांगवृत्तावपितथैव यदुक्तं यश्चमूलतयाजीवाः परिणमते सएवप्रथमपत्रतया
पीति एकजीवकर्तृके मूलप्रथमपत्रेइति यावत् प्रथमपत्रकंचयासोबीजस्यसमुत्सूनावस्था

समुत्सूनकालापेक्षयैवोच्यते इति नियमप्रदर्शनमेतत् शेषंतुकिशलयादिसकलंनमूलजीवपरिणामाविर्भावित
मेवेत्येवगंतव्यं उत्कृष्टप्रथमोङ्कुरः सर्वसाधारणोभवेत् वर्धमानोयथायोगं स्यात्प्रत्येकोथवापरः ७२ तत्रसा
धारणलक्षणं सामान्यतएवं शरीरोच्छ्वासनिःश्वासाहाराः साधारणाःखलु येषामनंतजीवानां तेस्युःसाधारणां
गिनः ७३ विशेषतस्तुलक्षणंचैवं मूलादिदशकस्यहि यस्यभंगःसमोभवेत् अनंतजीवंतद्ज्ञेयं मूलादिद
शकेखलु ७४ वनस्पतिसप्ततौसमभंगलक्षणमेवमुक्तं खंडिआईचुन्ननिष्फइयाइ वत्तीइजारिसोभंगो सव्वत्थ
समसरूवो केआरतरीइकुत्तोवा ७५ इच्छपुणविसेसोयं समभंगाइत्तिजेसयाकालं तेच्चियअणंतकाया नउणो
जेकोमलत्तेण ७६ मूलादिदशकंत्वेवं मूले१कंदे२खंधे३तयाय४साले५पवाल६पत्तेय७पुप्फे८फलए९बीएविय
१० पत्तेयंजीवठाणाइं ७७ मूलादेर्यस्यभग्नस्य मध्येहीरोनदृश्यते अनंतजीवंतद्ज्ञेयं यदस्मादपितादृशं ७८ ही
रोनामविषमः छेदउद्दंतुरोवा यत्रस्कंधकंदमूल शाखासुखलुवीक्ष्यते त्वचोस्थूलतराकाष्ठात् सात्वचानंत
जीविका ८० येषांमूलकंदपत्र फलपुष्पत्वचांभवेत् चक्राकारःसमच्छेदो भंगोऽनंतात्मकंहितत् ८१ ग्रंथि
पर्वान्विकानंग स्थानंसामान्यतोथवा रजसाछुरितंयस्य नंतकायिकंहितत् ८२ यदागमः चक्कागंभज्जमाण
गंठीचुन्नघणोभवे पुढवीसरिसभेएण अणंतजीवंवियाणाहि ८३ सक्षीरंवापिनिःक्षीरं पत्रंगूढशिरंचय
त् अलक्ष्यमाणपत्रार्द्ध द्वयसंधिचयद्भवेत् ८४ अनंतजीवंतत्सर्वं ज्ञेयमित्यादिलक्षणैः बह्वश्रुतेप्युक्तं
यानि लक्षणान्यपराण्यपि ८५ अयोगोलोयथाध्मातो जातस्तप्ततपनीयसदृक् सर्वोप्यग्निपरिणतो निगोदोपित

धोगिभिः ८६ तत्रापि बादरानंतकायिकाः स्युरनेकधा मुलकश्रृंगबेराद्या प्रत्यक्षाजनचक्षुषां ८७ तथाहि स
वत्रकंदजाई सूरणकंदोय १ वज्रकंदोय २ अल्लहलिद्दाय ३ तहा अल्लं ४ तह अल्लकचूरो ५ ८८ सत्तावरी
६ विरालीउ ७ कुआरि ८ तह थोहरी ९ गलोई अ १० लसणं ११ वंसकरिल्ला १२ गज्जर १३ लूणउ १४ लोढो १५
८९ गिरिकन्नि १६ किसलपत्ता १७ खिरिंसुआ १८ थेग १९ अल्लमुच्छा य २० तह लूणरुक्खछल्ली २१ खिल्ल
हडो २२ अमयवल्ली य २३ ९० मुला २४ तह भूमिरुहा २५ विरुहा २६ तह ढक्कवत्थुलो अ तहा २७ पढं
को २९ कोमलंबिलिया ३० ९१ आलू ३१ तह पिंडालू ३२ हवंति एए अणंतनामेहिं अन्नमणंतं नेयं लक्खण
जुत्तीइ समयाउ ९२ अन्ये पि स्नुही प्रभृतयोऽनंतकायिका अवगंतव्या इत्यादि प्रज्ञापनोक्त वाक्य प्रबंध
तो ज्ञेया इति साधारणवनस्पतिभेदाः प्रत्येकलक्षणं चैवं यत्र मूलादिदशके प्रत्यंगं जंतवः पृथक् प्रत्ये
कनामकर्माद्या स्युः प्रत्येक मिहोच्यते ९३ तथा चाहुर्जीवविचारे एगसरीरे एगो जीवो जेसिं तु ते उ पत्तेया फ
लफुल्लछल्लिकट्ठा मूलापत्ताणि बीआणि ९४ किंच मूलादेर्यस्य भग्नस्य मध्ये हीरः प्रदृश्यते प्रत्येकजी
वं लक्ष्या तदन्यथा पिनाहशं ९५ यत्र मूलस्कंधकंद शाखासु दृश्यते स्फुटं त्वचा तनीयसी काष्ठात् सा त्वक्प्र
त्येकजीविका ९६ तस्य द्वादश भेदाः स्युः प्रत्येकस्य वनस्पतेः यथाप्रसिद्धि तान् कांश्चिद् दर्शयामि समासतः ९७ ६७
वृक्षा १ गुच्छा २ गुल्मा ३ लताश्च ४ वल्ल्यश्च ५ पर्वगाश्चैव ६ तृण ७ वलय ८ हरितकौ ९ औषधि १० जलरुह ११
कुहणा १२ श्च विज्ञेयाः ९८ आर्या वृक्षास्तत्र द्विभेदाः स्युः फलोद्बीजभेदतः एकबीजफलाः केचिद्

भूरिबीजफलाः परे ९९ अंकोल्लजंबूनिंबाम्राः प्रियालसालपीलवः मल्लकी शैलुवकुल भिल्लातक बिभीतकाः
: १०० हरीतकी पुत्रजीवाः करंजारिष्ट किंशुकाः अशोकनागपुन्नाग प्रमुखा एकबीजकाः १ कपित्थतिंदु
कप्लक्ष धवन्यग्रोध दाडिमाः कदंबकुटजालोभ्रः फणस श्चंदनार्जुनाः २ काकोडुंबरिकामातुलिंगास्तिल
कसंज्ञकः कपूपर्ण दधिपर्ण प्रमुखा बहुबीजकाः ३ प्रत्येकमेषां वृक्षाणां प्रत्येकासंख्यजीवकाः मूल
कंदस्कंधशाखा त्वक्प्रवालान्तदीरिताः ४ पुष्पाण्यनेकजीवानि वैकेकोऽगी दले दले प्रत्येकमेकजीवानि बी
जानि च फलानि च ५ एकः पूर्णतरुस्कंधव्यापी भवति चेतनः मूलादयो दशाप्यस्य भवंत्यवयवाः किल ६ तथो
क्तं सूत्रकृतांगवृत्तौ श्रुतस्कंधे २ अध्य० ३ आहारपरिज्ञाध्यापकस्यार्थः अथापरमेतदाख्यातं तद्दर्शय
ति इहास्मिन् जगत्येके न तु सर्वे तथा कर्मोदयवर्तिनो वृक्षयोनिकाः सत्त्वा भवंति तदवयवाश्रिताश्चापरे वन
स्पतिरूपा एव प्राणिनो भवंति तथाहि योऽसौ एको वनस्पतिजीवः सर्ववृक्षावयवव्यापी भवति तस्य चापरे तदव
यवेषु मूलकंदस्कंधत्वक्शाखाप्रवालपुष्पपत्रफलबीजभूतेषु दशसु स्थानेषु जीवाः समुत्पद्यंते ते च तत्रोत्पद्यमा
ना वृक्षयोनिका वृक्षेषु क्रमात्सोत्पद्यंते मूलंस्याद्भूमिसंबद्धं तत्र कंदः समाश्रितः तत्र स्कंधश्च तिमिश्रो बीजांता
: स्युर्युताः समं ७ अतः पृथ्वीगतरसमादरंति समेप्यमी यावत्फलानि पुष्पस्थं बीजानि फलसंगतं ८ आवणा
ह्निचतुर्मस्यां प्रावृड्वर्षासु भूरुहः सर्वतो बहुलाहारा अपां बाहुल्यतः स्मृताः ९ ततः शरदि हेमंते क्रमाद
ल्पाल्पभोजिनः यावद्वसंते त्वाहारा ग्रीष्मेऽत्यंतमिताशनाः १० यत्तु ग्रीष्मेऽपि द्रुमाः स्युर्दलपुष्पफलाद्भुताः तद्

स्मयोनिजीवानामुत्पादात्तत्रस्वयमा ११ इति भग० श० ७ उ० ३॥ ननु च मूलादयो दशाप्येवं यदि प्रत्येकदेहिनिः आ
तास्तनेके स्तत्त स्मिन्नेकमूलादिधीः कथं १२ अत्रोच्यते श्लेषणद्रव्यसंमिश्रैर्घटितानेकसर्षपैः भूरिसर्षपरूपा
प वर्त्तिरेकैव भासते १३ अत्रोच्यते यथा ते सर्षपाः सर्वे स्वस्वमाना पृथक् पृथक् वर्त्तेर्बुद्धिं सृजंतोपि स्थिताः स्वस्वा
वगाहनाः १४ तथा प्रत्येकजीवास्ते पृथक् स्वस्ववपुर्भृतः सृजंत्येकत्र मिलिता एकमूलादिवासनां १५ इष्टद्वेष
रागाभ्यां संचितं पूर्वजन्मनि हेतुरेकत्र संबंधे तत्कर्मश्लेषणोपमं १६ स्तैवं विधकर्मणो जीवास्ते सर्षपोपमाः
मूलादिवर्त्तिस्थानीय मिति दृष्टांतयोजना १७ तिलराष्कुलिकाप्येष मर्या तिलविमिश्रिता अनेकतिलजातापि यथैका
प्रतिभासते १८ इहापि दृष्टांतयोजना प्राग्वत् अथ गुच्छादयः वृंताकी बदरी नीली तुलसी करमर्द्दिकाः मुसरः कण
वीरश्च जात्याद्या गुल्मजातयः २० अशोकचंपकलता नागपद्मलता अपि अतिमुक्तक वासंती प्रमुखाः स्युर्लता
इमाः २१ एकैव शाखा यत्स्कंधे महत्यप्ये विनिर्गता नैवान्यास्तादृशाः सत्या लताख्यश्चंपकादिकः २२ कूष्मांडी त्रपु
षी तुंबी कालिंगी चिर्भटी तथा गोस्तनीकारवेल्लीच वल्ल्यः कर्कोटिकादिकाः २३ इक्षुर्वंशो वीरणानि इक्कडः श्चार
इत्यपि वेत्रो नद्वश्च काशश्च पर्वगा एवमादयः २४ इत्वदिर्भार्जुनैरंडाः कुरुविंदकरोहिषाः सुंकल्पाख्यश्च क्षीरवि
समित्याद्यास्तृणजातयः २५ पूगखर्जूरसरला नालिकेर्यश्च केतकाः तमालतालकंदल्य इत्याद्या वलयाभिधाः
२६ आर्यकं दमनकमरुवक मंडूकी सर्षपाभिधो शाकोप्यपि तंदुलीयवास्तुकमित्याद्या हरितकाः ज्ञेयाः २७ आ
र्या अथ धाः फलपाकांता स्युः स्युरोषधिजातयः चतुर्विंशति संख्यानि तानिधान्यतः किल २८ तथाहि धान्य

ऽ७ यवासा धाउनिर्गुंडी इत्याद्या गुल्मजातयः १९ मल्लिकाकुंदकोरिंट यूथिकानवमल्लिकाः

६८

इंद्रव्रीहिः जव१ गोधूम २ सालि ३ वीहि ४ सठि ५ कोद्रव ६ अणया ७ कंगू ८ रालय ९ तिल १० मुग्ग ११ मासा य १२
२९ अयसि १३ हरिमंथ १४ तिउडग १५ निप्फाव १६ सिलिंद १७ रायामासा य १८ उक्खू १९ मसूर २० तुवरी २१ कु
लत्थ २२ तह धन्नय २३ कलाया २४ ३० इति सर्वेतिजलमध्ये ये स्युर्जलरुहा इमे कदंबशैवलकशेरुकाः
पद्मसिंदोमिताः ३१ कुहणा अपि बोद्धव्या नामांतरतिदिताः स्फुटाः देशविशेषेषु वत्रुंगोपांगदर्शिताः ३२
तद्यथा से किं तं कुहणा कुहणा अणेगविहा पन्नत्ता तं आएकाए कुहणे कुणके दव्वहलिया सप्पाए स
ज्झाए सत्ता एवंमीणद्दिया कुरु एजेयावन्ने तहप्पगारा से त्तं कुहणा इत्यादि गुच्छादीनां च मूलाद्या अपि अ
संख्यजीवकाः सूत्रे हि वृक्षमूलादेर्वोक्तासंख्यजीवता ३३ तथोक्तं वनस्पतिसप्ततौ रुक्खाणमसंख
जिआ मूला कंदा तयाय खंधाय साला तहा पवाला पुढो पुढो हुंतिनायव्वा ३४ गुच्छाईणं पुणसंख जीव
यानद्दएईम्यायं रुक्खाणं चियजम संख जीवत्ताबोसु ए भणिनं ३५ अत्रायं विशेषः तालश्च नालिके
री च सरलश्च वनस्पतिः एकजीवस्कंध एषां पत्रपुष्पादि सर्ववत् ३६ तथा पंचमांगे निर्दिष्टत्वा प्रज्ञागणधारि
नि: अनंतासंख्यसंख्यात जीवकास्ते क्रमादिमे ३७ तत्राद्याः श्रृंगबेराद्याः कपित्थाम्रादिकाः परे संख्यातजीव
कायेव तयाभावभयेनत्ते ३८ तथेदं तालतमालेतक्कलि तेतलिसालेयसालकल्लाणे सरलेजावइकेयइ कंद
लितह चम्मरुक्खे य ३९ भुअरुक्ख हिंगुरुक्खे लवंगरुक्खे य होइ बोधव्वे पूयफलीखज्जूरी बोधव्वा नालिएरी
य ४० तथा प्रज्ञापनावृत्तावपि तालसरलनालिकेरी प्रभृतीनां पत्रस्थलं तेनाम्नेषामपि यथागममेकजीवा

श्रिष्टितत्वेस्कंधस्यप्रतिपत्तव्यमिति   श्रृंगाटकस्यगुच्छःस्यादनेकजीवकः किल पत्राण्येकैकजीवानि द्वौद्वौजीवौ
फलंप्रति ४१ पुष्पाणांत्वयं विशेषः जलस्थलोद्भूततया द्विधासुमनसः स्मृताः नालबद्धावृंतबद्धाः प्रत्येकं द्विवि
धास्तुताः ४२ याः काश्चिन्नालिकाबद्धास्ताः स्युः संख्येयजीवकाः अनंतजीवकास्तेयाः स्नुहीप्रभृतिजाः पुनः ४
३ किंचपद्मोत्पलनलिनानां सौगंधिकस्यगकोकनदकानां अरविंदानांचतथा शतपत्रसहस्रपत्राणां ४४
आर्या वृंतंबाह्यदलानिचसकेसराणिस्युरेकजीवस्य पृथगेकैककजीवान्यंतर्दलकेसराणिबीजानि ४५ गी
तः पर्वगाणांतृणानांच अयंविशेषः इक्षुडीक्कनलादीनां सर्ववंशानिद्वांतथा नवंसैकस्यजीवस्य प्रवाक्किपरि
मोटकाः ४६ तत्राक्षिप्रोच्यतेग्रंथिः प्रतीतंपर्वमुचेतः चक्राकारंपर्वपरिवेष्टनंपरिमोटकः ४७ पत्राणिप्रत्ये
कमेषामेकजीवाश्रितानिवै पुष्पाण्यनेकजीवानि प्रोक्तानिपरमर्षिभिः ४८ फलेषुचैषामयंविशेषः पुष्पफ
लंकालिंगं तुंबंचिर्भटमथत्रपुषसंज्ञं घोषातकंपटोलं तिंदुकंचैवफलंइदं ४९ आर्याएतेषांच वृंतगर्भकटाहा
नामेकोजीवःसमर्थकः पृथग्जीवानिपत्राणि बीजानिकेसराण्यपि ५० एतच्चसर्वमंगवृत्तेः क्वचित्साधारणश्चाय
: प्रज्ञापनागतमेव श्रीहेमचंद्रसूरिभिश्चाभिधानचिंतामणावित्युक्तं करंटाद्याअग्रबीजा १ मूलजास्तूत्पलादयः
: २ पर्वयोनयइक्ष्वाद्याः ३ स्कंधजाःसल्लकीमुखाः ५१ शाल्यादयोबीजरुहाः ५ संमूर्छजास्तृणादयः ६ स्युर्वन   ६८
स्पतिकायस्य षडेतामूलजातयः ५२ इदमर्थतः प्रथमांगेपि दशवैकालिकेपि तथाजीवाभिगमेतु चतस्रोमुख्य
वल्ल्यःस्युःस्तावच्छताश्चतद्विदः ख्यातामुख्यलताश्रेष्ठौ तावच्छताश्चतद्विदः ५३ नामग्रहंतुतानोक्ताः शास्त्रैरपि

पंडितैः ततोनतत्रदोषोनस्तत्पदव्यनुसारिणां ५४ त्रयोहरितकायाःस्युर्जलस्थलोभयोद्भवाः भेदाःशतानितावं
ति तद्वांतरभेदजाः ५५ सहस्रंवृंतबद्धानि वृंताकादिफलान्यथ सहस्रंनालबद्धानि हरितेष्वेवतान्यपि ५६ किं
च मूलत्वक्काष्ठनिर्यास ४ -पत्रपुष्पफलान्यपि गंधांगभेदाःसप्तामी जिनैरुक्तावनस्पतौ ५७ मूलमौशीरवाला
दि त्वक्चसिद्धातजादिका काष्ठंचकाकतुंडादि निर्यासोघनसारवत् ५८ पत्रंतमालपत्रादि प्रियंग्वादिसुमान्यपि
कक्कोलैलालवंगादि फलंजातिफलाद्यपि ५९ मूलादयस्तेसप्तापि नानावर्णैर्नवंस्मृताः गुणिताःपंचभिर्वर्णैः पंचत्रिं
शद्भवंतिहि ६० दुर्गंधसावतःश्रेष्ठ गंधेनैकेनताडिताः तेपंचत्रिंशदेवस्युरेकेनगुणितंद्वितत् ६१ नानारसाश्चते
सर्वे ततःपंचरसाहताः संजाताःशतमेकंते पंचसप्ततिसंयुतं ६२ स्पर्शास्तुयद्यप्यष्टापि संभवंत्येववस्तुतः तथाप्य
त्रप्रशस्तत्वाद्धस्तेतेपितादृशाः ६३ लघुखरमृदुस्निग्धैः स्पर्शैरतैचतुर्गुणाः शतानिसप्तजातानि गंधांगानांदि
शानया ६४ उक्तंचजीवाभिगमवृत्तौ मूलतयकट्ठनिज्जास पत्तपुष्फफलमाइगंधंगा वलाइउत्तरभेया गंधंगसयामुणे
यव्वा ६५ सूत्रालापश्च कतिणंभंते गंधंगागंधंगसयापण्णत्ता गो सत्तगंधंगा सत्तगंधंगसयापण्णत्ता इत्यादि एवंवृत्यादिसूत्रा
लापाअपिवाच्याः लोकेत्र भूप्रसत्तांकदस्ताश्च सर्वेंदुवसुवक्त्रयः ३८११२९९७०४० एतत्संख्याकनिर्दिष्टोवन
भारः प्रकीर्तितः ६६ पाठांतरेच रामोवसवश्चंद्रः सूर्योभूमिस्तथैवच मुनिश्चाब्दसमादिष्टं ३८११२१७ भारसं
ख्यानिगद्यते ६७ एकैकजातेरेकैक पत्रप्रचयतोभवेत् प्रोक्तसंख्येमिलेद्भार स्तेत्वष्टादशसंख्यकाः ६८ तथाचत्वारो
ऽपुष्पकाभारा अष्टौचफलपुष्पिताः स्युर्वल्लीनांचषड्भाराः शेषनागेनभाषितं ६९ इत्यादुच्यते इतिबादराणांभेदाः

नतु अप्रविष्टक्षीष्वते जस्कायिकवर्जपृथिवीकायिकादिस्पर्शो नारकाणां युक्तस्तेषां तासु विद्यमानत्वात् तेजस्कायिकस्पर्शस्तु कथं। बादरतेजसां समयक्षेत्र एव भावात् तेजसां पुनस्तत्र सद्भावेऽपि स्पर्शनेंद्रियाविषयत्वादित्यत्रोच्यते। इह तेजस्कायिकस्य परमाधार्मिकनिर्मितज्वलनसदृशा वस्तुनः स्पर्शस्तेजस्कायिकस्पर्श इति व्याख्येयं। न तु साक्षात्तेजस्कायिक

प्रमिताः सप्तयाः पृथ्व्यः वसुमत्यष्टमी पुनः ईषत्प्राग्भाराभिधास्या तासु स्वस्थानतोऽष्टसु ७० अधोलोके च पाताल
कलशावलिभित्तिषु भवनेष्वसुरादीनां नारकावासपंक्तिषु च ७१ ऊर्द्ध्वलोके विमानेषु विमानप्रस्तटेषु च तिर्यग्लोके
च कूटाद्रि प्राग्भार विजयादिषु ७२ वक्षस्कार वर्षशैल जगतीवेदिकादिषु द्वारद्वीपसमुद्रेषु पृथ्वीकायिकोद्भव
: ७३ चतुर्भिः कलापकं इति पृथ्वीकायस्थानानि स्वस्थानतोऽबुकायानां स्थानान्युक्तानि सूरिभिः घनोदधिवलयेषु
घनोदधिषु सप्तसु ७४ अधः पातालकुंभेषु भवनेष्वासुरेषु च ऊर्द्ध्वलोके विमानेषु स्वर्गपुष्करणीषु च ७५ तिर्यग्लो
के च कूपेषु नदीनदसरस्सु च निर्झरोज्झरवापीषु गर्त्ताकेदारपंक्तिषु ७६ जलाश्रयेषु सर्वेषु शाश्वताशाश्वतेषु द्वी
पेषु च समुद्रेषु बादराप्कायसंभवः ७७ चतुर्भिः कलापकं इत्यप्कायस्थानानि स्वस्थानतोऽग्निकायानां स्थानमा
हुर्जिनेश्वराः नरक्षेत्रे द्विधापि सार्द्धद्वीपद्वयात्मके ७८ तत्रापि काले युगलिनामग्निः काले च विलवासिनां वि
देहेषु च सर्वासु कर्मभूषु न तोऽन्यदा ७९ किंच ऊर्द्धाधोलोकयोर्नायं तिर्यग्लोकेऽप्यसौ भवेत् सदा विदेहे भरतैराव
तेषु च कदाचित् ८० पाकदाहादिसंतापं तन्नु तेनरकेषु यः मतोग्निः किं तु तत्तुल्याः स्पर्शविकुर्वितपुद्गलाः ८१ यथोष्ण
वेदना तेषु श्रूयते संततारुणा पृथिव्यादिपुद्गलानां परिणामः स तादृशः ८२ सैवाप्यथवा भवांतरानुभूततेजस्कायि
कस्पर्शापेक्षया व्याख्येयं इति भग० शत० १९ उ० ४ वृत्तौ ॥ स्वर्गादौ पद्मपद्यादि श्रूयते यच्चागमे तत्तुल्याः पुद्गलास्तेऽपि
कृत्रिमाकृत्रिमात्मकाः ८३ एतच्चार्थतः प्रायस्तृतीयतुर्योपांगयोरेव ग्रंथांतरेऽपि पंचिंदियएगिंदिय उड्ढे अहे य ति
रियलोए य विगलिंदियजीवा पुण तिरियलोए मुणेयव्वा ८४ पुढवीआउवणस्सइ बारसकप्पेसु सत्तपुढवीसु पु ७५

ढवीजासिद्धिसिला तेऊ नरखित्त तिरिलोए ८५ सुरलोअवाविमज्झे मच्छाई नत्थि जलयरा जीवा गेविज्जे न हु वावी वाविअ
भावे जलं नत्थि ८६ इत्यग्निकायस्थानं घनानिलवलयेषु घनानिलेषु सप्तसु तनुवातवलयेषु तनुवातेषु सप्तसु ८७ अ
धोलोके च पाताल कुंभेषु भवनेषु च छिद्रेषु निष्कुटेष्वेवं स्वस्थानं वायुकायिनां ८८ ऊर्द्ध्वलोके च कल्पेषु विमानेषु तदालि
षु विमानप्रस्तटच्छिद्र निष्कुटेषु तदुद्भवः ८९ तिर्यग्लोके दिक्षु विदिक्षु अधऊर्द्ध्वं च तज्ज्ञैः जगत्यादिगवाक्षेषु लोक
निष्कुटकेषु च ९० इति वायुकायस्थानं प्रत्येकः साधारणश्च द्विविधोऽपि वनस्पतिः प्रायोऽप्कायसमः स्थाने जलाश्र
येऽधिकोऽन्ततः ९१ इति वनस्पतिस्थानं उपपातसमुद्घात निजस्थानैर्भवंति हि लोकासंख्यतमे भागे पर्याप्ता बादरा इमे
९२ तत्र वायोस्त्वयं विशेषः पंचसंग्रहसूत्रवृत्तौ बायरपवणा असंखेसु त्ति लोकस्य यत्किमपि सुषिरं तत्र सर्वत्र पर्याप्त
बादरवायवः प्रसर्पंति। यत्तु नरातिनिचिडनिचितावयवतया सुषिरहीनं कनकगिरिमध्यादि तत्र न। तच्च लोकस्यासंख्ये
य भागमात्रं। ततएकमसंख्येयभागं मुक्त्वा शेषेषु सर्वेष्वप्यसंख्येयेषु भागेषु वायवो वर्त्तंते इति पर्याप्त बादर वनस्पतय उप
पातसमुद्घाताभ्यां सर्वलोकव्यापिनः स्वस्थानतो लोकासंख्येयभाग इति ॥ अपर्याप्तास्तु सर्वे स्वस्थानैः पर्याप्तसन्निभा
उपपातसमुद्घाते त्वशेषलोकवर्त्तिनः ९३ नवरं वह्निकायस्त्वपर्याप्तस्तिर्यग्लोकस्य तद्दके उपपातेन निर्दिष्टो
द्वयोर्लोककपाटयोः ९४ तच्चैवं आलोकांतं दीर्घसार्द्धद्वीपांबुधिद्वयविशाले अधऊर्द्ध्वं लोकांतस्पृशी कपाटे उभे क
ल्प्ये ९५ तयोः कपाटयोस्तिर्यग्लोकेस्थानोदधिसीमनि योजनाष्टादशशतबाहल्ये सर्वतोऽपि हि ९६ अपर्याप्त बाद
राग्नः स्थानं स्यादुपपाततः तिर्यग्लोकं कपाटस्थमेव केप्यत्र मन्वते ९७ त्रिधा बादरापर्याप्तास्तेजस्कायिषु कद

द्विनः स्युरेकभविकाबद्धायुषश्चास्युदितायुषः ९८ तत्रयेऽनंतरभवे उत्पत्स्यंतेऽग्निकायिषु अपर्याप्तबादरेषु सएकभवि
काः स्मृताः ९९ येत्वपूर्वभवसत्क तृतीयांशादिषुध्रुवं बद्धस्थूलाऽपर्याप्ताग्न्यायुष्काबद्धायुषश्चते १०० येत्वपूर्व्वभवंत्य
क्ता साक्षाद्भवंतितैः स्थूलाऽपर्याप्तवह्न्यायुस्तेभवंत्युदितायुषः १ तत्रैकभविकाबद्धायुषश्च द्रव्यतः किलस्थूलाऽपर्या
प्ताग्नयः स्युर्भाविनस्तूदितायुषः २ अत्रच द्रव्यतो बादराऽपर्याप्ताग्निभिर्नप्रयोजनं स्थूलापर्याप्ताग्नयोये भावतस्तैः
प्रयोजनं ३ ततश्च यद्येषुक्तकपाटास्यां तिर्यग्लोकाच्चयेबहिः उदीतबादरापर्याप्ताग्न्यायुष्काभवंतिहि ४ तेष्वप्यंतेत
प्रात्वेन ऋजुसूत्रनयाश्रयात् तथाऽपिव्यवहारस्य नयस्याश्रयणादिह ५ येस्वस्थानसम
श्रेणि कपाटद्वयसंस्थिताः स्वस्थानानुगतेयेच तिर्यग्लोकप्रविष्टकाः ६ सएवव्यप
दिश्यंते ऽपर्याप्तबादराग्नयः शेषाः कपाटांतरालस्थितांनैवतथोदिताः ७ येनाद्या
प्यागतास्तिर्यग्लोकेप्यवाकपाटयोः तेप्राक्तनभवावस्था एवगण्यामनीषिभिः ८
उक्तंचप्रज्ञापनावृत्तौ पणयाललक्खपिहुला पुन्विकवाडायवहिसिंसुहा लोगं
तेतम्मिंतो जेतेऊतेऊछिप्पंति ९ ततउक्तं उववाएणं दोसुकवाडेसु तिरियलो ७१
अतद्देय स्थापना एष्वादिषुचतुर्ष्वेक पर्याप्तनिश्रयामताः असंख्येया अपर्याप्ता
जीवावनस्पतेपुनः १० पर्याप्तकस्यैकैकस्या पर्याप्तानिश्रयास्मृताः असंख्येयाश्च
संख्येया अनंताअपिकुत्रचित् ११ तत्रच संख्यासंख्यास्तुपर्याप्त प्रत्येकतरुनिश्रया

अनंताएवपर्याप्तसाधारणवनाश्रिताः १२ इतिबादराणांस्थानानि २ पर्याप्तयस्त्रिचतुरा अपर्याप्तान्यभेदतः
प्राणाश्चत्वारोंगबलश्वासायूंषित्वगिंद्रियं १३ इतिपर्याप्तिः ३ पृथ्व्यंबुवह्निमरुतां प्रत्येकंपरिकीर्त्तिताः योनिलक्षा
:सप्तसप्त सप्तसप्तेतिसप्रभेः १४ योनीनांदशलक्षाणि स्युः प्रत्येकमहीरुहां साधारणतरूणांच योनिलक्षाश्चतुर्द्द
श १५ इतियोनिः ४ द्वादशसप्तत्रीणिच सप्ताष्टाविंशतिश्चलक्षाणि कुलकोटीनांपृथ्वीजलाग्निनिलतरूणांक्रम
तः १६ एवंचसप्तपंचाश लक्षाणिकुलकोटयः एकेंद्रियाणांजीवानां संग्रहण्यनुसारतः १७ आचारांगवृत्तौतु
कुलकोडिसयसहस्सा बत्तीसट्ठनवयपणवीसा एगिंदियबितिइंदिय चउरिंदियहरियकायाणं १८ अद्ध
तेरसबारस दसदसनवचेव कोडिलक्खाइं जलयरपक्खिचउप्पय उरभुअपरिसप्पजीवाणं १९ पणवीसंछव्वीसं
चसयसहस्साइं नारयसुराणं बारसयसयसहस्सा कुलकोडीणंमणुस्साणं २० एवंद्वीन्द्रियादिष्वपि संग्रहण्यभि
प्रायेण वक्ष्यमाणासुकुलकोटिसंख्यासुमतांतरं अतएवास्यैव तथा लक्षाणिकुलकोटीनां षोडशोक्तानितात्वि
कैः केवलंपुष्पजातीनां तृतीयोपांगदेशकैः २१ तानिचैवं चतस्रोलक्षकोट्यो जलरुहाणां जातिभेदतः कोरिंटका
दिजातीनां चतस्रः स्थलजन्मनां २२ चतस्रोगुल्मजातीनां जात्यादीनां विशेषतः मधुकादिमहावृक्षजातानांतसंख्यको
टयः २३ इतिकुलादि ५ मिश्रासचित्ताचित्ताच योनिरेषांभवेत्त्रिधा उष्णाशीतोष्णशीताग्नौ न्वितातेस्युःप्ययोनयः
२४ पंचाप्येतेविनिर्द्दिष्टा जिनैःसंवृतयोनयः उत्पत्तिस्थानमेतेषां स्पष्टंयन्नोपलक्ष्यते २५ इतियोनिसंवृतत्वादि
६ द्वाविंशतिःसहस्राणि वर्षाणामायुरोभवेत् पृथ्वीकायस्थितिर्ज्येष्ठा विशेषस्तत्रदर्श्यते २६ एकवर्षसहस्रं मात्

स्थितिर्ज्येष्ठाम्बुस्थितेः द्वादशाब्दसहस्राणि कुमारमृत्तिकास्थितिः २७ चतुर्दशसहस्राणि सिकतायास्तु जीवितं मनः
शिलायाश्चोत्कृष्टं षोडशाब्दसहस्रकाः २८ अष्टादशसहस्राणि शर्कराणां गुरुस्थितिः द्वाविंशतिः सहस्राणि स्यात्सा
क्ष्मादिखरस्थितेः २९ सप्तवर्षसहस्राणि ज्येष्ठा स्यादंभसां स्थितिः त्रयो वर्षसहस्राश्च मरुतां परमा स्थितिः ३० अहोरा
त्रास्त्रयोऽग्नीनां दशवर्षसहस्रकाः प्रत्येकद्रुमाणामन्येषां तु सान्तर्मुहूर्तकं ३१ ऊनिते तन्मुहूर्तेन स्वस्वोत्कृष्टस्थि
तेः खलु पंचानामप्यमीषां स्यात् ज्येष्ठा पर्याप्तता स्थितिः ३२ अंतर्मुहूर्तं सर्वेषां यतोऽपर्याप्तता स्थितिः अंतर्मुहूर्ते क्षिप्ते ऽ
स्मिन् स्थितयस्ताः स्युरोघतः ३३ पंचानामप्यथैतेषां जघन्या स्याद्भवस्थितिः अंतर्मुहूर्तमानैव दृष्टा दृष्टजगत्त्रयैः ३४
अपर्याप्तानां च पंचानामप्येषां स्याद्भवस्थितिः अंतर्मुहूर्तप्रमिता जघन्यापरमापि च ३५ इति भवस्थितिः ७ सूक्ष्मा
दीनां चतुर्णां सूक्ष्मदेहवनस्पतेः सप्ततिः कोटिकोट्योऽम्भोधीनां कायस्थितिः पृथक् ३६ ओघतो बादरत्वेन बादरे च वन
स्पतौ उत्सर्पिण्यवसर्पिण्यो यावत्यस्तावतीमथ ३७ अंगुलासंख्यांशमानैर्नभःप्रदेशकैः प्रतिक्षणं हृतैर्याः स्यु
स्तावतीस्ता विचिंतय ३८ निगोदत्वेनौघतः सूक्ष्मबादरत्वाविवक्षया द्व्यर्धपुद्गलपरावर्त्ता सार्धैः कायस्थितिर्भवेत् ३
९ पर्याप्तत्वे क्ष्मादीनां प्रत्येकं कायसंस्थितिः संख्येयाब्दसहस्रात्मा वह्नेः संख्यदिनात्मिका ४० पर्याप्तत्वे क्ष्मा
दीनां प्रत्येकं कायसंस्थितिः संख्याब्दसहस्रात्मा वह्नेः संख्यदिनात्मिका ४० विशेषश्चात्र पर्याप्तत्वे बादरा
याः क्षितेः कायस्थितिर्भवेत् वत्सराणां लक्षमेकं षट्सप्ततिसहस्रयुक् ४१ तथाहि भवेदष्टभवान्यावत् ७२
ज्येष्ठायुः क्षितिकायिकः ज्येष्ठायुष्कस्थितित्वेनोत्पद्यमानः पुनः पुनः ४२ यदुक्तं भगवत्यां भवादेसेणं जहन्न

५

णं दो भवग्गहणाइं उक्कोसेणं अट्ठ भवग्गहणाइं इति स्थितिरुत्कर्षतश्चैकभवे प्रोक्ता क्ष्मांगिनां द्वाविंशतिसह
स्रा लक्षणा परमर्षिभिः ४३ अष्टनिघ्नेनानया भवस्येवं यथोदितं षट्सप्ततिवर्षसहस्राधिकं वर्षलक्षकं ४४
षट्पंचाशद्वर्षसहस्राण्येवं जलकायिनां स्युश्चतुर्विंशतीरात्रिंदिवानि वह्निकायिनां ४५ स्युश्चतुर्विंशतिर्वर्ष
सहस्राण्यनिलांगिनां अशीतिश्च सहस्राणि वर्षाणां वनकायिनां ४६ एषु सर्वेषु परमा लब्ध्यपर्याप्तता स्थितिः
अंतर्मुहूर्तप्रमिता वर्णितत्रापि भावना ४७ क्ष्मादिष्वन्यतरत्वेनोत्पद्योत्पद्य जीवितः असकृत्कोऽप्यपर्याप्त
एव याति भवांतरं ४८ भवांश्च तादृशान् कांश्चित् कुर्यादंतर्मुहूर्तकान् तैर्लघ्वंतर्मुहूर्तैश्च स्याद्गुर्वंतर्मुहू
र्तकं ४९ अंतर्मुहूर्तमानाश्च सर्वा एता जघन्यतः प्ररूपिताः श्रुते कायस्थितयः पुरुषोत्तमैः ५० इति कायस्थि
तिः ८ स्थापना औदारिकं सतैजसकार्मणमेतद्वपुस्त्रयं ह्येषां मरुतां च वैक्रियाढ्यं चतुष्टयं संभवेद्वपुषां ५१
इति देहाः ९ मसूरचंद्रसंस्थानं बादराणां भुवां वपुः जलानां स्तिबुकाकारं
सूच्योघाकृति तेजसां ५२ मरुतां तद्ध्वजाकारं द्वैधानामपि नूरुहां स्युः शरी
राण्यनियतसंस्थानानीति तद्विदः ५३ इति संस्थानं १० असंख्येयांगुलस्यांशः
क्ष्मादीनां देहसंमितिः जघन्यादुत्कर्षतश्च स एव हि महान् भवेत् ५४ जघ
न्यादुत्कर्षतश्च वायोर्यद्वैक्रियं वपुः स्यात्तदप्यंगुलासंख्यभागमात्रावगाहनं ५५
अंगुलासंख्यांशमानं प्रत्येकशोर्जघन्यतः उत्कर्षतो योजनानां सहस्रं साधिकं च
१: ५६

पं.८
मूले कंदे स्कंधे
त्वचायां शाले प्रवा
ले पत्रेय। सप्तस्वपि
बाणे पुढवत्तं। अंगु
लमो पुष्फफलबी
ए। इति भगवत्य
कविंशशतकस्तो
त्र सूत्रेपि॥

उत्सेधांगुलनिष्पन्नसहस्रयोजनोन्मिते जलाशयेयप्योत्कर्षाः स्युर्लताकमलादयः ५७ प्रमाणांगुलमानेषु यानि
वार्धिह्रदादिषु भौमांन्येव ज्ञानितानि विरोधः स्यान्मिथोन्यथा ५८ तद्यथा उद्वेधः कसमुद्राणां प्रमाणांगुल
जोमहान् ह्रदलघन्यत्सुत्रनालानि मितान्योत्सेधिकांगुलैः ५९ किंच शाल्यादिधान्यजातीनां स्यान्मूलादिषु सप्तसु
धनुः पृथक्त्वप्रमिता गरीयस्यवगाहना १ उत्कृष्टैषां बीजपुष्पफलेषु चावगाहना। पृथक्त्वमंगुलानांच त्वोक्तं पूर्वम
र्षिभिः २ शालिः कलः २ अयमिनः वंसे ४ उरके ५ दभे अद ३ अन्न ७ उलसीय ८ अठेते दसवग्गा असीति पुणहोंतिउ
द्देसा ३ एकैकस्मिन्वर्गेमुला द्यो दशदशोद्देशका इत्यर्थः सर्वेमी शालिवज्ज्येष्टामिह्यपेक्षावगाहनाम् शाल्यादयो
मीसर्वेष्ट पृथक्त्वपरमाणुधः ४ किंच॥ तालेगठिय २ वऊवीय गायइगुच्छाय ४ गुम्मय वल्लीय ६ ब्वदसवग्गाएए
सठिंपुणहोतिउद्देसा ५ बालादीनां ज्येष्टा वगाहनामूलकंदकिशलेषु चापपृथक्त्वं पत्रेप्येवं कुसुमेतु कर पृथक्त्वं
मा ६ स्कंधशाखात्वचासुस्यात् गव्यूतानां पृथक्त्वकम् अंगुलानांपृथक्त्वं च मानवेत्फलबीजयोः ७ तालादीनां चप्र
वालादि पंचकस्यस्थितिर्गुरुः दशवर्षसहस्राणि लघ्वी चांतर्मुहूर्तिकी ८ प्रवालादिपंचकस्य त्वेषामुत्कर्षतः स्थितिः
नववर्षाणि लघ्वी उ। प्राग्वदांतर्मुहूर्तिकी ९ तालादयश्चतालतमालेत्यादिगाथायुग्मतोज्ञेयाः एकास्थिकबहुबी
जकवृक्षाणा मात्रदाडिमादीनाम् मूलादेर्दशकस्या वगाहनातालवत्स्थितिश्चापि १० गुच्छानांगुल्मानां स्थितिरुत्कृ ७२
ष्टावगाहनाचापि शाल्यादिवदस्सेया वल्लीनां स्थितिरपितथैव ११ वल्लीनां च फलस्या वगाहनास्यात्पृथक्त्वमिहधनुषा ७२
म् शेषेषुनवसुमूलादिषु ताललपमतिवक्तव्या १२॥ एवंच अंगुलासंख्यांशमात्र मेकाक्षाणां जघन्यतः उत्कर्षे

तांगमधिकं योजनानांसहस्रकं ६० तत्रापि देहः सूक्ष्मनिगोदानामंगुलासंख्यभागकः सूक्ष्मानिलाग्न्यंबु
भुवामसंख्येयगुणः क्रमात् ६१ वाय्वादीनां बादराणां ततोऽसंख्यगुणः क्रमात् बादराणांनिगोदानामसंख्ये
यगुणः ... ततः ६२ स्वस्वस्थानेतु सर्वेषां मंगुलासंख्यभागता अंगुलासंख्यभागस्य वैचित्र्याउपपद्यते ६३ पर्याप्त
नां बादराणां मरुतांयच्च वैक्रियं जघन्यात्उत्कर्षतश्च तदप्येतावदेव हि ६४ विशेषतश्च निगोदपवनाग्न्यंबु भुवः पंचा
प्यमी द्विधा सूक्ष्मा बादरास्तेपि पर्याप्तान्यतराद्विधा ६५ एवंविंशतिरप्येते जघन्योत्कृष्टभूघनाः जाताश्चत्वारिंश
देव मधप्रत्येकस्तरुः ६६ पर्याप्तापर्याप्तहीनो ऽकृष्टलघनभेदतः चतुर्धेवंचतुश्चत्वारिंशदेकेंद्रियांगिनः ६७
अथावगाहनास्वेषां तारतम्यमितीरितं पंचमांगेकोनविंशशत्तोद्देशेतृतीयके ६८ अपर्याप्तनिगोदस्य स्यात्सूक्ष्म
स्यावगाहना सर्वस्तोका ततोऽष्टाना मसंख्येयगुणाः क्रमात् ६९ अपर्याप्तानिलाग्न्यं बुभुवांसूक्ष्मारीयसां ततोपर्या
प्तयोः स्थूला नंतप्रत्येकतरुहो: ७० असंख्येयगुणेतुल्ये मिथोवगाहनेलघुततः सूक्ष्मनिगोदस्य पर्याप्तस्याव
गाहना ७१ असंख्येयगुणालघ्वी क्रमात्तनोधिकाधिके अपर्याप्तपर्याप्तस्यो त्कृष्टेतस्यावगाहने ७२ ततः सूक्ष्म
वाय्वग्न्यंबु भूवांस्युर्यक्रमं पर्याप्तानांजघन्याऽपर्याप्तानां चगरीयसी ७३ पर्याप्तानां तथोत्कृष्टा क्रमेणासंख्यसंगुण
विशेषाभ्यधिकाचैव विशेषाभ्यधिकापुनः ७४ एवं स्थूलानिलाग्न्यंसः पृथ्वीनिगोदिनामपि प्रत्येकं त्रित
यीमाव्या ऽवगाहनानिदक्रमात् ७५ प्रत्येकवत्चारिंशोत्स्युः किंत्ववगाहनानिदः पर्याप्तस्थूलनिगोदज्येष्टा
वगाहनावधि ७६ पर्याप्तप्रत्येकतरोर्जघन्यासंख्यगुणाततः तस्याऽपर्याप्तस्यगुर्वीस्यादसंख्यगुणाततः ७७ ततो

संख्यगुणा तस्य पर्याप्तस्यावगाहना सातिरेकं योजनानां सहस्रं मायतो भवेत् ७७ यत्तु श्रीजिनचन्द्रसूरिभिः स्वकृतदेहाल्पबहुत्वोद्धारे अपर्याप्तप्रत्येकतरूत्कृष्टावगाहनातः पर्याप्ततरूत्कृष्टावगाहनाया विशेषाभ्यधिकोक्तास्ति तं अंगुलासंख्येयभागमाना पर्याप्तप्रत्येकतरूत्कृष्टावगाहनातः सातिरेकयोजनसहस्रमानाया:

प्रत्येक वनस्पति ००० पर्या अप	भूमि बादर पर्या अप, सूक्ष्म पर्या अप	जल बादर पर्या अप, सूक्ष्म पर्या अप	अग्नि बादर पर्या अप, सूक्ष्म पर्या अप
वायु बादर पर्या अप, सूक्ष्म पर्या अप	निगोद बादर पर्या अप, सूक्ष्म पर्या अप		

ज॰	सर्वस्तोका अवगाह	१
उ॰	विशेषाधिका	१२
ज॰	असंख्यगुणा	११
उ॰	विशेषाधिका	१३
ज॰	असंख्यगु॰ मिथस्तु॰	१०
उ॰	विशेषाधिका	३५
ज॰	असंख्यगुणा	३८
उ॰	विशेषाधिका	४०
ज॰	असंख्यगुणा	२
उ॰	विशेषाधिका	१५
ज॰	असंख्यगुणा	१४
उ॰	विशेषागुणा	१६
ज॰	असंखगुणा	६
उ॰	विशेखगुणा	२७
ज॰	असंख्यगुणा	२६
उ॰	विससगुणा	२८
ज॰	असंख्यगुणा	३
उ॰	विशेषाधिका	१८
ज॰	असंख्यगुणा	१७
उ॰	विशेशगुणा	१९
ज॰	असंख्यगुणा	७
उ॰	विशेषाधिका	३०
ज॰	असंख्यगुणा	२९
उ॰	विशेषाधिका	३१
ज॰	असंख्यगुणा	४
उ॰	विशेशगुणा	२१
ज॰	असंख्यगुणा	२०
उ॰	विशेशगुणा	२२
ज॰	असंखगुणा	८
उ॰	विशेषाधिका	३३
ज॰	असंखागुणा	३२
उ॰	विशेशाधिका	३४
ज॰	असंख्यगुणा	५
उ॰	विशेख्यगुणा	२४
ज॰	असंख्यगुणा	२३
उ॰	विशेशगुणा	२५
ज॰	असंख्यगुणा	९
उ॰	विशेशगुणा	३६
ज॰	असंख्यगुणा	३५
उ॰	विशेषाधिक	३७
ज॰	असंख्यगुणा मिथस्तु॰	१०
उ॰	असंख्यगुणा	४२
ज॰	असंख्यगुणा	४१
उ॰	असंख्यगुणा	४३ प्र

७४

पर्याप्तप्रत्येकतरूत्कृष्टावगाहनाया विशेषाधिकत्वस्यासंगतत्वात् भगवतीसूत्रेणसह विरोधाच्च तथाचतत्सूत्रं: पत्तेयसरीरबादरवणस्सईकाइयस्स पज्जत्तगस्स जहन्निया ओगाहणा असंखेज्जगुणा तस्सचेव अपज्जत्तगस्स उक्कोसिया ओगाहणा असंखिज्जगुणा। तस्सचेव पज्जत्तगस्स उक्कोसिया ओगाहणा असंखिज्जगुणा इति भगवतीश त१९ तृतीयोद्देशके भावार्थसंग्रह कादृशेय: अत्र जीवभेदाश्चतुश्चत्वारिंशत् अवगाहनाभेदाश्च त्रिचत्वारिंश देव अपर्याप्तबादरनिगोदजघन्यावगाहनाया अपर्याप्तप्रत्येकवनस्पतिजघन्यावगाहनायाश्च मिथस्तुल्यत्वात् अत एवकोष्ठकाश्चतुश्चत्वारिंशत् अंकास्त्रिचत्वारिंदेव पंचमैकचत्वारिंशयो: कोष्ठयोर्दशकस्यैवसद्भावादितिध्येयं इत्संगमानं ११ एषांत्रय:समुद्घाताश्च द्या:स्युर्वेदनादय: क्ष्मादीनांतेऽनिलानांतु चत्वार:स्यु:सवैक्रिया: ७९ इतिसमुद्घात:१२ बादरक्षितिनीराणि प्रत्येकाश्च द्रुमा अपि मृत्वोत्पद्यंतेऽखिलेषु तिर्यक्ष्वेकेंद्रियादिषु ८० संख्यात्वेष्वपि तिर्यक्षु गर्भसंमूर्छजन्मसु नरेष्वपि हि भेदेषु संख्येयायुष्कशालिषु ८१ युग्मं गच्छतो वा शुचिवायूतु सर्वे ष्वनरान्विना तत: प्रवेंद्रिगतयो मीत्वेकगतय:स्मृता: ८२ इतिगति:१३ एकद्वित्रिचतुरक्षा: पंचाक्षा:संख्य जीविन: तिर्यंचो मनुजाश्चैव गर्भसंमूर्छनोद्भवा: ८३ अपर्याप्ताश्चपर्याप्ता सर्वेप्येते सुरास्तथा भवनव्यंतरज्योतिष्काद्यकल्पकल्पद्वयोद्भवा: ८४ मृत्वाप्रत्येकविटपि बादरक्षितिवारिषु: आयांतितेषु देवास्तु पर्याप्तेष्वपरेषु न ८५ अपर्याप्तेषु त्रिष्वेषु निगोदाग्न्यनिलेषु च उत्पद्यंते चएवैका: प्राणिनोनिर्जराव्विना ८६ निर्जरोत्पत्तियोग्यानां मुक्त्वा: प्रत्येकभूरुहाम् विशेष: पंचमांगस्य कविंशादिशादिशतकद्वये १ शाल्यादिधान्यजातीनां पुष्पे

बीजे फलेषु च देव उत्पद्यतेऽन्येषु न मूलादिषु सप्तसु २ कोरंटकादिगुल्मानां देवः पुष्पादिषु त्रिषु उत्पद्यते न मूलादि सप्तके
कि लशालिवत् ३ इक्षुवाटिकमुख्यानां मूलादिनवकेऽसुरः उत्पद्यते नैव किंतु स्कंधे उत्पद्यते परम् ४ इक्षुवाटिकादयस्त
मी पंचमांगे प्रायो दृष्टिगम्याः पर्वकविशेषाः अह भंते उक्खुवाडिय वीरण इक्कड भमास सुंठ सत्त वेत्त तिमिर संसय वोर
नलवाण एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं जहेव वंसवग्गो तहेव एत्थ वि मूलादिया दस उद्देसगा नवरं खंधुद्देसए दे
वो उववज्जइ चत्तारि लेस्साउ ७ तालप्रभृति वृक्षाणां तथैकास्थिक भूरुहाम् तथैव बहुबीजानां बद्धीनामप्यनेकधा
उत्पद्यते प्रवालादिष्वेव पंचसु निर्जरः न मूलादिपंचके शेषो क्वापि वनस्पतौ ८ तथोक्तं पत्तपवाले पुप्फे फले य बीए य दे
इ उववाउ रुक्खेसु सुरगणाणं पसत्थरसवण्णगंधेसु १ इति भगवती द्वाविंशशतक वृत्तौ 〃 एकसामयिकी संख्योत्पत्तौ च म
रणेऽपि च विज्ञेया सूक्ष्मवन्नास्ति विरहोऽत्रापि सूक्ष्मवत् ८३ इत्यागतिः १४ विपद्यानंतरभवे तिर्यक्त्वेनाश्रुतागताः स
म्यक्त्वं देशविरतिं लभंते न तु दश कद्रुमाः ८४ विपद्यानंतरभवे प्राप्य गर्भजमर्त्यतां सम्यक्त्वं विरतिं मोक्षमप्याप्नुवंति
केचन ८५ विपद्यानंतरभवे न लभंतेऽग्निवायवः समकमपि दुष्कर्मतिमिराहतलोचनाः ८६ इत्यनंत
राप्तिः १५ पृथ्व्यंबुकायिका मुक्तिं यांत्यनंतरजन्मनि चत्वार एकसमये षड् वनस्पतिकायिकाः ८७ इति समये
सिद्धिः १६ पृथ्व्यंबुप्रत्येकतरुष्वाद्यं लेश्याचतुष्टयं आद्यं लेश्यात्रयं साधारणेषु मारुताग्निवायुषु ८८ चतुर्थलेश्या
संभवस्त्वेवं तेजोलेश्यावतां येषु नाकिनां गतिसंभवः आद्यमंतर्मुहूर्तं स्यात्तेजोलेश्यापि तेषु वै ८९ इति ले
श्या १७ एषां स्वस्वक्षमादीनामाहारः षट्दिगुद्भवः सूक्ष्मानिलस्य त्रिचतुःपंचदिक्संभवोऽप्यसौ ९० इत्याहार

तः ५१ असंख्येयगुणाः प्रोक्ताः सनत्कुमारनाकिन ७ विमानानां कृष्णपाक्षिकाणां चाधिक्यतस्तथा ते।
सौधर्मेप्यसंख्येयाः कथं ईशाननाकिनः ८ अत्रोच्यते दिक्वचन प्रमाणप्रकृत्यैतत्तथा विचारणा चरोना
स्मा ईशानमासौ दितं च च ९ तथोक्तं प्रज्ञापनावृत्तौ: नन्वियं युक्तिर्माहेंद्र सनत्कुमारयोरप्युक्ता परं।
तत्र माहेंद्रकल्पापेक्षया सनत्कुमारकल्पे देवा असंख्येयगुणा उक्ता इह तु सौधर्मकल्पे संख्येयगुणा
उक्ता स्तदेतत्कथमुच्यते वचनप्रामाण्यात् न चात्रपातत्रसोय तेनान्यत्राप्युक्तं॥ ईशाणसवधम्मोवि ब-
ति सगुणाउहोंति देवाओ सव्वइमासोहम्मतओ असंखाभवणवासी इति: असंख्याश्च सौधर्म देवा।

नागवनाधिपा: भवंतिनवनेशेभ्यो संख्यघ्ना अंतरासुरा: २० ज्योतिष्काणां देवदेवी वृंद: संख्यगुण
स्तत: स्वस्वदेवेभ्यश्चदेव्य: सर्वा: संख्यगुणा: स्मृता: २१ इतिलघुाल्पबहुता २२ पूर्वस्यांच प्रती।
च्यांच स्तोकानवनवासिन: उत्तरस्यां दक्षिणस्यां सभेऽसंख्यगुणाक्रमात् २३ शाकुनीव्याहिनवन
ल्पत्वात्स्तोकाऽमीकिल दक्षिणोत्तरयोस्तेषां क्रमाधिक्यादिमे ऽधिका: २३ पूर्वस्यां व्यंतरास्तोका
: विशेषेणाधिकाधिका: अपरस्यामुत्तरस्यां दक्षिणस्यां यथाक्रमं २४ व्यंतरा: सुषिरेभूम्ना स्वरं
तिततोऽधिका: सा धोग्रामायां प्रतीच्यां समीस्फ: प्राच्यपेक्षया २५ उदीच्यां दक्षिणस्यां च युक्तमेवा
धिकाधिका: स्वस्थाननगरावास बाहुल्येनायथाक्रमं २६ पूर्वस्यांपश्चिमायांच स्तोकाज्योतिष्कना
किन: दक्षिणस्यामुदीच्यां च स्युः क्रमेणाधिकाधिका: २७ प्रचुरीच्यावेडसुर्यं द्वीपहृद्यानदेशव
त्र क्रीडासक्तेषु ज्योतिष्का: स्वल्पा: प्रायेणसत्क्षया २८ तेभ्योऽधिकादक्षिणस्यां विमानानां बहुत्वत:
तथा कृष्णपाक्षिकाणां बहुल्येनोपपातत: २९ उदीच्यां मानससर स्यते क्रीडापरायणा: तत्समीपस्थि
तज्योति विमानादिनिरीक्षणात् ३१ उत्पन्नजातिस्मरणा: किंचिदाचर्यवृत्त विहितानशना: कृत्वा
निदानंसुखलिप्सया ३२ मृत्वाज्योतिर्विमानेषु त्पद्यंते तिकव त्रिषु तत: स्युर्दाक्षिणात्येभ्य: अत्रश
ताऽसमेऽधिका: ३३ स्यु: सौधर्मप्रभृतिषु ताविषुचतुष्वपि पूर्वस्यां पश्चिमायां च स्तोकाएवसुधाभुजा:
३४ ततश्चासंख्येयगुणा उत्तरस्यां ततोऽधिका दक्षिणस्यां समीप्रोक्ता स्युयतोत्रैनावना ३५ उत्पादिष्ट
वतस्तेषु विमाना: पंक्तिवर्तिन: असंख्येयाजनतता पुष्पावकीर्णकापुन: ३६ यास्यादीच्योरवहुस्मा।
स्यु: पूर्वापरयोस्तत: उदक्ततोऽसंख्यगुणा: प्राचीप्रतीच्यपेक्षया ३७ भूम्ना कृष्णपाक्षिकाणां दक्षिण।
स्यां समुत्पन्नवात् दक्षिणस्यां समधिका उत्तरापेक्षयातत: ३८ तथाङ प्रज्ञापनायां दिसाणुवाएणंसव्व
त्थोवा देवासोहम्मकप्पे पुरच्छिमपच्चच्छिमेणं उत्तरेणं असंखेज्जगुणा दाहिणेणं विसेसाहिया अत्र

यद्यपिविविक्तपुष्पावकिर्णानयंतरेसुतुपुव्वदिसिंइतिवचनात प्राच्यांपुष्पावकिर्णकानां वास्तुतिच्यां वतनि
षेधोभावात्प्राच्यापेक्षयाप्रतिच्यां देवा अधिका वक्तव्या: स्फुरस्तथापत्रसूत्रे पूर्वपश्चिमावल्पत्वनयत: सर्वो
पिदक्षिणोत्तरतयैवदिविवक्षितेतिसंभाव्यत इतिहृद्य: यथादक्षिणोत्तरार्द्धलोकाधिपतिसौधर्मेशानेंद्रो
इत्यत्र पूर्वापश्चिमअपिदक्षिणोत्तरतयैववक्षितेइति॥ एविं त्रिशपश्चिमास्तु ब्रह्मलोकेल्पका: सुरा:
ततश्चासंख्ययगुणा: दक्षिणस्यादिविस्मृता: २९ यास्यांहिबहवः प्राय स्तिर्यंच: कृष्णपाक्षिका: उत्पद्यंत
न्यासुश्रुक्ल पाक्षिकास्तेकिलाल्पका: ३० एवंचलांतकेशुक्रे सहस्रारेपिनाकीना: भूयांसो दक्षिणस्यां।
स्युस्तिर्यंचनास्तुवाल्पका: ३१ आनतादिषुकल्पेषु ततश्चानुत्तरावधि प्रायश्चतुर्दिशमपि समाना एवना
किन: ३२ तथाङ पन्नापणायां तेणपरंबहुसमो ववणासमणाउसो इति इतिदिग्पेक्षयाल्पबहुता:
३४ जयन्यतोंऽतर्मुहूर्तं कालोऽनंतोंऽतरं गुरु ज्येष्टकायस्थितिसमा: सवर्कालोवनस्पते: ३५ इत्यंतरं इति
यदिहमयोक्तं निर्जराणां स्वरूपं तदुरुसमयवाचांवर्णिकामात्रमेव तस्माद्हितविशेषान् कोह्युपशाखिवे
क्तु प्रभुरिवनृपकोषागारजातरत्नकणोघान् ३६ विश्वाश्चर्यदकीर्तिकीर्तिविजयश्रीवाचकेंद्रांतिषज
जश्रीतनयोतनिष्टमार्धस्तुगविनय: श्रीतेजपालात्मज: काव्यंयत्किलतत्रनिश्चितजगत्तत्वप्रदीपोपमसर्गो
निर्गलितार्थसार्थसुभग: सामानपूर्णोष्टम: २३४ इतिलोकप्रकाशेदेवाधिकारस्यो ष्टम: सर्ग:॥८॥ ॥ग्र
ग्रंथाग्रंथ: १५६॥८॥ ॥८९०॥ अथनारका: रत्नाशर्करावालुका पंकधूमतम:प्रभा: महातम:प्रभेत्यासुः स
प्तधानारकासता: १ पर्याप्तापरभेदेन चतुर्दशतवंतिते स्थानोत्पातसमुद्घातैलोकासंख्यांशवर्तिन: २ स्व
स्थानतस्तथोत्पाद तेपकदेशमवत्यमी विशेषस्थानयोगास्तु क्षेत्रलोके प्रवक्ष्यते ३ इतिभेदा: १ स्थाना।
निवा: २ पर्याप्तय: ३ उपपाते वज्रमायोनिल्यक्षका: नेत्राणिकुजकोटिला मुक्तानिपवदिशति: ४ इति।
द्वारत्रयं ५ स्फ: शीतयोनय: केचि त्केचिदुष्णास्मयोनय: जिनैदक्षालोरयिका संप्रश्नाभितयोनय: ५ इति।

DAULAT ...

यानि संहननान्यादिमं ६ दशवर्षसहस्राणि जघन्यैषां भवस्थितिः उत्कृष्टा त्रयस्त्रिंशत् सागरोपमसंमिता ६ इति।
भवस्थितिः ७ कायस्थितिस्त्वेषां भवस्थितिरिव ८ कायस्थितिस्त्रसत्वे स्या जघन्यान्तर्मुहूर्तकं द्वौ सागरौ सहस्रौ च।
कियद्वर्षाधिको गुरुः २ देहास्त्रयस्तैजसं च कार्मणं वैक्रियं तथा स्या। भाविकलत्रिमश्रो हुंडं संस्थानमंगयोः ८ दे
हा ९ संस्थानं च १० शतानि पंच धनुषां ज्येष्ठा स्यात्स्वाभाविकी तनुः लघ्वंगुलासंख्यभागमाना स्वस्वरूपेण मता ९ स्वस्वस्था
ना विकृतनो द्विगुणात्र वैक्रिया पृथ्वी लघ्वंगुलसंख्यभागमाना तनवेदमो १० इत्यंगमानं ११ स्युश्चत्वारः समुद्घाता
आद्या एषां गतिः पुनः पर्याप्तगर्भजनरति २ क्षाः संख्यजीविनोः ११ इति गतिः १२ नरपंचाक्षतिर्यंचः पर्याप्ताः संख्य
जीविनः नारकेषु यांति संख्या सामयिकेषु देववत् १२ एषूत्पत्तिच्यवनयो मुहूर्ता द्वादशांतरं उत्कर्षात्तु जघन्य
स्तु एकसमयात्मकं १३ इत्यागतिः १४ सामान्यतो नैरयिका लभंते नंतरं भवं सम्यक्त्वादेशविरतिं चारित्रं
मुक्तिमप्यमी १४ विशेषस्तु क्षेत्रलोके वक्ष्यते इत्यनंतरगतिः १५ उद्वृत्यैया नारकेभ्यो लभ्यंते नत्वादिकं यद्ये
कसमये यांति शिवं तद्विंदशाध्रुवं १५ पतेकसमाद्यनरक त्रयोद्वृत्ता अमी पुनः सिद्धिं यांति दश दश तुर्योद्वृत्ता
स्तु पंच वै १६ इति समये सिद्धिः १६ लेश्यास्तिस्रोऽप्यमीषां त्वाद्याः षडाहारदिशोऽपि च न संहननसद्भावः कषाया नि
खिला अपि १७ संज्ञाः सर्वाश्चेंद्रियाणि सर्वाण्येषां च संज्ञिकाः ता। दीर्घकालिक्यादिमत्या हेतुसंज्ञतयापि च १
८ एषां वेदः क्लीब एव दृष्टिस्त्वेव दर्शनं उपयोगा इति द्वारचतुष्कं पूर्ववन्मतं १९ त्रिज्ञाना अज्ञानिनस्त्वेषां आहारश्च
लोमशो गुणस्थानानि योगाश्च भवत्यसूनां जिनवत् २० लोमाहारो द्विधाभोगानाभोगाच्च ततत्र च आभोगादिमोंत
र्मुहूर्ता स्थितिरन्यश्च प्रतिक्षणं २१ इति लेश्यादीनि योगान्तानि पंचदशद्वाराणि २२ अंगुलप्रमितक्षेत्र प्रदेशा
राशिवर्तिनि तृतीयवर्गमूलघ्ने प्रथमे वर्गमूलके २३ यावन्तः प्रदेशराशिः स्यात्तावतीषु च पंक्तिषु एकप्रादेशि
कीषु स्फुटं यावंतः प्रदेशकाः २४ तावंतो नारकाः प्रोक्ताः सामान्येन जिनेश्वरैः विशेषतो मानमेषां सप्तधैवं विवि
नन्यते २३ अंगुलप्रमितक्षेत्र प्रदेशराशिसंगते तृतीयवर्गमूलघ्ने प्रथमे वर्गमूलके २४ यावत्प्रदेश

क्ष
निकरावत्प्रमाणासु पंक्तिषु एकप्रादेशिकीषु स्युर्यावंतोऽत्र प्रदेशकाः २५ तावंतो मानतः प्रोक्ता ना
रकाः प्रथमक्षितौ शेषासु षट्सु च क्ष्मासु ख्याता नैरयिकांगिनः २६ घनीकृतस्य लोकस्य श्रेण्यसंख्यांश
वर्तिनः नभःप्रदेशैः प्रमिताः विशेष एष तत्र च २७ आरभ्य सप्तमक्ष्माया द्वितीयवसुधावधि असंख्ये
यगुणत्वेन यथोत्तराधिकाधिकाः २८ इति मानं २३ सर्वाल्पाः सप्तमक्ष्माया असंख्येयगुणास्ततः भवंति
नारकाः क्ष्मासु षष्ठ्यादिषु यथाक्रमं २९ संज्ञिपंचेंद्रियतिर्यग्मनुष्याः सप्तमक्षितौ सर्वोत्कृष्टपापकृ
तः उत्पद्यतेऽल्पकास्ते ते ३० किंचिद्धीनहीनतरपाप्मानः प्रोत्पद्यंते च षष्ठ्यादिषु तेन भूरि भूरयः स्युर्यथोत्त
रं ३१ इति लघ्वल्पबहुता ३२ सर्वासु नारकाः स्तोकाः पूर्वस्यां पश्चिमोत्तराः असंख्येयगुणास्तेभ्यो दक्षिण
दिशासमुद्भवाः ३३ पुष्पावकीर्णनरका दाःसाहुल्या दिशात्रये ये प्रतिपत्तिपिप्रायेण संख्ययोजनविस्तृता
: ३४ दक्षिणस्यां तु पुष्पावकीर्णका बहवः स्मृताः प्रायस्ते संत्यसंख्येयः योजनायतविस्तृताः ३४ भूम
कृष्णपाक्षिकाणां दक्षिणस्यां यदुद्भवः दिक्याप्रत्ययेस्तस्यां भूयांसो नारकास्ततः ३५ इति दिगपेक्षया।
ल्पबहुता ३४ वनस्पतिज्येष्ठकाय स्थितिमानं किलांतरं एषां गीरियो विज्ञेयं लघु चांतर्मुहूर्तकं ३६ इ
त्यंतरं ३७ नारकलोकनिरूपणमेवं सम सेषविशेष विमुक्तं सेष्यमेभ्य जगत्प्रगटकृत विचार किंचिदिहे च।
विशेषप्रवृक्ष्ये।४२१ विश्वाश्चर्यदकीर्तिकीर्तिविजयश्रीवाचकेंद्रांतिषद्राजश्रीतनयोऽतनिष्ट विनयः।
श्रीतेजपालात्मजः काव्यं यत्किल तत्र निश्चितजगत्तत्वप्रदीपोपमे संपूर्णे नवमः सुखेन नवमः सर्गो निस
र्गोज्ज्वलः ३९ इति श्रीलोकप्रकाशे नवमः सर्गः ॥ ग्रंथाग्रं ५४२ एवमिदानीं नवसंवेधः प्राग्दिष्टो
निरूप्यते तत्र ज्येष्ठकनिष्ठायुश्चतुर्भंगी प्रपद्यते १ आद्यः प्राच्याग्यानवयोर्ज्येष्ठमायुर्यदा भवेत् १ भंगोन्य
: प्राग्ज्येष्ठस्य कनिष्ठस्य तु परे भवे २ तृतीयः प्राग्भवेऽल्पीयो ज्येष्ठमायुर्भवे परे आयुर्लघुद्वयोस्तु

यो नंगोष्ठेषु चतुर्थः ३ संज्ञी नरोऽथवा तिर्यङ् षष्ठ्याद्यनरकेषु वै पञ्चकृत्वः प्रगल्भवान्नष्टौ तूत्कर्षेण पूरयेत
४ यथा संज्ञी नरस्तिर्यङ् वा स्यान्नो नरके कश्चित् ततो मृतो मनुष्यो वा तिरश्चो वा ततः पुनः ५ तत्रैव नरके
यो मत्स्यो तिरश्चि वेति सः नवान्नष्टौ समाश्रयं नवमं च भवेत्ततः ६ अव्यवस्यमन्यपर्याय नरस्तिर्यङ् वानुयात्
वक्ष्यमाणेष्वपि बुधैः कार्यं वेनावनाख्यं ७ नवैकभवने द्वाषु ज्योतिष्कं च नरकेष्वपि तिर्यग्नरो किञ्चा
ष्टासु सौधर्मकृतिष्वष्टौ ८ नवान्नष्टौ पूरयेत्ता भवौ द्वौ च जघन्यतः इमौ पूरयतः प्रोक्ता नारकेषु सुरे
षु च ९ जघन्यायुष्ट्यां माघवत्यामुत्पद्यमानकः तिर्यङ् ज्येष्ठायुरन्यो वा भवान्समेव पूरयेत् १०।
तथाहि संज्ञीपंचेंद्रियस्तिर्यङ् पूर्वकोट्यायुरन्वितः जघन्यायुष्ट्योत्पन्नः सप्तम्यां नरकावनौ २ ११
ततश्चोद्वृत्य तिर्यक्षु सप्तम्यां च ततः पुनः ४ तिर्यक्षु च ५ ततस्तस्यां सप्तम्यां ६ च ततः पुनः १२ तिर्यक्षे।
व ततश्चासौ नोत्पद्यते सप्तमक्षितौ एवं सप्तभवान्कृत्वा ष्टमेऽन्यं भवमानुयात् १३ तिर्यङ् ज्येष्ठायुर्जघन्या
युक्ताया वाकृष्टजीविता अथवा तु वन्माघवत्यां भवान्पंचैव पूरयेत् १४ उत्पद्यते हि नरके तत्र तिर्यक्षु च
त्रिशः ततश्चासौ ष्टमभवे नोत्पद्यते सप्तमक्षितौ १५ उत्कृष्टायुष्ट्यां न्यायुष्ट्या वा सप्तमक्षितौ तिर्यङ्ज्ये।
ष्टायुरन्यो वा त्रिभवः स्याज्जघन्यतः १६ तत्र तिर्यग्भवो वक्ष्यते द्वौ स्यात्सप्तमक्षितौ माघवत्यां नारको तां
तिर्यक्षु च वा तिर्यतः १७ चतुर्भंग्यां नरः संज्ञी सप्तमं नरकं व्रजेत् जघन्यादुत्कर्षतोऽपि संपूरयेद्भवद्वयं १
८ आनतादिचतुःकल्पां सर्वग्रैवेयकेषु च चतुर्भंग्यां भवत्यमर्त्यः सप्तोत्कर्षाद्भवान्सृजेत् १९ त्रि
द्वेषु चतुरस्तत्रः समुत्पद्य नारकोऽसौ अथवा स्यमन्यपर्यायि सदा सप्तष्टमभवे २० विजयादिचतुष्कं च
भवान्पंचैव पूरयेत् त्रीन्भवान्नृषु मध्ये च द्वौ भवौ विजयादिषु २१ जघन्यतस्त्वानतादिष्वातसु
ति विषयेष्वपि भवांस्त्रीन्मनुजः संज्ञी सर्वार्थे तु भवेत् २२ यदानतादिदेवानां स्यात्कर्मप्रजा।

तां नरेष्वेवोत्पत्तिरिति जघन्येन भवास्त्रयः २३ जघन्याच्चोत्कर्षतोऽपि पंचमेऽनुत्तरे नर त्रीन्भवान्पूर
येत्स्मात्स भवः स्यात्पसोततः २४ भवनव्यंतरज्योतिष्काद्यकल्पद्वयावधि युग्मिनो नरतिर्यंचः पूरयं
ति भवद्वयं २५ जघन्यादुत्कर्षतोऽपि युग्मिनां यत्सुधाशिषु उत्पन्नानां पुनरपि स्यादुत्पत्तिर्न युग्मि
षु २६ रत्नप्रभायां भवनाधिपतिव्यंतरेष्वपि असंज्ञी पर्याप्ततिर्यङ् भवयुग्मं समर्थयेत् २७ यदस्मान्नर
कस्वर्गो वोत्पन्नस्य ततः पुनः असंज्ञितिर्यक्षूत्पत्तिर्भवनानां तेऽस्य भवेत् २८ भवनव्यंतरज्योतिः
सहस्रारांतनाकिनः आद्यषड्नरकोत्पन्ननारकाश्च समेऽप्यमी २९ उत्पद्यमानाः पर्याप्तः संज्ञिति
र्यग्नरेषु वै पूरयंति भवानष्टौ उत्कर्षेण च भावना ३० कश्चिद्भवनपत्यादिरुत्वेकांतरं भवन् चतुः
षोरे हि पर्याप्तः संज्ञितिर्यग्नरो भवेत् ३१ ततः स तिर्यङ् मत्स्यो वा नानुयान्नवमे भवे पूर्वोक्तभवने
शादिन्नावंताद्दक्स्वकावतः ३२ संज्ञिपर्याप्ततिर्यक्षु सप्तमक्षितिनारकाः पूरयंति भवान्षड्वै
उत्कृष्टस्थितिशालिनः ३३ उत्कृष्टस्थितियुक्तास्तु सप्तमक्षितिनारकाः तिर्यक्ष्वेवोत्पद्यमाना स्तुष्यत्वं
चतुरकाः ३४ मनुष्येष्वानतादिस्थ श्चतुष्क सर्वग्रैवेयकामराः उत्पद्यमाना उत्कर्षात् नृषु षड्भवपूर
काः ३५ मनुष्येषूत्पद्यमाना विजयादिविमानगाः भवांश्चतुर उत्कर्षात्पूरयंति निरंतरं ३६ जघन्यत
स्त्वानतादिदेवाद्विभवपूरकाः यतश्च्युतानामेतेषां स्यात्पत्तिर्मनुजान्विना ३७ उत्कर्षतो जघन्याच्च॥
सुराः सर्वार्थसिद्धजाः मनुष्येषु समुत्पद्य पूरयंति भवद्वयं ३८ भवनव्यंतरज्योतिः सौधर्मेशाननाकि
नः पृथ्व्यप्तरुषूत्पद्यमाना द्विभवपूरकाः ३९ जघन्यादुत्कर्षतोऽपि भूयोप्युत्पत्त्यसंभवात् तेषां।
निर्गत्य पृथ्व्यादेर्भवेन त्वादिमा किंतु ४० वायुतेजःकायायास्तु देवानां गत्यसंभवात् तदीयो भवसंवे
धो नात्र प्रोक्तो जिनेश्वरैः ४१ असंज्ञिसंज्ञितिर्यंचो नराः संज्ञिन एव च असंख्यायुर्नृतिर्यक्षु पूरयंति

भवद्वयं ४२ युग्मिनां नृतिरश्चां च द्विपद्यानंतरे भवे गतिर्देवगतावेव भवाः वह्निनिरूपिता ४३ सूक्ष्मा
केऽप्यादिवायुष्वेकांतरेण परिभ्रमन् भवानसंख्यान्प्रत्येकं मनुत्कृष्टस्थितिः स्पृशेत् ४४ एवमंबुकाय
कोऽपि प्रत्येकं स्याग्निवायुषु उत्पद्यमानोऽसंख्येयान् भवानुत्कर्षतः स्पृशेत् ४५ वह्निकायोऽपि पृ
थ्व्यंबुकायिष्वेकांतरेण भवान् कुर्यादसंख्यातानिलोऽप्येवं पृथ्व्यंबुवह्निषु ४६ तथा सूक्ष्माग्निमरुतोः
प्रत्येकं च वनस्पतौ भवानसंख्यान् कुर्वंति जायमाना निरंतरं ४७ एवं च वनस्पतिरपि पृथिव्यादिच
तुष्टये प्रत्येकमुत्पद्यमानः कुर्यादसंख्यकान् भवान् ४८ वनस्पतिकायिकेषूत्पद्यमानो वनस्पतिः
भवाननंतान् कुर्वीत निरंतरं परिभ्रमन् ४९ प्रत्येकमुत्पद्यमानाः पृथिव्यादिषु पंचसु भवान्संख्यान्
विदधति प्रत्येकं विकलेंद्रियाः ५० प्रत्येकं विकलेष्वेवं पंचसूक्ष्मकायिकादयः प्रत्येकमुत्पद्यमानाः सं
ख्येयभवपूरकाः ५१ विकलास्त्रेष्वसंख्येयान् सर्वेऽपि विकलेंद्रियाः भवान्विदधुः प्रत्येकं जायमानाः प
रस्परं ५२ पूर्वोक्तायुश्चतुर्भंग्यां ज्येष्ठायुः सप्तलक्षिते भंगत्रये भवानष्टौ कुर्युः सर्वे क्ष्मादयः ५३ तथा
द्विः॥ पृथ्वीकायिक उत्कृष्टायुष्क उत्कृष्टजीविषु अप्कायिकेषूत्कर्षेण भवेद्भवचतुष्टयं ५४ एवमेकांत
रे वारानुत्पद्य वारं ततः अवश्यमन्यपर्यायं जनितेन भवमेव च ५५ उत्कृष्टायुर्भूमिकायोऽनुत्कृष्टायु
ष्कवारिषु उत्पद्यमानोऽप्युत्कर्षात् भवानष्टैव पूरयेत् ५६ एवं भूकायिकोऽनुत्कृष्ट उत्कृष्टजीविषु
उत्पन्नश्चोत्कर्षतः स्यादष्टभवपूरकः ५७ अप्कायादीनामपीत्थं विकलानां च नाप्यतो भवाना ६४
प्रकाराः संवेधे ज्येष्ठायुर्भंगकत्रये ५८ अनुत्कृष्टायुषां त्वेषां स्यादनुत्कृष्टजीविषु संवेधः प्राक्तनः एवं॥
संख्यासंख्यभवात्मकः ५९ पृथ्व्यादीनामसंख्यभवात्मको विकलानां संख्यभवात्मकं इति क्ष्मादयो वि
कलाश्चाष्ट जघन्यतो भवद्वयं कुर्युर्ज्येष्ठकनिष्ठायुः स्वभंगचतुष्टये ६० युग्मिवर्जाश्च मनुजास्तिर्यंचः।

सत्संज्ञिनः प्रत्येकं जायमानाः स्युर्मिथोऽष्टभवपूरकाः ६१ जघन्योत्कृष्टायुःस्वचतुर्भंग्यामपि स्फुटं भवानुत्कृ
ष्टान् भवेत्तत्पर्यायमाप्नुयुः ६२ तथैते पृथ्व्यादि पंचके विकलत्रये जायमानाश्चतुर्भंग्या कुर्युः प्रत्येक
मष्टतान् ६३ तथा ह्यमी ह्यसंज्ञिनः सविकलास्तिर्यक्संज्ञिसंज्ञिषु नृष्वयुग्मिषु चोत्पद्यमानाश्चतुष्टये ६४ पू
र्वोक्तिभवानष्टौ स्वचतुष्टयादिको मुमान् नरतिर्यग्भवात्तस्मात् पृथ्व्यादित्वमाप्नुयात् ६५ जघन्याद्यु
त्कर्षतोऽपि मनुष्याः पवनाग्निषु उत्पद्यमाना द्वावेव पूरयंति भवौ खलु ६६ यतो हि पवनाग्निभ्य उद्
वृत्तानां शरीरिणां अनंतरभवे नैव नरेषूत्पत्तिसंभवः ६७ यथोक्तानामथानंतसंवेधानां यथागमं कालमा
नं विनिश्चित्य सामान्येनायं वितन्यते ६८ जघन्यादंतर्मुहूर्तमुत्कर्षात्पूर्वकोटिकां स्थितिं बिभ्रद्याति ति
र्यङ् नरकेषु स्थितिष्वपि ६९ तावदायुःस्थितेष्वपि ततो मृत्वाऽपि नारकाः सहस्रारांतदेवेषु पंचेंद्रिय
स्थितिर्व्रजेत् ७० देवास्तेऽपि दशायुष्कं श्वेषां यांति ततश्च्युताः असंख्यजीवितिर्यङ्त्रं यांति शानांतना।
किषु ७१ नरो मासपृथक्त्वायुर्याति जघन्यतः वंशादिषु दशसु सहस्रेषु वर्षपृथक्त्वजीविनः ७२ उत्क
र्षात्पूर्वकोट्यायुर्यात्यसौ दशसु समसु श्रायांसुस्व स्थितिष्वेवं नृष्वर्कनारकाश्चापि ७३ ना जघन्यान्
मपृथक्त्वायुरास्वर्गयं व्रजेत् उर्ध्वं त्वष्टपृथक्त्वायुर्याति यावदनुत्तरान् ७४ उत्कर्षात्त्रिपल्यायुः स्वर्द्वयं
यावदीतसः कद्दिनतः पूर्वकोट्यायुष्कः एवसगच्छति ७५ तिर्यङ् युग्मिनृतिर्यञ्चः अंतर्मुहूर्तजीवितः ग
च्छेज्जघन्यतो मासपृथक्त्वायुर्नरः पुनः ७६ उत्कर्षतः पूर्वकोटिमानायुष्कावुभावपि असंख्यायुर्नृतिर्यक्षु।
त्पद्येते नाधिकायुषौ ७७ तत्र शेषाणां पूर्वा परयोर्भवयोः स्थितिः गुरुर्लघुश्च ज्ञेया तत्तद्यथायुरपेक्षया।
७८ एवं च विवक्षितभवप्राप्य भवयोः परमां स्थितिं लब्ध्वा भवसंख्यां च जघन्यां वा गरीयसीं ७९ स्वयं वि
भाव्य निःशंकं विवक्षितशरीरिणां भवसंवेधकालस्य मानं ज्येष्ठमथावरं ८० यथा गरिष्ठायुष्कस्य मनुष्य।

स्यादिमक्षितौ उत्कृष्टायुर्नारकत्वे जघन्यमानस्यवासकृत ८१ उत्कृष्टोभवसंवेधे कालः संकलितो भवेत् चतु
ःपूर्वकोट्युक्त चतुःसागरसंमितः ८२ द्वयोरुत्कृष्टायुषोस्तु संवेधःस्याज्जघन्यतः पूर्वकोटिसमधिक।
सागरोपमसंमितः ८३ उत्कृष्टायुर्नरे लघुस्थितिनारकयोर्गुरुः सोष्टायुतचतुष्काढ्य पूर्वकोटिचतुष्टयं ८४
उत्कृष्टायुर्नरे लघुस्थितिनारकायां लघुः संवेधोष्टायुतयुत पूर्वकोटिमितो मतः ८५ जघन्यायुर्नरोत्कृष्ट स्थि
ग्री तिनारकायोर्लघुः चतुर्मासपृथक्त्वाढ्य सप्तवारिधिचतुष्टयं ८६ जघन्यायुर्नरोत्कृष्टजीविनारकयोर्लघु
:एकमासपृथक्त्वाढ्य वार्धिमानो भवत्यसौ ८७ उत्कृष्टो भवसंवेधे जघन्यजीविनोर्द्वयोः चतुर्मासपृथक्त्वाढ्य
वर्षायुतचतुष्टयं ८८ जघन्योभवसंवेधो जघन्यजीविनोर्द्वयोः
एकमासपृथक्त्वाढ्या दशवर्षसहस्रकाः ८९ स्थापना यथावा ज्येष्ठायुष
स्तिरश्चः प्रोत्पन्नवतः सप्तमक्षितौ जघन्यायुष्टयोत्कृष्टा भवसंवेधसं
स्थितिः ९० चतुः पूर्वकोट्युक्ताः स्युः षट्षष्टिपयोधयः अल्पा
युषोत्तमुत्कर्षे चतुष्टययुजोऽस्य ते ९१ यथावा ज्येष्ठायुषोनृणां
ज्येष्ठायुष्टया सप्तमक्षितौ ज्येष्ठः कालः पूर्वकोट्या युताः स्युस्त्रिं
शदब्धयः ९२ जघन्यायुर्नृणामल्पायुष्टया सप्तमक्षितौ जघन्यो
पृथक्त्वाढ्या द्वाविंशतिःपयोधयः ९३ एवं संवेधयोगेषु सर्वेषाम ९५
पि देहिनां क्रियाद्भवसंवेध कालोगुरुर्लघुः स्वयं ९४ स्यादु
यानिस्तरह्यति नह्यतिकृत्याविविच्यते पंचमांगे चतुर्विंशे शतं
सावंतदर्थिभि ९५ अथाष्टानवतेर्जीवभेदानामुच्यते क्रमात्।

मनु	रत्न ना	सं० सं०	का०
उ पू·को२	उ सा·१	उ० ८	पू४ सा४
उ· पू·को२	उ० सा०१	ज० २	पू२ सा·१
उ पू·को	ज· व· १००००	उ० ८	पू४ व४००००
उ· पू·को	ज० व१००००	ज० २	पू·२ व२००००
ज·मा·पृ	उ सा०	उ० ८	मा·पृ·४ सा४
ज·मा·पृ	उ सा·	ज· २	मा·पृ·२ सा·२
ज·मा पृ	ज· व·१००००	उ ८	मा·पृ४ व·४००००
ज·मा·पृ	ज· व·१००००	ज· २	मा·पृ·२ व·२००००

क्रमशोऽशाल्पबहुता महाल्पबहुताभिदा ९६ गर्भजा मनुजाः स्तोका १ नार्यः संख्यगुणा २ स्ततः तास्यश्च स्व
लपर्याप्ता वह्नयो ३ ऽनुत्तरनाकिनः ४ ९७ क्रमादसंख्यघ्नास्तेभ्य श्चोर्द्ध्वग्रैवेयकत्रये ५ मध्यत्रये ६ ऽधस्त्र
येचाच्युते ८ चैवारणेपिच ९ ९८ प्राणते १० नते ११ स्वर्गे समुत्पन्नाः सुधाशिनः क्रमेणसंख्येयगु
णाः सप्ताप्यते निरूपिता ९९ ततो माघवतीजाता १२ मघाजातास्त्र नारकाः सहस्रारसुरा १४ स्तेभ्यो मह
शुक्रसुरा १५ स्ततः १०० तेभ्योरिष्टानैरयिका १६ स्तेभ्यो लांतकनाकिनः १७ तेभ्योजनानारकाश्च १८ ब्रह्म
लोकसुरा १९ स्ततः २ तेभ्यः शैलानैरयिका २० माहेन्द्रत्रिदशास्ततः २१ तेभ्यः सनत्कुमारस्था २२ वंशानैर
यिकास्ततः ३ तेभ्यः संमूर्छिमनराः २४ स्तेभ्यश्चेशाननाकिनः २५ क्रमादसंख्येयगुणा श्चतुर्द्दशाप्यमी स्मृत
:४ ईशानस्थसुरेभ्यस्तद्देव्यः संख्यगुणा २६ स्ततः सौधर्मदेवाः २७ स्तद्देव्य २८ स्तेभ्यः संख्यगुणाः स्मृताः ४
असंख्येयगुणास्तेभ्यो भवनाधिपनाकिन २९ भवनाधिपदेव्यश्च ३० तेभ्यः संख्यगुणाधिकाः ५ ताभ्योऽसं
ख्यगुणाः प्रोक्ताः प्रथमक्षितिनारकाः ३१ तेभ्योप्यसंख्येयगुणाः पुमांसः पक्षिणः ३२ स्मृताः ६ पक्षिण्यो ३३
स्थलचरा ३४ स्तत्स्त्रियोः ३५ जलचरा अपि ३६ अंबुचर्यो ३७ व्यंतराश्च ३८ ३८ व्यंतर्यो ३९ ज्योतिषामराः ४०
७ ज्योतिष्कदेव्यः ४२ खचरक्लीवाः ४३ स्थल ४३ पयश्चराः नपुंसकाएव ४४ ततः पर्याप्ताश्चतुरिंद्रियः ४५ ८
क्रमेणसंख्येयगुणाः पंक्तिणाद्यास्त्रयोदश ततः पर्याप्तपंचाक्षा ४६ अधिकामनुसंज्ञिनः ९ तेभ्यः पर्याप्त
कद्व्यक्षाः ४७ पर्याप्ताः त्रीन्द्रियास्ततः ४८ क्रमाद्विशेषाभ्यधिकाः प्रज्ञप्ताः परमेश्वरैः १० तेभ्योपर्याप्ताः पंचा
क्षा ४९ असंख्येयगुणास्ततः अपर्याप्ताश्चतु ५० स्त्री ५१ द्वीन्द्रियाः ५२ स्युरधिकाधिकाः ११ तेभ्यः प्रत्येक
पर्याप्ता द्रुमाः पर्याप्तकाः स्ततः ५३ निगोदा बादराः ५४ ५४ स्थूलपृथ्व्यो ५५ ऽंबु ५६ मरुतोपिच ५७ १२ स्थूल
पर्याप्तका अग्नि ५८ प्रत्येकद्रु ५९ निगोदकाः ६० पृथ्वी ६१ वह्नि ६२ वायवश्च ६३ सूक्ष्माऽपर्याप्तवह्नयः ६४
पर्याप्तप्रत्येकद्रुमादयः॥ बादराण्यसंख्यगुणाः क्रमतस्ततश्च सूक्ष्मा ऽपर्याप्ताः क्ष्मा ६५ ऽंबु ६६ वायवो।

न्य इष्ठधिकाः १४ गति॥ ततश्चासंख्येयगुणाः पर्याप्तसूक्ष्मवह्नयः ६८ ततः पर्याप्तसूक्ष्मक्ष्मा ६९ जो ७० निल
७१ अधिकाधिकाः १५ असंख्यघ्नास्ततोऽपर्याप्तकसूक्ष्मनिगोदकाः ७२ ततः संख्यगुणाः पर्याप्तकाः सूक्ष्मनिगो
दकाः ७३ १६ क्रमात्ततोऽनंतगुणा अत्यारामी अभव्यकाः ७४ भ्रष्टसम्यक्त्वाश्च ७५ सिद्धाः ७६ स्थूलपर्याप्त
स्पतयः ७७ १७ तेभ्यश्च बादराः पर्याप्तकाः ७८ स्युरेषतोऽधिकाः स्थूलापर्याप्ततरवः ७९ स्ततोऽसंख्यगुणा
: स्मृता १८ अपर्याप्ता बादरास्तु तेभ्यो विशेषतोऽधिकाः ८० सामान्यतो बादराश्च ८१ विशेषाभ्यधिकास्ततः १९
असंख्येयगुणास्तेभ्यः सूक्ष्माऽपर्याप्तभूरुहः ८२ ततः सामान्यतः सूक्ष्मापर्याप्तकाः किलाधिकाः ८३ २० स्युः सं
ख्येयगुणास्तेभ्यः सूक्ष्मपर्याप्तभूरुहः ८४ इतोऽधिकाधिका ज्ञेया वक्ष्यमाणाश्चतुर्दश २१ सूक्ष्माः पर्याप्तकाने
ष्यात ८५ सूक्ष्माः सामान्यतोऽपि च ८६ भव्या ८७ निगोदिन ८८ ओघात्तु वनकायिकाः ८९ २२ तथैकेन्द्रि
या ९० तथा तिर्यञ्चश्च ९१ ततः पुनः मिथ्यादृशः ९२ अविरताः ९३ सकषाया ९४ स्ततोऽपि च २३ छद्म
स्थाश्च ९५ संयोगाश्च ९६ संसारिण ९७ स्ततोऽथ तः सर्वजीवाश्चेति ९८ मयामहाल्पबहुतोदिता २४ धर्म
वंजीवास्तिकायौ यौ प्राक्प्रोक्तः पुरोदितैः द्रव्यक्षेत्रकालभावगुणैः सप्रपञ्चमानवेत २५ अनंतजीवद्रव्या
त्मा द्रव्यतोऽप्युदीरितः क्षेत्रतो लोकमात्रोऽसौ सत्त्वात्तेषां जगत्त्रये २६ कालतः शाश्वतो वर्णादिभिः शून्यस्व
भावतः उपयोगगुणश्चासौ गुणतः परिकीर्तितः २७ निरंतरं बध्यमानैः सचकर्मकदंबकैः विसत्वलोऽस्य
वेनोधै बद्धश्चाविष्टितांगकः २८ पुद्गलैर्निचिते लोकेऽञ्जनपूर्णसमुद्गवत् मिथ्यात्वप्रमुखैर्भूरि हेतुभिः कै
र्मपुद्गलान् २९ करोति जीवः संबद्धान् स्वेन क्षीरेण नीरवत् लोहेन वह्निवद्वापि तत्कर्मेत्यख्यातं जिनैः
३० तच्च कर्म पौद्गलिकं शुभाशुभरसान्वितं नत्वन्यतीर्थिकाभिष्टा दृष्टादिवदमूर्तकं ३१ व्योमादिवदमूर्त
त्वे त्वस्य विश्वागिसाक्षिकौ नेत स्यातानुग्रहोपघातौ नो मत्तवत् खलु ३२ हेतवः कर्मबंधे च चत्वारो मूलभेद
तः सप्तपंचाशदेते च स्युस्तदुत्तरभेदतः ३३ मिथ्यात्वाविरतिकषाययोगसंज्ञाश्च मूलभेदास्तु तत्र च पंच

MEMORIAL

विधस्यान्मिथ्यात्वं तच्च कथितं प्राक् ३४ असंयतात्मनोऽस्याद्वादशधाविरतिः खलु षट्कायारंभपंचाक्षविना
संवरलक्षणा ३५ कषाया नोकषायाश्च प्राक् षोडश नवोदिताः योगास्तथा पंचदश ज्ञाप्तपंचाशदित्यमी ३६
कर्मबंधः प्रकृत्यात्मा स्थितिरूपो रसात्मकः प्रदेशबंध इत्येवं चतुर्भेदः प्रकीर्तितः ३७ प्रकृतिस्तु स्वभावः
स्यात् ज्ञानावृत्यादिकर्मणां यथाज्ञानाच्छादनादिः स्थितिः कालविनिश्चयः ३८ बद्धं विवर्तं कर्मकर्म
त्वेन स्थितिष्ठति यावत्कालं स्थितिः सास्या अजेन ज्ञातः परं ३९ रसो मधुरकटुकादिः सदसत्कर्मणां मतः प्रदे
शबंधस्तु दलिकोपचयात्मकः ४० यथा हि मोदकः कश्चित्प्रकृत्या वातहृद्भवेत् श्लेष्मादिजन्माक
श्चित्तु पित्तनुत्क्षीरकादिजः ४१ कश्चित्पक्षस्थितिः कश्चिन्मासप्रभृतिकस्थितिः स्यात्कश्चिन्मधुरः कश्चि
त्तिक्तः कश्चित्कटुकस्तथा ४२ कश्चित्सेरदलः श्लिष्मादिसेरदलात्मकः कार्यं भावनाविज्ञैः प्रकृत्यादिषु
कर्मणां ४३ मूलप्रकृतिभेदेन तच्च कर्माष्टधा मतं स्याद् ज्ञानीयाख्यं दर्शनावरणीयकं ४४ वेदनीयं मोहनी
यमायुर्गोत्रं च नाम च अंतरायं तथैषा मुत्तरप्रकृतिस्तु च ४५ ज्ञानानि पंचोक्तानि प्राक् यच्च तेषां स्वभा
वतः आच्छादकं पट इव दृष्टांतत्पंचधा मतं ४६ मतिश्रुतावधिज्ञानावरणानि चतुष्कं मनःपर्याया
वरणं केवलावरणं तथा ४७ आवृतिश्चक्षुरादीनां दर्शनानां चतुर्विधा निद्राः पंचेति नवधा दर्शनावरणं
मतं ४८ सुखप्रबोधा निद्रास्यात् दुःखप्रबोधका निद्रानिद्रा प्रचला च स्थितस्योर्ध्वस्थितस्य वा ४९ गच्छता
पि जनस्यास्य प्रचलाप्रचला भवेत् स्त्यानर्द्धिर्वासुदेवार्धबलाद्यक्लिष्टचिन्तितार्थकृत् ५० आद्यसंहननापेक्षमि
दमस्याः बलं मतं अन्यथा तु वर्तमान युवभ्योऽष्टगुणं भवेत् ५१ दर्शनानां हंति लब्धिं मूलादाद्यचतुष्टयं लब्धं
दर्शनलब्धिं प्राग् निद्रानिद्रादिपंचक ५२ वेदनीयं द्विधा साता सातरूपं प्रकीर्तितं स्यादिदं मधुदिग्धासिधारा
लेहनसंनिभं ५३ यदुदयात्प्रियत्वं स्रगादियोगाद्भवेत् तदिदं सातं यत्कंटकादितोऽप्रियरूपं तथा वेद्यं
तत्त्वसातं तत्र ५४ अन्मद्यवन्मादयति जीवं तं मोहनीयकं द्विधा दर्शनचारित्रमोहनेदात्तदीरितं ५५

मीयात्वमिश्रसम्यक्त्व भेदात्त्रिविधं दर्शनमोहनीयं तु पंचविंशतिधा भवेत् ५६ कषायाः षोडशानव
नोकषायाः पुरोदिताः इत्यष्टाविंशतिविधं मोहनीयमुदीरितं ५७ एतिगतं तरं जीवो येनायुस्तच्चतुर्विधं दे
वायुश्च नरायुश्च तिर्यग्नैरयिकायुषी ५८ इदं निगडतुल्यं स्यात् दशामापेदसंगत्वाक जीवः परभवं गंतु ना
शक्नोति कदापि यत् ५९ गीयते शब्द्यते शब्दैर्यस्मादुच्चावचैर्जनः तद्गोत्रकर्म स्याद्वेत द्विधोच्चनीचभेदतः ६०
इदं कुलालतुल्यं स्यात् कुलालो हि तथा सृजेत् किंचित्कलशादीनां तत्तत् यथा लोके प्रशस्यते ६१ किंचित्
वक्रस्थिताकारं तथा कुर्याद्दमोयथा मद्यस्थापितं तत् लोकेन निंद्यते ६२ कर्मणापि तथानेन धन
रूपोज्झितापि हि उच्चैर्गोत्रेनया कश्चित् सम्मानः क्रियते सुमान् ६३ कश्चिच्च नीचैर्गोत्रत्वात् धनरूपादिमाना
पि क्रियते कर्मणानेन निंद्यो नंदनृपादिवत् ६४ गतिजात्यादिपर्यायानुभवं प्रति देहिनः नमयति प्रह्वयति
यत्तन्नामेति कीर्तितं ६५ चित्रकृत्सदृशं चैतत् विचित्राणि सृजेद्यथा चित्राणि प्रमिथो तुल्यान्येवं नामापि दे
हिनः ६६ द्विचत्वारिंशद्विधं तत् स्थूलभेदविवक्षया स्यात्त्रिनवतिविधं त्र्युत्तरशतविधं नु वा ६७ सप्तषष्टि
विधं वा स्यात् तथा हि क्रमशोच्यते विकल्पानां चतुर्णामप्येषां विस्तरागमात् ६८ गति १ जाति २ वपु ३ श्चैवोपांगं ४
बंधनपंचकं ५ संघातनं ६ संहननं ७ संस्थानं ८ वर्ण ९ एव च १० गंधो ११ रसश्च १२ स्पर्शश्च १३ आनुपूर्वी च ख
नभोगतिः १४ चतुर्दशैतानि दिष्टाः पिंडप्रकृतयो जिनैः ७० प्रत्येकप्रकृतयो ह्यष्टाविंशतिरिमाः पुनः त्रसस्थावरद
शके पराघातादिचाष्टके ७१ त्रसबादरपर्याप्तप्रत्येकस्थिरशुभानि सुभगं च सुस्वरमादेययशो नाम्नी चेत्या
द्यदशकं स्यात् ७२ स्थावरसूक्ष्मापर्याप्तकानि साधारणास्थिराशुभं दुःस्वरदुर्भगनाम्ना नवत्वनादेयम
यशश्च ७३ द्वितीयं दशकं चैतत् पराघाताष्टकं त्विदं पराघातं तथोच्छ्वासमातपोद्योतनामनी च ७४ अगुरु
लघ्वाख्यं तीर्थकृन्नामकर्म च निर्माणमुपघातं च द्विचत्वारिंशदित्यमी ७५ चतुर्दशोक्ता गत्याद्याः पिंड
प्रकृतयो त्रयाः पंचषष्टिसुरेवंताः प्रतिभेदविवक्षया ७६ गतिश्चतुर्धा नरकतिर्यग्नरसुरा इति एकद्वि

त्रिचतुःपंचेंद्रियाः पंचेति जातयः ७७ देहास्त्वौदारिकादयः पंच प्रागुदितानि वै अंगुल्यादीन्युपांगानि भेदांगोपांगयोर
यं ७८ नखांगुलीपर्वरेखाद्युपांगान्यपराणि च अंगोपांगानि निर्दिष्टान्यङ्गसृष्टज्ञानशालिभिः ८० औदारिकाद्यंगगत
पुद्गलानां परस्परं निबध्यबध्यमानानां संबंधघटकं हि यत् ८१ तद्बंधनं स्वस्वदेहतुल्याख्यं पंचधोदितं दार्वादिसंधिघट
कजत्वादिशात्संहृदः ८२ औदारिकाद्यंगयोग्यान् संघातयति पुद्गलान् यत्तत्संघातनं पंचविधं बंधनवद्भवेत् ८३
यद्वा पंचदशविधं भवेत्तनुविबंधनं औदारिकौदारिकाख्यं बंधनं प्रथमं भवेत् ८४ औदारिकतैजसाख्यं तथौदा
रिककार्मणं ३ स्याद्वैक्रियवैक्रियाख्यं ४ तथा वैक्रियतैजसं ५ ८५ वैक्रियकार्मणाख्यं ६ चाहारकाहारकं तथा
७ आहारकतैजसं च ८ तथाहारककार्मणं ९ ८६ औदारिकतैजसकार्मणबंधनमीरितं वैक्रियतैजसकार्मणबंध
नमथापरं ८७ आहारकतैजसकार्मणबंधनमेव च तैजसतैजसबंधनं च तैजसकार्मणं ८८ कार्मणकार्मणं चेति
स्युः पंचदशामूनि हि तत्र पूर्वसंगृहीतैर्यदौदारिकपुद्गलैः ८९ गृह्यमाणौदारिकाणां पुद्गलानां परस्परं संबंधस्
तदौदारिकौदारिकाख्यबंधनं ९० एवं चौदारिकपुद्गलानां सह तैजसपुद्गलैः संबंधघटकं त्वौदारिकतैजसबंधनं ९
१ औदारिकपुद्गलानां सह कार्मणपुद्गलैः संबंधकृद्भवत्यौदारिककार्मणबंधनं ९२ भावनीयं विकल्पाद्वैक्रियादि
बंधनेष्वपि स्वयं विचक्षणैः कार्या दिङ्मात्रं तु प्रदर्शितं ९३ षट्कं संहननानां संस्थानानां षट्कमेव च वर्णाः पंच रसाः पंचाष्टौ स्पर्शा
गंधयोर्द्वयं ९४ तत्र वर्णा नीलकृष्णौ कटुतिक्तादि घोरसौ गुरुः खरो रुक्षः शीतौ ता वितिरूपशीतभेदतः स्पर्शाः शुभाः इति नव
कम् [illegible] कीर्तितं वर्णगंधरसस्पर्शाः शेषाः शस्तादशाभमा ९६ आनुपूर्वी च तत्र स्युश्चतुर्गतिसमाभिधाः द्विधा विहा
योगतिः शस्ताशस्तभेदतः ९७ एवं भेदाः पंचषष्टिः पिंडप्रकृतिजाः स्मृताः पंचानामौदारिकादि बंधनानां विवक्षया ९
८ साष्टपंचषष्टिरष्टाविंशत्याप्रकृतिभिः शुभाशुभाभिः प्रत्येकाभिर्युक्ताः स्युर्नाम्नस्त्रिनवतिर्भेदाः ९९ बंधनानां पंचद
शानां त्वविवक्षितस्युर्नामकर्मणो भेदास्त्रिभिः समधिकं शतं १०० बंधनसंघातनयोर्नाम्नि स्वपंचदशपंचसंख्या
नां सहबंधसजातियत्वान्नांगतः पृथगणनं १ कृष्णादिभेदभिन्नाया वर्णादि विंशतिः पदे सामान्येनैव वर्णादि

त्रिधांगोपांगानि तथा विना तैजसकार्मणे ७८ नखांगानि वा कष्टा रूपा मुखादिकानि वैः ३-२

९७

चतुष्कमिह गृह्यते ४ पूर्वोक्तमनुत्तरशता देशघातिषड्विंशतिस्ततः कृतेऽप्रमाणेमत्र षष्टिर्भेदा भवंतीति ३ सम्यक्त्वमिश्र
मोहीय स्त्यानत्रिबंधमर्हतः एतो हि ष्टुपार्श्वस्थ मिथ्यात्वपुंजात्मको ५ त्रिपंचाशत्स्वकृतयस्तदेवं कर्मणां ना ३७
म्नश्चसप्तशष्टिस्फुः शतं विशेषमीलिताः ६ अष्टिक्रियांतबंधता उदयो ८ दीरणे पुनः सम्यक्त्वमिश्रमहिता स्तारविंश
शतं खलु ७ नाम्नस्त्र्यैवातपंच पंचाशत्तेशेषकर्मणां सत्तायमष्टपंचाशत् मेवप्रकृतयः शतं ८ चेहंधना निपंचे
व विवक्ष्यातत दा पुनः अष्टचत्वारिंशच्छतं सत्तायां कर्मणां भिदः ९ नामकर्मप्रकृतीनां मध्ये तासां निरूपणात आद्या
जनेगुरुपाते समितासमयोद्दिष्टि १० चतुर्भीर्गतिनामस्याः प्राप्तिः स्वस्वागतेर्भवेत पंचत्वो जातिनामत्पा एकस्याद्य।
जातासवत्तु ११ पंचानांवपुषां हेतुः स्यात्पुत्रलाम पंचधा औदारिकवैक्रियाहारकांगोपांगसाधनं १२ त्रिधांगोपांग
नामस्याद्बंधनानिव पंचधास्फुः पंचदशांगानां मिथः संबंधहेतवः १३ असम्बंधनेषु संघातनामकर्मणा स
कृतानांपुद्गलानां बंधेन घटातमिथः १४ सक्तूनां संगृहीतानां यथापत्रकरादिना ह्रतादिश्लेषणद्रव्यं विनाबंधो
मिथो न हि १५ औदारिकादियोग्यानां स्यात्संघातननामतः संघातकं पुद्गलानां दंतालीवहृणावलेः १६ षण्णां
संहननानां च संस्थानानां च तावंता तत्र हि न्नोषकारीणि स्युर्नामानि तदाख्यया १७ तत्र वर्णगंधरसस्पर्शनिष्पत्तिहेतवः
वर्णादिनामकर्माणि विंशतिः स्युः शरीरिणां १८ द्वित्रिचतुःसमयेन प्रवर्तितो विगृहेण परलोकं करपरलांगलगोमू
त्रिकादिवक्रमनरूपायं १९ स्यादुदयश्चानुपूर्व्या वक्रगतो विटपस्य रज्जुकल्पायाः स्वस्वगतिसमाश्रियो श्रेणिवि
धानात्स्वगतिनेदात् २० गतिर्हंसवत्वृषा सदिहयोगतेर्भवेत खरादिवत्समादुष्टा स्यादसत्स्ववगतिनामतः २१
त्रसाद्वित्रिचतुःपंचेन्द्रियाःसुः स्थावरनामतः स्फुर्बादरा बादराख्यात स्थूलदृष्ट्यादयोगिनः २२ लब्धिकरणपर्याप्ताः ९८
पर्याप्तनामकर्मतः आत्यक्ततनवो जीवाः सुः प्रत्येकाख्यकर्मणा २३ स्थिरनामोदयाद्दंताः स्थ्यादिस्यात्स्थिरमंगिनां
नाभेरूर्ध्वमूर्धादि शुभनामोदयाच्छुभं २४ स्पृष्टोमूर्द्धादिनाऽप्यन्यः सुभगत्वादेवमोदते अशुभत्वादेवपरः स्पृष्टः क्रु
ध्यत्पदादिना २५ स्यात्प्रियो नुपकर्त्रापि लोकानां शुभनामोदयात् मनोरमस्वरः प्राणी वेत्सुस्वरनामतः २६ आयुः

मउकंचपत्ना
हत्वोः श्रयुग
कणविबङ्का
जाक्तोणितेत्तस्म
गृत्नगनामुद्दते
उदगाश्कारमा
विक्रानस्त्वेण
दुभगस्यदण२
सुनगुदणवि
डःकोई किंवि
आमघडश
गप्पाइवि जा
यइत्तद्दोमान
तोजाहाण्णन
श्चाणत्तिकपय
रा २:॥३ै०४

कवाक्यमादेयं वाक्य स्यादादेयनामतः यशोनाम्नो यशःकीर्तिः स्यादिति द्विविदेहिनां २७ तत्र चः पराक्रमतपस्त्यागा
द्युद्भूतयशसाहितं कीर्तनं श्लाघनं ज्ञेया सा यशः कीर्तिरुत्तमैः २८ यद्वा नो दोदिनाः कीर्तिः पराक्रमकृतं यशः
एकदिग्गामिनीकीर्तिः सर्वदिग्गामुकं यशः २९ स्थावरः स्यात्स्थावराख्यात् सूक्ष्मः स्यात्सूक्ष्मनामतः अपर्याप्तं
गी म्रियतापर्याप्तनामकर्मतः ३० साधारणांगः स्यात्साधारणाख्यान्नामकर्मतः अस्थिरास्थिदंतजिह्वा कर्णादि
रस्थिरोदयात् ३० नाभेरधोऽशुभं पादादिकं चाशुभनामतः उपकर्त्तापि द्वेष्टः स्यात्प्रोक्तानां दुर्भगोदयात् ३१ दुष्टा
निष्टस्वरजेतुर्भवेद्दुःस्वरनामतः युक्तवाक्यमनादेयं वाक्यानादेयनामतः ३२ पराघातोदयात्प्राणी परेषां ब
लिनामपि स्याद्दुर्धर्षः सदृत्त्वास्य लब्धिश्चाप्युच्छ्वासनामतः ३३ यतः स्वयमनुष्णोऽपि जनवत्फलप्रकाशकृत् तदातप
नामकर्म रविबिंबांगिनामिव ३४ ऊष्मस्पर्शोदयाद्वह्ने स्यान्नैर्यद्रुप्रकाशिता नह्यातपात्मा किंतु स्यात्साहग्
लोहितवर्णतः ३५ तदुद्योतनामकर्म यतोऽनुष्णप्रकाशकृत भवति प्राणिनामंगं खद्योतज्योतिरादिवत् ३६ र
शेषध्यादयोपाव मुद्योतनामकर्मणा द्योतंते मुनिदेवाश्च विहितोत्तरवैक्रियाः ३७ यतो वपुर्नातिगुरु नातिल
घुगिनां भवेत् नामकर्मागुरुलघु तदुक्तं युक्तिकोविदैः ३८ तत्स्याद्विशेषनाम यतस्त्रिजगतामपि अर्चनीयो भव
त्यंगी प्रातिहार्याद्यलंकृतः ३९ तद्विंशतेः स्थानकानामाराधनान्निकाश्यते भवे तृतीये न्तगता वेदवसम्यक्त्वशालिना
४० उदयश्च भवत्यस्य केवलोत्पत्त्यनंतरं वेद्यते चैतदग्लान्या धर्मोपदेशनादिभिः ४१ यथास्थानं नियमनं कार्या।
न्निर्माणनामतः अंगोपांगानां गृहादि काष्ठानामिव वार्द्धकि ४२ प्रतिजिह्वादीनां स्वीयावयवैनोपहन्यते यतः शा
रीरीतदुपघातनामप्रकीर्तितं ४३ भवदानलाभभोगपभोगवीर्यविघ्नकृत अंतरायं पंचविधं कोशाध्यक्षसमं वि
दुः ४४ यथादित्सावतिनृप नप्राप्नोतिधनंजनः प्रातिकूल्यं गते कोशाध्यक्षे केनापिहेतुना ४५ अपि जानन्दान
फलं वित्तपात्रे च सत्यपि नप्राप्नोति न शक्नोपि दानांतरायविघ्नितः ४६ नपश्चेत्यायविज्ञोपि कृतयत्नो विनास्तुमान्
हेतोः कुतोऽपि प्राप्नोति लाभं लाभान्तरायतः ४७ भोगोपभोगौ प्राप्यावयंगी नो भोक्तुं शक्नुयात् भोगोपभोगांतराय विघ्नि
तो मम्मणादिवत ४८ स्वशक्तिष्टरमस्यपि परिहारादिषूद्यमं शक्तोऽपि कर्तुं नेष्टवीर्यांतरायतः ४९ ज्ञाना

नांच ज्ञानिनां च गुर्वादीनां तथैव च ज्ञानोपकरणानां चाशातनाद्वेषमत्सरैः ५० निंदोपघातांतरायैः प्रत्यनीकत्व
निह्नवैः बध्नात्यावरणं कर्म ज्ञानदर्शनयोर्नवीः ५१ गुर्वादिभक्तिकरुणा कषायविजयादिभिः बध्नाति क
र्म सातारव्यं दाता सधर्मदार्ढ्ययुक् ५२ गुर्वादिभक्तिविकलः कषायकलुषाशयः असातवेदनीयं च बध्नाति कृ
पणः सुमान् ५३ उन्मार्गदेशको मार्गविलोपी साधुनिंदकः बध्नाति दर्शनमोहं देवादिद्रव्यनाशकः ५४ कषा
यहास्यविषयादिभिर्बध्नाति देहवान् कषायनोकषायाख्यं कर्म चारित्रमोहकं ५५ निबध्नाति नारकायुर्महा
रंभपरिग्रहः तिर्यगायुः शल्ययुक्तो धूर्तश्च जनवंचकः ५६ नरायुर्मध्यमगुणः प्रकृत्याल्पकषायकः दानादौ म
ध्यमानजीवो बध्नाति सरलाशयः ५७ चतुर्थादिगुणस्थानवर्तिनोऽकामनिर्जराः जीवा बध्नंति देवायुस्तथा बाल
तपस्विनः ५८ गुणप्रेक्षी त्यक्तमदो ध्ययनाध्यापनोद्यतः उच्चं गोत्रमर्हदादिभक्तो नित्यमतोऽन्यथा ५९ अगौरवश्च
सरलः शुभं नामान्यथाऽशुभं बध्नाति हिंसको विघ्नमर्हत्पूजाविघ्नकृत् ६० स्थितिरुत्कर्षतो ज्ञानदर्शनावर
णीययोः वेदनीयस्य च त्रिंशत्तोयधिकोटिकोटयः ६१ मोहनीयस्य चाब्धीनां सप्ततिः कोटिकोटयः आयुषः स्थि
तिरुत्कर्षात् त्रयस्त्रिंशत्पयोधयः ६२ अबाधाकालरहिता प्रोक्तैषायुर्गुरुस्थितिः तद्युक्तेयं पूर्वकोटी त्र्यंशैक
लवाधिका ६३ गोत्रनाम्नोः सांबुधीनां विंशतिः कोटिकोटयः स्थितिर्ज्येष्ठांतरायस्य स्याद् ज्ञानावरणीयवत् ६४ स्थि
तिर्जघन्यतो ज्ञानदर्शनावरणीययोः अंतर्मुहूर्तप्रमिता तच्च विघ्नेऽपि निरूपिता ६४ कषायप्रत्ययं बंधमाश्रित्याल्प
यसी स्थितिः स्याद् द्वादशमुहूर्त्तान्या वेदनीयस्य कर्मणः ६५ उपशांतक्षीणमोहादिकानां त्वकषायिणां योगैकहे
तुकबद्धस्य वेद्यस्य द्वौ क्षणौ स्थितिः ६६ स्थितिर्लघ्वंतर्मुहूर्तं मोहनीयस्य कर्मणः आयुषः क्षुल्लकभवप्रमिता सा प्र
कीर्तिता ६७ अष्टावेव मुहूर्त्तानि गोत्रनाम्नोर्लघुः स्थितिः अंतर्मुहूर्तप्रमिता सांतरायस्य कर्मणः ६८ यावत्का
लमनुदयो बद्धस्य यस्य कर्मणः तावानबाधाकालोऽस्य सजघन्येतरो द्विधा ६९ अबाधाकाल उत्कृष्टस्त्रयोऽब्दा
नां सहस्रकाः आद्यानां कर्मणां त्रीणां निर्दिष्टो दृष्टविष्टपैः ७० सप्तवर्षसहस्राणि मोहनीयस्य कर्मणः पूर्वको
ट्यास्तृतीयांशः स भवत्यायुषो गुरुः ७१ गोत्रनाम्नोः कर्मणोस्तु द्वे द्वे साष्टसहस्रके त्रीण्यथाष्टसहस्राणि सां

तरायस्य कर्मणः ७२ जघन्यतस्त्वबाधा स्यात् सर्वेषामपि कर्मणां अंतर्मुहूर्तप्रमिता कथिता तत्त्ववेदिभिः ७३
अबाधाकालहीनायां यथास्वं कर्मणां स्थितौ भवेत्कर्मनिषेकस्तत्र भोगाय देहिनां ७४ कर्मणां दलिकं यत्र
प्रथमे समये बहु द्वितीयसमये हीनं ततो हीनतरं क्रमात् ७५ एवं या कर्मदलिकरचना क्रियते जिनैः वेद
नार्थमसौ कर्मनिषेक इति कीर्त्यते ७६ कर्माण्यमूनि प्रत्येकं प्राणिनामखिलान्यपि भवेऽनादौ तिष्ठंत्यमु
ष्मिन्नादीनि प्रवाहतः ७७ स्वभावतोऽकर्मकाणां जीवानां प्रथमं यदि संयोगः कर्मणामंगीक्रियते समये क्वचित्
७८ तदा कर्मक्षयं कृत्वा सिद्धानामपि देहिनां पुनः कदाचित्समये कर्मयोगः प्रसज्यते ७९ विश्लेषस्तु भ
वेज्जीवादनादित्वेऽपि कर्मणां ज्ञानादिभिः पावकाद्यैः स्वर्णमलस्येव कांचनात् ८० ननु चैवमंतरायाणां पंचानां
मूलतः क्षये संजाते किं ददात्यर्हन् सततं लभते च किं ८१ अत्रोच्यतेऽर्हतः क्षीणनिःशेषघातिकर्मणः गुणाः
प्रादुर्भवत्येषां विघ्नानां किं क्षये फलं ८२ ददतो लभमानस्य भुंजतो वोपभुंजतः वीर्यं प्रयुंजतो वास्य नांतरा
यो भवेत्क्वचित् ८४ दानलाभादिकं त्वस्य न संभवति सर्वदा तत्तत्कारणसामग्र्या सत्यां भवति नान्यथा ८५
नृदेवगत्यानुपूर्व्यौ ४ जातिः पंचेंद्रियस्य च ५ उच्चैर्गोत्रं ६ सातवेद्यं ७ देहाः पंच पुरोदिताः १२ ८६ अंगोपांगत्र
यं १५ संहननं संस्थानमादिमं १७ वर्णगंधरसस्पर्शाः प्रशस्ता अगुरुलघ्वपि २२ ८७ पराघात २३ मुच्छ्वास २
४ मातपो २५ द्योत २६ नामनी नृदेवतिर्यगायूंषि निर्माणं सन्नभोगतिः ३१ ८८ तथैव त्रसदशकं तीर्थकृ
न्नामकर्म च द्विचत्वारिंशदित्येवं पुण्यप्रकृतयो मताः ८९ भेदाः पंच नव ज्ञानदर्शनावरणीययोः नीचैर्गो
त्रं च मिथ्यात्वमसातवेदनीयकं ९० नरकस्यानुपूर्वी च गतिरायुरिति त्रयं तिर्यगात्यानुपूर्व्यौ च कषायाः
पंचविंशतिः ९१ एकद्वित्रिचतुरक्षजातयोऽसन्नभोगतिः अप्रशस्ताश्च वर्णाद्यास्तथोपघातनाम च ९२

॥ भुंक्ते किमुप
भुंक्ते वा वीर्यं
किं वा प्रवर्त्तये
त न चेत्किं वि
तदा तेषां वि
घ्नानां किं क्षय
फलं ८२ नरा
याणां क्षय
तः ८३ ३०२

ज्ञानाद्यानि पंच संस्थानानि संहननानि च तथा स्थावरदशकमंतरायाणि पंच च ८२ उक्ता द्व्यशीतिरि
त्येताः पापप्रकृतयो जिनैः नन्वत्र चान्विस्तरश्चात्र क्रियते विस्तृतेर्भिया ८४ एतेषु कर्मस्वष्टसु नवत्या
द्यं चतुष्टयं घातिसंज्ञं जीवसत्कज्ञानादिगुणघातकृत् ८५ अंत्यं चतुष्टयं च स्याद्भवोपग्राहिसंज्ञकं

छद्मस्थानां तथा सर्वविदामप्येतदात्तवं ८६ पारावारानुकारादिति जिनसमयात्सूरिसारादपारात्।
उद्धृत्योद्धृत्य मुक्ताफलनवसुखमा युक्तिपंक्तीरनेकाः क्लृप्ता जीवस्वरूपप्रकरणरचनायोगमुक्ताव।
जीवसौत्कंठ्यं कंठपीठे कृतकृतधियस्तां चिद्बोधसिद्धै ८७ विश्वाश्चर्यदकीर्तिकीर्तिविज

यश्रीवाचकेंद्रांतिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः काव्यं यत्किल तत्र निश्चिततजग
त्तत्त्वप्रदीपोपमे सर्गोयं दशमः सुधारससमः पूर्णः सुखेनासमः ८८ इतिश्रीलोकप्रकाशे दशा
मः सर्गः॥ ॥ग्रंथाग्रंथ॥३०२ अक्षर २३॥ ॥छ॥ ॥श्री॥

१००

तर्दर्प। पुद्गलानामस्तिकायमथ किंचित्तनोम्यहं गुरुश्रीकीर्तिविजयप्रसादप्राप्तधीधनः १ द्रव्यक्षेत्रकालभावगुणैरेषोपि पंचधा
अनंतद्रव्यरूपोसौ द्रव्यतस्तत्र वर्णितः २ लोकएवास्य सद्भावात् क्षेत्रतो लोकसंमितः कालतः शाश्वतो वर्णादिभिर्युक्तश्च
भावतः ३ गुणतो ग्रहणगुणो यतोऽमेषु पुद्गलेष्वपि भवेद्ग्रहणमस्यैव न परेषां कदाचन ४ भेदाश्चत्वार एतेषां प्रज्ञप्ताः परमे
श्वरैः स्कंधा देशाः प्रदेशाश्च परमाणव एव च ५ अनंतभेदाः स्कंधाः स्युः केचन द्विप्रदेशकाः त्रिप्रदेशादयः संख्या
संख्यानंतप्रदेशकाः ६ सूक्ष्मस्थूलपरीणामाः स्युः प्रत्येकमनंतकाः एकक्षणाद्यसंख्येयकालांतस्थितिशालिनः ७ द्विप्र
देशादिकोऽनंतप्रदेशांतो विवक्षितः स्कंधसंबद्धो विभागः स भवेद्देशसंज्ञकः ८ निर्विभाज्यो विभागोयः स्कंधसंबद्ध ए
व हि परमाणुप्रमाणोसौ प्रदेश इति कीर्तितः ९ कार्यकारणरूपाः स्युर्द्विप्रदेशादयो यथा द्विप्रदेशो द्वयोरण्वोः कार्यं त्र्य
णुककारणं १० परमाणुस्त्वप्रदेशः प्रत्यक्षो ज्ञानचक्षुषां कार्यानुमेयोऽकार्यश्च भवेत्कारणमेव सः ११ यदाहुः का
रणमेव तदंत्यं सूक्ष्मो नित्यश्च भवति परमाणुः एकरसवर्णगंधो द्विस्पर्शः कार्यलिंगश्च १२ तत्रापि शीतोष्णस्निग्ध
रूक्षेषु द्वौ चतुर्ष्वविरोधिनौ स्पर्शौ स्यातां परमाणोः पूर्वेरनकथं चन १३ तथाहुः परमाण्वादीनामसंख्यातप्रदेशकस्कंध
पर्यंतानां केषांचिदनंतप्रादेशिकानामपि स्कंधानां तथा एकप्रदेशावगाढानां यावत्संख्यातप्रदेशावगाढानां शीतोष्ण
स्निग्धरूक्षरूपाश्चत्वार एव स्पर्शा इति प्रज्ञापनावृत्तौ द्रव्यक्षेत्रकालभावैः परमाणुश्चतुर्विधः द्रव्यतोणुः पुद्गलाणु
श्चतुर्लक्षण एव सः १४ अच्छेद्योऽग्राह्य एवासौ चाभेद्योऽदाह्य एव च क्षेत्राणुस्त्वत्र प्रदेशश्चतुर्लक्षण एव सः १५
अप्रदेशोऽविभागश्चामध्योऽनर्द्ध इति स्मृतः कालाणुः समयाख्यः स्याच्चतुर्लक्षण एव सः १६ वर्णगंधरसस्पर्शैर

हितश्चाप्रमाद्वतः इत्याणुरेव वर्णादि भावशाश्वतोमतः १७ नाद्यान्तरप्रदेशत्वं जघन्यस्यामतादिकं इदं प्रयोजनं
द्रव्य परमाणुनिरवधि १८ इति भाश्या२०१३०५ सनित्यानित्यरूपः स्यात् द्रव्यपर्यायभेदतः तत्र च द्रव्यतो नित्यः पर
माणोरनाशतः १९ पर्यायतस्त्वनित्योसौ यतो वर्णादिपर्यवाः नश्यंत्येके नवं त्वन्ये विस्रसादिप्रभावतः २० अस्य
शाश्वतभावेन केचित्पर्यवनित्यतां मन्यंते तदसद्यस्मा पंचमांगे स्फुटं स्मृतं २१ परमाणुपुग्गलेणं भंते सासए असासए
गोयमा सिअ सासए सिअ असासए सेकेणठेणं भंते एवं वुच्चति गोयमा दव्वठयाए सासए पज्जवठयाए असासए इति पुद्गला
नां दशविधः परिणामो प्रकथ्यते बंधनाख्यो गतिनामा संस्थानाख्यस्तथापरः २२ भेदाख्यः परिणामः स्यात् वर्णगंधरसा
भिधः स्पर्शो गुरुलघुः शब्दः परिणामा दशेत्यमी २३ स्याद्विस्रसाप्रयोगाभ्यां बंधः पौद्गलिको द्विधा तत्राद्यो विस्रसा बंधः
सोपि त्रिविध इष्यते २४ बंधनप्रत्ययः पात्र प्रत्ययः परिणामजः बंधनप्रत्ययस्तत्र स्कंधेषु द्व्यणुकादिषु २५ भवेद्वि
द्व्यणुकादीनां विमात्रस्निग्धरूक्षतः मिथो बंधो ऽसंख्यकाल मुत्कर्षात्समयोन्यथा २६ यदाहुः समनिद्धयाए बंधो
न होइ समलुक्खयाए विन होइ वेमायनिद्धलुक्खत्तणेण बंधो उ खंधाणं २७ विषममात्रानिरूपणं चोच्यते निद्धस्स
निद्धेण दुयाहिएण लुक्खस्स लुक्खेण दुयाहिएण निद्धस्स लुक्खेण उवेति बंधो जहन्नवज्जो विसमो समो वा २८ जीर्णमे
द्यगुडादीनां भाजनेस्थान तापया सपात्रप्रत्ययः संख्य कालोंतर्मुहूर्त्तिकः २९ परिणामप्रत्ययस्तु अभ्रादीनामने
कधा जघन्यश्चैकसमयं षण्मासान्परमः पुनः ३० इति विस्रसा बंधः अथ प्रयोगबंधो यः से चैषां सादि द्विधाः आला
पनः श्लीनः शरीरबंधः तस्याद्यको ३१ तृणकाष्ठादिभाराणां रज्जुवेत्रलतादिभिः संख्यकालांतर्मुहूर्त्तो बंध आला

पनाभिधः ३२ बंधोर्ह्लीनबंधस्तु प्रथमः श्लेषणाभिधः समुच्चयोच्चयौ बंधौ तुर्यः संहननाभिधः ३३ यः कुड्यकुट्टिमस्तं
भ घटकाष्ठादिवस्तुषु सुधामृत्पंकलाक्षाद्यै बंधः स श्लेषणाभिधः ३४ तटाकदीर्घिकावप्रस्तूपदेवकुलादिषु बंधः सु
धादिनिर्यः स्यात् बहुत्वात्स समुच्चयः ३५ तृणवकरकाष्ठानां उपर्युपरि संस्थानां उच्चत्वेन चयो बंधः स स्यादुच्चयसंज्ञकः
३६ द्विधा संहननाख्यस्तु देशसर्वविभेदतः तत्राद्यः शकटांगादौ परः क्षीरोदकादिषु ३७ आरत्यालापनादेषां जघन्यो
त्कर्षतः स्थितिः अंतर्मुहूर्त्तमसंख्यात कालो ज्ञेयाविचक्षणैः ३८ द्विधा शरीरबंधः स्यादेकः पूर्वप्रयोगजः प्रत्युत्पन्नप्रयोगो
त्थः परः सोस्त्व तत्पूर्वकः ३९ तत्राद्योन्य समुद्घाते क्षिप्तानां देहतो बहिः तैजसकार्मणाणूनां पुनः संकोचने भवेत् ४०
समुद्घातान्निवृत्तस्य परः केवलिनो भवेत् स्यात्पंचमे क्षणे तेजः कार्मणाणुसमाहृतौ ४१ आत्मप्रदेशविस्तारे तेजः कार्म
णयोरपि विस्तारः संहृतौ तेषां संघातः स्यात्तयोरपि ४२ देहप्रयोगबंधस्तु बंधौदारिकादिकः स पंचमांगे शतके ऽष्ट
मेज्ञेयः सविस्तरः ४३ इति बंधपरिणामः गतेः परिणतिर्द्वेधा संस्पृशांत्यस्पृशांत्यपि द्वयोरप्यविशेषस्तु वर्णितस्तत्त्वपार
गैः ४४ पुद्गलस्यांतराध्वस्वं तरं संस्पृशतो गतिः याद्येतवेत्संस्पृशंती द्वितीयास्यात्ततोन्यथा ४५ अथवा द्विधा गति प
रीणामो दीर्घह्रस्वगतिभेदतः दीर्घदेशांतरप्राप्ति हेतुराद्यो ऽन्यथापरः ४६ एकेन समयेनैव पुद्गलः किल गच्छति लोकांता
दन्यलोकांतं गतेः परिणतेर्बलात् ४७ तथाहुः परमाणु पुग्गलेणं भंते लोगस्स पुरच्छिमिल्लातो चरमंताओ पच्चच्छिमि
ल्लं चरिमंतं एगसमएणं गच्छति दाहिणिल्लाओ चरिमंताओ उत्तरिल्लं चरिमंतं उत्तरिल्लाओ चरिमंताओ दाहिणिल्लं चरिमंतं
उवरिल्लाओ चरि० हेट्ठिल्लं चरि० हेट्ठिल्लाओ चरि० उवरिल्लं च० एगेणं समएणं गच्छति हंता गोयमा जाव गच्छति भंते ती

सूत्रे श०२५ उ०८ इति गतिपरिणामः परिमंडलं च वृत्तं त्र्यस्रं च चतुरस्रकं आयतं च स्वरूपजीव संस्थानं पंचधा मतं
४९ मंडलावस्थिता एवाणवो बहिः सुषिरमंतरे वलयस्येव तद्ज्ञेयं संस्थानं परिमंडलं ५० अंतःपूर्णं तदेव स्याद् वृ
त्तं कुलालचक्रवत् त्र्यस्रं शृंगाटवत् कोणे काटिवच्चतुरस्रकं ५१ आयतं दंडवद्दीर्घं घनप्रतरभेदतः चत्वारि स्फाट्टि
ष्म संस्थानानि प्रत्येकमादितः ५२ आयतं तु त्रिधा श्रेणि घनप्रतरभेदतः ओजयुग्मप्रदेशानि द्वाभ्यां भिन्नानि आदिमं प
र ओजःप्रदेशं प्रतरवृत्तं पंचाणुसंभवं पंचाकाशप्रदेशावगाढं च परिकीर्त्तितं ५३ यत्र प्रदेशाश्चत्वारश्चतुर्दिशं प्र
तिष्ठिताः एकः प्रदेशोंतर्वृत्त प्रतरं तद्यथोदितं ५४ युग्मप्रदेशं प्रतरवृत्तं च द्वादशाणुकं तावदंशावगाढं तच्चैवमि
त्थं जायते ५५ चतुर्षु च प्रदेशेषु चत्वारोंशा निरंतरं स्थाप्यंते रुचकाकारास्तत्परितस्ततः ५६ द्वौ द्वौ चतुर्दिशं स्थाप्यौ
प्रदेशौ जायते ततः युग्मप्रदेशं प्रतरवृत्तमुक्तं पुरातनैः ५७ साप्ताणुकं सप्तखांशावगाढं च भवेदिह ओजप्रदेशानिष्प
न्नं घनवृत्तं हि तद्यथा ५८ पंचप्रदेशे प्रतरवृत्ते किल पुरोदिते अधऊर्द्ध्वं च मध्याणोरेकैकोणुर्निवेश्यते ५९ द्वात्रिंश
दणुसंपन्नं तावत्खांशावगाढकं युग्मप्रदेशं हि घनवृत्तं भवति तद्यथा ६० उक्तप्रतरवृत्तस्य द्वादशांशात्मकस्य वै
उपरि द्वादशान्ये स्थाप्यंते परमाणवः ६१ ततः पुनर्मध्यमाणुचतुष्कस्याप्युपर्यधः स्थाप्यंते किल चत्वारश्चत्वारः प
रमाणवः ६२ ओजप्रदेशं प्रतरत्र्यस्रं तु त्रिप्रदेशकं त्रिप्रदेशावगाढं च तदेवं जायते यथा ६३ स्थाप्यते द्वावणू पंक्त्या ह्येक १०१
स्याधस्ततः परं एकोणुः स्थाप्य इति निर्दिष्टं शिष्टदृष्टिभिः ६४ युग्मप्रदेशं प्रतरत्र्यस्रं तु षट्प्रदेशकं षट्प्रदेशावगाढं
च तदेवं किल जायते ६५ त्रयः प्रदेशाः स्थाप्यंते पंक्त्याणू द्वितयं ततः आद्यस्याधो द्वितीयस्य त्वध एको निवेश्यते

६६ ओजाणुकं घनत्र्यस्रं पंचत्रिंशत्प्रदेशकं पंचत्रिंशत्खप्रदेशावगाढं च भवेद्यथा ६७ तिर्यग्निरंतराः पंच स्थाप्यंते पर
माणवः तानधोधः क्रमेणैवं स्थाप्यंते परमाणवः ६८ तिर्यगेव हि चत्वारस्त्रयो द्वावेक एव च जातोयं प्रतरः पंचदशांश
:पंचपंक्तिकः ६९ ततश्चास्योपरि सर्वपंक्तिष्वंत्यांशमंशकं विमुच्यांशा दशस्थाप्यास्तस्याप्युपरि षट् तथा ७० इत्थमेव तदुप
रि त्रय एकस्ततः पुनः उपर्यस्यापीति पंचत्रिंशत्स्युः परमाणवः ७१ युग्मप्रदेशं तु घनत्र्यस्रं चतुःप्रदेशकं चतुर्व्योमां
शावगाढं तदप्येवं भवेदिह ७२ पूर्वोक्ते प्रतरत्र्यस्रे त्रिप्रदेशात्मके किल अणोरेकस्योर्द्ध्वमेकः स्थाप्यते परमाणुकः
७३ ओजप्रदेशं प्रतरचतुरस्रं नवांशकं नवाकाशांशावगाढमित्थं तदपि जायते ७४ तिर्यग्निरंतरं तिस्रः पंक्तयस्त्रिप्र
देशिकाः स्थाप्यंते तर्हि जायेत चतुरस्रमयुग्मजं ७५ युग्मप्रदेशं प्रतरचतुरस्रं तु तद्भवेत् चतुर्व्योमांशावगाढं चतुःप्रदेश
संभवं ७६ द्वि द्वि प्रदेशे द्वे पंक्ती स्थाप्येते तत्र जायते युग्मप्रदेशं प्रतरचतुरस्रं यथोदितं ७७ सप्तविंशत्यणुजातं तावद
व्योमांशसंस्थितं ओजप्रदेशं हि घनचतुरस्रं भवेदिह ७८ नवप्रदेशप्रतरचतुरस्रस्य तस्य वै उपर्यधो नव नव स्थाप्यंते परमा
णवः ७९ अष्टव्योमांशावगाढं स्यादष्टप्रदेशकं युग्मप्रदेशं तु घनचतुरस्रं भवेद्यथा ८० चतुःप्रदेशप्रतरचतुर
स्रस्योपरि चतुःप्रदेशिकोन्योपि प्रतरः स्थाप्यते किल ८१ ओजप्रदेशजं श्रेण्यायतं स्यात्त्रिप्रदेशजं त्र्यंशावगाढमणु
षु त्रिषु न्यस्तेषु संततं ८२ निरंतरं स्थापिताभ्यामणुभ्यां द्विप्रदेशजं युग्मप्रदेशजं श्रेण्यायतं द्व्यंशसंस्थितं ८३ ओजःप्र
देशं प्रतरायतं पंचदशांशकं तावद्व्योमांशावगाढमित्थं तदपि जायते ८४ पंक्तित्रयेपि स्थाप्यंते पंच पंचाणवस्तदा
ओजप्रदेशजनितं भवति प्रतरायतं ८५ षट्खांशस्थं षट्प्रदेशं स्याद्युग्मप्रतरायतं त्रिभिस्त्रिभिर्द्वयोः पंक्त्योर्न्यस्तैरणुभिः पर
माणुभिर्द्व

पंचचत्वारिंशं मोजाएकं घनायतं पंचचत्वारिंशदभ्र प्रदेशेषु प्रतिष्ठितं ८७ तत्र च एवमुक्ते पंचदश प्रदेशप्रतरा
यते पंचदशपंचदशाणवः स्थाप्याउपर्यधः ८८ द्वादशांशं द्वादशाभ्रांशावगाढं घनायतं युग्मप्रदेशजं ज्ञेय मित्युक्तमपि
आयते ८९ षट्प्रदेशकस्य प्रतरायतस्योपरि विन्यसेत् षट्प्रदेशांस्ततो युग्मप्रदेशं स्याद्घनायतं ९० विंशत्यभ्रांशावगाढं
विंशत्यंशात्मकं भवेत् युग्मप्रदेशं प्रतर परिमंडलनामकं ९१ चतुर्दिशं तु चत्वार श्चत्वारः परमाणवः विदिक्षु स्थाप्य
एकैक भवेदेवं कृते सति ९२ अणूनां विंशतेरेषा मुपर्यणुषु विंशतौ स्थापितेषु युग्मजातं स्याद्घनं परिमंडलं ९३
एतच्चत्वारिंशदंशं तावत्खांशप्रतिष्ठितं ओजप्रदेशजनितौ वृत्तभेदौ न संमतौ ९४ उक्तप्रदेशान्यूनत्वे संभवेत्ति न निश्चि
तं संस्थानानि यथोक्तानि तत इच्छंत्र प्ररूपणा ९५ यथा पूर्वोक्तितः पंचाणुक प्रतरवृत्ततः एकत्रांशे कर्षिते स्यात् समांशं चतु
रस्रकं ९६ एतान्यतीन्द्रियत्वेन नैवातिशयवर्जितैः ज्ञेयान्यतः स्थापनाभिः प्रदर्श्यंते इमास्तुता ९७ जघन्यानि किले
तानि सर्वाण्युत्कर्षतः पुनः अनंताणुस्वरूपाणि मध्यमान्यपराणि तु ९८ तथोक्तमुत्तराध्ययननिर्युक्तौ परिमंडले य
वट्टे तंसे चउरंस आयए चेव घणपयरपढमवज्जं ओजपएसे य जुम्मे य ९९ पंचग बारसगं खलु सत्तग बत्तीसगं च वट्टंमि
तिअ छक्कग पणतीसा चत्तारिय होंति तंसंमि १०० नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे तिगदुग पन्नरसे वय छच्चे
वय आयए होंति १ पणयाला बारसगं तह चेवय आययंमि संठाणे वीसा चत्तालीसा य परिमंडलए य संठाणे २ पंचमांगे १०३
त्वेनि त्थंस्थं षष्ठं संस्थानमीरितं पंचभ्योपि व्यतिरिक्तं द्व्यादिसंयोगसंभवं ३ संस्थानयोर्द्वयोर्द्वयोरप्येकरूपेण संभवः तथा
पि भिन्नभिन्नांशे तेस्यात्संदर्भिकादिवत् ४ एषु चाल्पाल्पप्रदेशावगाहीनि श्रुभावतः भूयांस्यल्पानि भूयिष्ठांशस्था

२



उ. ५
इत्याणि भिद्यमा
नानि। स्तोकास्तु
चूर्णिकाभिदा।
पश्चानुपूर्व्या त्रोषा
णि। स्युरनंतगुणा
नि च ११

यीनितानि च ५ पंचकानि संस्थानमायतं वृत्तं त्रिचतुःपरिमंडलं चतुर्विधानि शेषाणि संस्थानानीति विंशतिः ६ भेदाख्यः
पुद्गलपरीणामो भवति पंचधा खंडप्रतरभेदौ द्वौ चूर्णिकाभेद इत्यपि ७ भेदोनुतटिकाभिख्यो भेदश्चोत्करिकाभिः स्वरूपमथ्य
प्येतेषां यथाश्रुतमथोच्यते ८ लोष्टखंडादिवत्खंड भेदो भवति निश्चितं भूर्जपत्राभ्रपटलादिवत्प्रतरसंज्ञितः ९ स्याच्चू
र्णिकाभेदः क्षिप्तमृत्पिंडवत्किल इक्षुत्वगादिवद्वस्तु तटिकाभेद इष्यते १० उत्कीर्यमाणे प्रस्थादौ स्यादुत्करिकाभिधः त
टाकावटवाप्यादि स्फुटेवं भाव्यतामयं ११ वर्णैः परिणतानां तु भेदाः पंच प्ररूपिताः कृष्णनीलारुणपीतशुक्ला इति वि
भेदतः १२ स्युः कज्जलादिवत्कृष्णाः नीलानील्यादिवन्मताः स्युर्हिंगुलादिवद्रक्ताः पीताश्च कांचनादिवत् १३ शुक्लाः
शंखादिवद्गंधपरिणत्या तु ते द्विधा पुष्पादिवत्सुरभयो दुर्गंधा लशुनादिवत् १४ रसैः परिणतास्ते तु प्रकारैः पंचभिर्मताः
तिक्तकटुकषायाम्लमधुरा इति भेदतः १५ कोशातक्यादिवत्तिक्ताः कटवो नागरादिवत् प्रोक्ता आमकपित्थादिव
त्कषायरसांचिताः १६ आम्लकादिवदम्लाः स्युः मधुराः शर्करादिवत् स्पर्शैः परिणतायेपि तेषामष्टविधाः पुनः १७
उष्णशीतौ मृदुखरौ स्निग्धरूक्षौ गुरुर्लघुः उष्णस्पर्शास्तत्र वह्न्यादिवत् शीता हिमादिवत् १८ नवनीतादिवन्मृदवः ख
राश्च प्रस्तरादिवत् स्निग्धघृतादिवद्ज्ञेया रूक्षा भस्मादिवन्मताः १९ गुरुस्पर्शपरिणता वज्रादिवत्प्रकीर्तिताः ल १०४
घुस्पर्शपरिणता अर्कतूलादिवन्मताः २० अगुरुलघुपरिणाम अथ स्याद्वैवं सूक्ष्मो लघुरूपलोगुरु रूढ व्योमगमन
शीलतो ज्ञेयो गुरुलघुरनिलस्तिर्यग्गमनादाकाशमगुरुलघु २१ व्यवहारतश्चतुर्धा भवंति च सूनिश्चयादराण्ये
व निश्चयतश्चागुरुलघु गुरुलघु चेति द्विभेदैव २२ तत्रापि बादरमष्टस्पर्शं द्रव्यं रूप्येव भवति गुरुलघु

कं अगुरुलघु चतुःस्पर्शं सूक्ष्मं वियदाद्यमूर्त्तमपि २३ वैक्रियमौदारिकमपि तैजसमाहारकं च गुरुलघुकं कार्म
णमनोवचांसि च सौक्ष्म्यादगुरुलघुकानि २४ तथोक्तं निश्चयतः सव्वगुरुं सव्वलहुं वा न विज्जए दव्वं ववहारओ उ जुज्ज
इ बायरखंधेसु नन्नेसु २५ अगुरुलहु चउफासा अरूविदव्वा य होंति नायव्वा सेसा उ अट्ठफासा गुरुलहुआ निच्छयनय
स्स २६ ओरालियवेउव्वियआहारगतेय गुरुलहू दव्वा कम्मगमणभासाई एयाइं अगुरुलहुआइं २७ भगवतीवृत्ते
शतके वर्णगंधरसस्पर्शसंस्थानैर्मुख्यभावतः इत्येकविंशतिर्भेदाः स्युर्यांसोत्तरेत्वमी २८ एकस्योज्ज्वलवर्ण
स्य द्वौ भेदौ गंधभेदतः संस्थानैश्च रसैश्चापि पंच पंच भिदा मताः २९ स्पर्शैस्तथाष्ट भेदाः स्युरेवमेकस्य विंशतिः इती
दृक्पंचभिर्वर्णैर्भेदानां शतमाप्यते ३० संस्थानानां रसानां च शाखैकेनैव मिष्यते शतं शतं विभेदानां ततो जातं शत
त्रयं ३१ सुगंधीनां च पंच पंच भेदा वर्णरसैस्तथा संस्थानैश्चाष्टउस्पर्शैः स्युस्त्रयोविंशतिस्ततः ३२ दुर्गंधनामधीकं स्युस्त्र
योविंशतिरेव हि षट्चत्वारिंशदुभयोर्गंधयोः स्युरिति ३३ शीतस्पर्शस्यापि भेदौ द्वौ मतौ गंधभेदतः संस्थानरसवर्णै
श्च पंच पंच भिदास्तथा ३४ शीतस्याविरुद्धत्वेन तत्रोष्णस्यत्वसंभवात् भिदाः स्पर्शैः षट् स्युस्त्रयोविंशतिस्ततः ३५ स्प
र्शानामेवमष्टानां प्रत्येकं गंधयोरपि त्रयोविंशतिभेदत्वात् द्विशतीत्रिंशदुत्तरा ३६ एवमेते पुद्गलानां भेदाः सर्वे प्रकीर्ति
ताः शतानि पंच सत्रिंशान्येवमजीवरूपिणां ३७ योसौ शब्दपरीणामो द्विधासोपि शुभोशुभः पुद्गलानां परीणामाद
शब्दे चं निरूपिताः ३८ गंधद्रव्यादिवद्घ्राणतुल्येन प्रसर्पणात् शब्दस्याद्रव्यवच्चोक्तोपघातकतयापि च ३९ ध्वने
: पौद्गलिकत्वस्य यौक्तिकं यत्तु केचन मन्यंते व्योमगुणतां तस्य तन्नोपपद्यते ४० अस्य व्योमगुणत्वे तु दूरासन्नस्थ

राद्दयोः श्रवणेन विद्धःस्या स्वर्गं खलु यन्नमः ४१ यथाशाद्दस्तमश्छाया तथोद्योततमोस्यपि संतियौद्गलिकान्येवं त्या
ऊः श्रीजगदीश्वराः ४२ यदादर्शादिमुखादेः प्रतिबिंबं निरीक्ष्यते सोपिच्छायापुद्गलानां परिणामोनन्नमः ४३ अत्र
मोज्ञानांतरबाह्यः स्यान्नैतत्तु तत्र दृश्यते न च भ्रमःस्यात्सर्वेषां युगपत्सहृत्वहेतुः ४४ सर्वस्थूलपदार्थानां तेछायापु
द्गलाःपुनःसाक्षादेव प्रतीयंते छायादर्शनतःस्फुटाः ४५ सर्वमैंद्रियकं वस्तु चयापचयधर्मकं रश्मिवच्चरश्मय
स्ते छायापुद्गलसंहतिः ४६ तथोक्तं प्रज्ञापनाटीको सर्वमैंद्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्चेति अथा
प्यतादृशसामग्री तेच्छायापुद्गलाःपुनः विचित्रपरिणामाःस्युः स्वभावेन तथोच्यते ४७ यदातपादियुक्तेते गतावस्तुन्य
भास्वरे तदास्वसंबंधि वस्त्वाकाराःस्युःश्यामरूपकाः ४८ दृश्यते सातपज्योत्स्ना दीपालोकादियोगतः स्थूलद्रव्याकृतिश्र
छाया नृणामीदृशश्यामरूपका ४९ यदातु स्फटिकादर्शादिभास्वरद्रव्यसंगताः तदास्युस्ते स्वसंबंधिद्रव्यवर्णाकृतिस्पृशः
५० आदर्शादौ प्रतिच्छाया यत्तत्पक्षेण दृश्यते मूलवस्तुसदृग्वर्णाकारादिभिःसमन्विता ५१ एवं स्वरूपवैचित्र्यं
न चेतन्नोपपद्यते सामग्रीसहकारेण नानावस्थादि पुद्गलाः ५२ यथादीपादिसामग्र्या तामसा अपि पुद्गलाः प्रकाश
रूपाःस्फुरंतीय यमेतादृशाःपुनः ५३ आतपोद्योतयोःपौद्गलिकत्वेतु निर्विवादं पुद्गलत्वेतु तमसां शीतस्पर्शतया
स्फुटं नीलं चलत्यंधकारमित्यादिप्रसयादपि ५४ याश्चाप्रतीघातिताद्याःपरोक्ताःप्रतियुक्तयः तास्तु दीपप्रकाशा २०५
